सागरिका

आधुनिकसंस्कृतगद्यकाव्ये स्वर्णकालविशेषाङ्कः

संस्कृतत्रैमासिकी

सप्तत्रिंशवर्षे अङ्कौ तृतीय-चतुर्थौ

३७/३-४

विक्रमसंवत् २०६१

सागरिका समितिः

संस्कृतविभागः

डॉ. हरीसिंह गौर विश्वविद्यालयः, सागरम्

सागरिका

संस्कृतत्रैमासिकी

विक्रमसंवत् २०६१

❖

आधुनिकसंस्कृतगद्यकाव्ये स्वर्णकालविशेषाङ्क

सप्तत्रिंशवर्षे अङ्कौ तृतीय-चतुर्थौ

३७/३-४

❖

संस्थापकः प्रधानसम्पादकश्च

रामजीउपाध्यायः

❖

सम्पादकौ

राधावल्लभत्रिपाठी

कुसुमभूरिया

❖

प्रबंधसम्पादकः

अच्युतानन्ददाशः

❖

सागरिकासमितिः

संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म. प्र.)

सदस्यताशुल्कम्

वार्षिकम्	(प्रतिव्यक्ति)	५०	रूप्यकाणि
आजीवनम्	(प्रतिव्यक्ति)	७५०	रूप्यकाणि
आजीवनम्	(प्रतिसंस्थम्)	१५००	रूप्यकाणि
प्रत्यङ्कम्		१५	रूप्यकाणि
अस्याङ्कस्य पृथङ्मूल्यम्		३०	रूप्यकाणि

अङ्कप्रकाशनम् प्रतिवर्षम् -

आषाढ-आश्विन-पौष-चैत्रमाषेषु

(जून-सिंतबर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः

डॉ. अच्युतानन्ददाशः

संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् - ४७० ००३

दूरभाष-फैक्स - ०७५८२-२६४३६६

e-mail: sankrit_sgr@sancharnet.in

प्रकाशिका

सागरिकासमितिः

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्

अनुक्रमः - पृष्ठाङ्कः

	आधुनिकसंस्कृतगद्यपुष्पिका आचार्य जगन्नाथपाठकः	१
१.	आधुनिकसंस्कृतगद्यसाहित्यम् – किञ्चित्प्रास्ताविकम् अच्युतानन्ददाशः	२
२.	आधुनिकसंस्कृतगद्यसाहित्यम् – १, अभिराजराजेन्द्रमिश्रः	७
३.	आधुनिकसंस्कृतगद्यसाहित्यम् – २, वे. कुटुम्बशास्त्री	१६
४.	संस्कृते निबन्धानां नवजागर्ति, देवर्षि कलानाथ शास्त्री	२८
५.	सांप्रतिकं संस्कृतगद्यसाहित्यम् : समस्याः समाधानानि च इच्छारामद्विवेदः	३५
६.	अभिराजराजेन्द्रमिश्रस्य कथानां समीक्षणम्, दीक्षितपुष्पा	३६
७.	भट्टश्रीमथुरानाथशास्त्रिणो गद्यसाहित्यम्, रमाकान्तपाण्डेयः	४६
८.	आचार्यराधावल्लभत्रिपाठिकृतं संस्कृतगद्यसाहित्यम्, प्रेमनारायणो द्विवेदी	५६
९.	'चन्द्रहासचरितम्' 'कालाय तस्मै नमः' इति गद्यरचनयोः विहंगवीक्षणम् पी. वरप्रसादमूर्तिः	७३
१०.	आधुनिकसंस्कृतगद्यसाहित्ये बिहारराज्यस्यावदानम्, गङ्गाधरपण्डा	८०
११.	संस्कृते गद्यसाहित्यस्य रीतिः गतिश्च, एन्.पी. उन्नी	८४
१२.	आधुनिकसंस्कृतगद्यसाहित्यस्य प्रयोगधर्मिता, धर्मेन्द्रकुमारसिंहदेवः	८७
१३.	भाषान्तरसाहित्यानां संस्कृतानुवादप्रक्रिया, भागीरथिनन्दः	९०
१४.	स्पशकथा : गद्यसाहित्यस्य काचिदनन्या प्रतिश्रुतिः, नारायणदाशः	९४
१५.	कथात्मकं गद्यकाव्यं त्रिपुरदाहकथा, कुसुम भूरिया	१००
१६.	आधुनिकसंस्कृतगद्यसाहित्ये पं. ब्रजभषणमिश्रमहोदयस्यावदानम् आशा सर्वटे	१०६
१७.	अर्वाचीनसंस्कृतसाहित्ये केशवचन्द्रदाशस्य गद्यसाधना पूर्णचन्द्रउपाध्यायः	१११
१८.	आधुनिकसंस्कृतगद्यकाव्यसमीक्षायां "पाश्चात्यसंस्कृतम्" आचार्यः सत्यनारायणः	११५
१९.	गद्यकारो हृषिकेशः, राधावल्लभत्रिपाठी	११८
२०.	समकालिक–संस्कृतकथासाहित्यस्य द्वे अत्याधुनिके प्रवृत्ती टुप्कथा स्पशकथा च, बनमाली बिश्वालः	१२९
२१.	विंशशताब्दस्यान्तिमदशकस्थानां संस्कृतलघुकथानां सामाजिक–आयामः, उमेशदत्तभट्टः	१३५

२२. मानवीयकरुणैव बनमालीविश्वालस्य कथानां मूलस्वरः
अर्चनातिवारी १४२

२३. राधाकृष्णनचरितचम्पूः (सर्वपल्लिराधाकृष्णनस्य जीवनं दर्शनं च)
राधावल्लभः १५८

पुस्तकसमीक्षा १७६-१८४

समीक्षकः	**ग्रन्थः**
सच्चिदानन्दमिश्रः	*व्युत्पत्तिवादे अभेदान्वयबोधप्रकरणम्* कृष्णंभट्टी–आदर्शाख्य टीकाद्वयोपेतम्, सं. अच्युतानन्ददाशः, प्रकाशकः प्रतिभा–प्रकाशनम्, नवदेहली, २००३.
राधावल्लभः	*निम्नपृथिवी* (कथासंग्रहः), केशवचन्द्रदाशः, लोकभाषाप्रचार समितिः, भद्रकम्, २००१.
	तिलोत्तमा (उपन्यासः), केशवचन्द्रदाशः, प्र. श्रीमती सुभद्रा दाशः, पुरी, २००२
	आधुनिकसंस्कृत में अर्थपूर्ण अभिव्यक्ति की कविता, हर्षदेवमाधवः, सं. श्रुति हर्षदेवं, प्र. श्रीवाणी अकादेमी, चान्द्रखेडा,
	ऋषेः क्षुब्धे चेतसि, हर्षदेवमाधवः, सं. प्रितेशशुक्लः, प्र. श्रीवाणी अकादेमी, चान्द्रखेडा,
	मनसो नैमिषारण्यम्, हर्षदेवमाधवः, सं. नारायणदाशः, प्र. श्रीमती सवितादाशः, गञ्जामम्, २००३।

आधुनिकसंस्कृतगद्यपुष्पिका

आचार्यः जगन्नाथपाठकः

न पुनर्दण्डी न पुनः कोऽपि सुबन्धुर्न वा गुणढ्योऽपि।
गृह्णीयादवतारं जगतीह न बाणभट्टश्च।।

सत्यप्येवं न स्याद् भारतभूमिः कदाचिदपि बन्ध्या।
नैकेषां रत्नानां प्रसवित्री गद्यकारणाम्।।

नासीत् कदापि रिक्तो नास्ति न गन्ता कदापि रिक्तत्वम्।
प्रणतीनां नः पात्रं च एष सारस्वतः कोशः।।

आधुनिकस्य तदेतत् संस्कृतगद्यस्य किमपि सौभाग्यम्।
तस्यां मग्नः समभूत् श्रीव्यासादम्बिकादत्तात्।।

श्रीमानप्पाशास्त्री भट्टाचार्यस्तथा हृषीकेशः।
भट्टश्च मधुनाथस्तिष्ठति तेषां त्रयी यस्मिन्।।

चन्द्रमहीपति–सूर्यप्रभादि यदलङ्कृतिर्मता काऽपि।
श्रीनाथैः श्रीकलितं यच्च सनाथं कलानाथैः।।

रेवाप्रसादलालिताऽभिराजराजेन्द्रमिश्रसंवलिता।
सन्ततमेषा प्रवहतु गद्यमयी भारते गङ्गा।।

आधुनिकसंस्कृतगद्यसाहित्यम्

किंचित्प्रास्ताविकम्

अच्युतानन्ददाशः

आधुनिकसंस्कृतगद्यसाहित्यम् इति विषयमवलम्ब्य प्रवृत्तमेतच्चर्च्चा–सत्रम्। तदत्रायं कालः संस्कृतगद्यसाहित्यस्य स्वर्णकाल इति केचिदभिप्रयन्ति केचित्त्वद्यत्वे संस्कृतगद्यसाहित्यस्य विपर्यस्तमुच्छृङ्खलं च रूपं वर्धतेतमां चेत्यभिप्रयन्तीति विरुद्धं मतं करतलामलकायते। वस्तुतत्त्वं तु तत्रभवतां गद्यसाहित्यक्षेत्रे विदितवेदितव्यानाम् अवगतयाथातथ्यानां कृतभूरिपरिश्रमाणां विद्वत्तल्लजानां च समवाये न किञ्चिदावेदनीयं विद्यते। तथापि प्रस्तावनारूपेण किमपि वक्तुकामेन मया ध्रुवं साहसमात्रमनुष्ठीयते इति विद्वद्भिः क्षन्तव्योऽयं जनः।

गद्यं नाम वाचः सार्वजनीनं व्यावहारिकं रूपं चिराद् वरीवर्त्ति। प्रवृत्तिनिवृत्त्यौपयिकतया यां वाचं लोकः प्रयुङ्क्ते; या च वाक् शिष्टजन–व्यवहारस्य शिष्टाचारपरम्पराया वा धुरं धत्ते; या वाक् पश्यन्त्यात्मना व्यक्तित्वं निर्माति, या च मध्यमात्मा विचारवैभवं विभर्त्ति, या च वैखरीरूपात्मना लोक–चरित्रं प्रख्यापयन्ती वाक्प्रतिष्ठं जनं विधत्ते सा गद्यात्मिकैवेति नास्ति संशितिलेशोऽपि। गद्यात्मिकां सर्वजनमनोगतामेतां वाचं लोकनियन्त्रिकां को नु वेद। तस्या एव वाचः साहित्यिकं रूपं काव्यरूपं वा अद्यतनचर्च्चासत्रस्य विचार्यविषयः। तत्र –

'वाङ्मये सरसं वस्तु गद्यैरेव विनिर्मितम्'

इति पद्यात्मिका वाणी गद्यप्रशंसापरा दृश्यते।

अयं कालः गद्यकाल इति केषाञ्चिन्मनीषिणां मतमस्ति। गद्यमेव वाचः स्वच्छन्दं स्वाभाविकं रूपं येन लोकः अनादिकालाद् व्यवहरति, यच्चरूपं लोकाभिव्यक्तिं, लोकप्रवृत्तिं, लोकसंस्कृतिं च संबिभ्रद् लोकयात्रां निर्वर्तयतीति दृश्यते। अतः वाचः पद्यरूपं तु तदलङ्करणमात्रम्। पद्यात्मिकायाः वाचः रूपम् अपूर्वाह्लादजनकत्वेन संगीतसौन्दर्यसमुद्भावकत्वेन वा यद्यपि हृद्यं भवतीति उच्यते; तथापि छन्दोबद्धनिराकूलात्मिकायाः यथोचितपदविन्यास–स्वातन्त्र्य–शक्ति–समन्वितायाः गद्यात्मिकायाः वाचः स्वरूपं तु भव्यभावाभिव्यक्तिसमर्थं प्रसन्नगम्भीर–पदावली–समाश्लिष्टं रसभरनिर्भरं हृद्यम् अनवद्यं च भवतीति मनीषिणां मतमस्ति। अतएव *"गद्यं कवीनां निकषं वदन्तीति"* कविसम्प्रदायः चिरप्रतिष्ठो वर्तते।

लोकयात्रानिर्वाहो यद्यपि गद्येनैव भवति तथापि संस्कृतवाङ्मये गद्य–रचना किमिति विरलतरलेति नो विद्मः। कमपि संस्कृतसाहित्येतिहासग्रन्थम् अवलोकयामश्चेद् तत्र यदि पञ्चशतपृष्ठात्मको भागः पद्यसाहित्यं विवृणोति तत्र गद्यसाहित्यमाश्रित्य प्रायः केवलं पञ्चाशत् पृष्ठात्मको भागः सन्निवेशितो दृश्यते।

तत्र प्रश्नः समुन्मिषति मनसि – 'किं गद्यरचना पद्यरचनापेक्षया क्लेशसाध्या'? यथा किल आचार्याः जगन्नाथपाठकमहोदयाः **तिलकमञ्जरी**कर्तुः धनपालस्य वचनमुद्धरन्तः वदन्ति –

'व्याघ्रादिव समाघ्रातो गद्याद् व्यावर्तते जनः' इति।

केचन त्वित्थम् अभिप्रयन्ति यत् पद्यरचनायां द्वित्राणि पद्यानि यदि रमणीयानि भवन्ति रसिकजन–मनोविनोदकारिणी तावतैव कविः सुप्रतिष्ठो भवति लोके। गद्ये तु समग्रमपि काव्यं रसनिस्यन्दनिर्भरेण भाव्यम्। संस्कृत–साहित्यवमर्शे पण्डितः द्विजेन्द्रनाथशास्त्री महाभागः इत्थमभिप्रैति –

"पद्यमयप्रबन्धेषु तावदेकस्मिन्नप्यंशविशेषे चमत्कृतिसन्निवेशात् समस्तमेव पद्यं चमत्कृतिमत्तया यथा प्रशस्यते न तथा गद्यमये सन्दर्भे। गद्ये तु सर्वाङ्गीणमेव सौष्ठवं प्रशंसाधायकं भवति न जात्वांशिकम्" इति।

मम त्वित्थं भाति यद् रेलमार्गगामिनीव कविताकामिनी च्छन्दोमार्ग–गामिनी द्रुतं तत्प्रणेतारं यशोराशिभिरासिञ्चन्ती स्वलक्ष्यस्थलं प्रापयति। किन्तु (मध्यदेशे) प्रशस्ततरं मार्गमन्वेषन्ती लोकवाहिनीव नैकविध्नशंकिनी स्वैरं प्रयाति गद्यरचना। काले एव कविः स्वलक्ष्यस्थलमधिगच्छति वा न वा को नु वेद।

संस्कृतवाङ्मयस्य प्रथमावतारः गद्यरूपोपहितः पद्यरूपोपहितो वा आसीदति न वयमिदमित्थंतया विद्मः। ऋचां छन्दोबद्धतया पद्यरूपं वाङ्मयस्य सर्वप्राचीनतममिति यद्यप्यध्यवसीयते तथापि वैदिकवाङ्मये ब्राह्मणानाम् आरण्यकानाम् उपनिषदां श्रौत्रसूत्र–गृह्यसूत्रादि–सूत्रग्रन्थानां वेदाङ्गानां च रचना गद्यरूपा अस्तीति विदितचरमेव समेषाम्। उपनिषदां भाषा तथा काव्यमयी, तथा माधुर्यसुधानिस्यन्दिनी तथा च विशदा सरलतरला यामभिलक्ष्य ब्रह्मविद्यापरास्वपि उपनिषत्सु काव्यत्वविभ्रमो भवति।

पाणिन्युत्तरकाले लौकिकवाङ्मये धर्मशास्त्र–पुराणेतिहास–नाट्यशास्त्र–आयुर्वेद–संगीतशास्त्रादिभ्यः काव्यवाङ्मयेभ्यश्चातिरिक्तं प्रायः सर्वमपि साहित्यं गद्यमयमेव। तदेतास्वापि रचनाबिधासु गद्यसंश्लेषो निश्शेषतया नास्तीति न। तत्रापि गद्यवैदग्ध्यं विश्रब्धं विद्यत एव।

भारतीयदर्शनानां भाष्येषु टीकासु फक्किकासु विशिष्य मीमांसा–न्याय–वैशेषिक–वेदान्तादिषु गद्यप्रबन्धस्य यन्मनोरमं रूपं दृश्यते तत् काव्य–

रचयितृणामपि मार्गदर्शनं कुर्वद् वर्तत इति अतिरोहितं तद्विदाम्। तेषु श्रीमच्छङ्करभगवत्पादानां गद्यगुम्फनशैली कस्य वा सचेतसः मनस्सु अमन्द–मानन्दसन्दोहं नो जनयेत्? तदीयानवद्यगद्यधारामभिलक्ष्य षड्दर्शनपारावारैक–पारिणः श्रीवाचस्पतिमिश्राः *"भाष्यं प्रसन्नगम्भीरम्"* इति पदैः विशेषयन्ति। नूनमाचार्यस्य तादृक् अस्खलद्गतिकवाक्प्रवाहः सरस्वतीप्रसादमन्तरा न सुलभोद्भवः। अथवा वाग्देवी एव यत्सायुज्येन स्वाभिव्यक्तिं लभते का वा कथा तदीयवाक्प्रसरस्यास्खलद्गतिकस्य।।

गद्यरचनायाः सुसमृद्धरूपं कथासाहित्ये दृश्यते। कथासाहित्यस्य सामान्यतः रूपद्वयं दृश्यते लोके (१) बृहत्कथारूपम् (२) लघुकथारूपं चेति। अत्र बृहत्कथा इत्युक्ते गुणाढ्यविरचिता **बृहत्कथा** इति न ममाभिप्रेता; किन्तु उपन्यासापरपर्याया महाकथा इति। महाकथापरम्परासु गद्यसाहित्यस्याद्य–प्रवर्तकः महाकविः सुबन्धुरेवेति यद्यपि निश्चप्रचं विज्ञायते तथापि महाकवि–बाणभट्ट–विरचिता **कादम्बरी** गद्यरचनासु सर्वातिशायिनी अत्यद्भूतरचना वर्तत एव। **कादम्बरी**नाम्नः इयं प्रतिष्ठा यच्चिरात् दक्षिणदेशे उपन्याससामान्ये कादम्बरीति पदं प्रयुञ्जते जनाः। कादम्बर्यां यत्कलाकौशलं यत्प्रतिभावैभवं यच्च वाग्विलासं बाणभट्टेन प्रदर्शितं तदद्यापि सुदुर्लभमिति विपश्चितां विदितचरमेव। अतएव *"बाणोच्छिष्टं जगत्सर्वमिति"* भणितिः निष्प्रत्यूहा संजाता। संस्कृतज्ञानां कृते इदं तूत्साहप्रदं वर्तते यदचिरादेव दूरदर्शने कादम्बरीकथामाश्रित्य अनुस्यूततया धारावाहिनीरूपेण किञ्चिच्चित्रपटं प्रदर्शयिष्यते।

प्राचीनकथासाहित्यमाश्रित्य प्रवत्तायां विचारचर्च्चायां दण्डिनः स्मरणं विना अपराधकलुषीकृतं स्यान्नो चेतः। यतः *"कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः"* इत्युक्तिः लोकप्रसिद्धैव। तदीयं **दशकुमारचरितम्** इति काव्यं दशानां राजकुमाराणां साहसिकयात्रा कथा (Advanturous Story) वर्तते। मन्ये इदमेव प्रप्रथमं साहसिकयात्राकथापरं गद्यकाव्यं संस्कृतनिबद्धं वर्तते।

अद्यत्वे यद्यपि नैकविधाः कथाः संस्कृतसहित्यमलंकुर्वन्ति तथापि तत्र साहसिकयात्राकथानामभावः परिलक्ष्यते। प्राचीने काले तु दण्डकारण्यगमनं, विन्ध्याटवीषु पर्यटनं वा रोमाञ्चकारिणी आसीत्, तादृशी यात्राकथा साहसिकयात्राकथास्वन्तर्भवति स्म। अद्यत्वे तु प्रतिस्रोतसि गिरिनदीमार्गेण नौयात्रा, हिमाच्छादितम् अत्युच्चं हिमवच्छिखरं प्रति गमनं, महास्फोटक(Big-Baloon)द्वारा वायुमार्गेण विश्वभ्रमणं साहसिकयात्राकथास्वन्तर्भवन्ति। अथवा अत्युच्चपर्वतकन्दरासु शिखरेषु कारगिल–तुल्य–सैन्यावासेसु युद्धकाले आपद्ग्रस्तरक्षिबलसहायार्थं वा गमनं रोमाञ्चकरं साहसिककथानकं स्यात्। नाहं जाने तादृश्यः कथाः संस्कृते विरच्यन्ते न वा।

आस्तां तावत्, संस्कृतसाहित्यस्य अलङ्करणं तावदस्ति लघुकथा–साहित्यम्; यदाबाल–वृद्ध–वनीतानां विद्वद्धुरिणानां च शास्त्रसंस्कृतमतीनां मनः प्रमोदोद्यानमिव व्यामोहयति। संस्कृतसाहित्ये तत्प्रभूतमुपलभ्यते। तत्र **पञ्चतन्त्रम्, हितोपदेशः, वेतालपञ्चविंशतिः** इत्यादयः कथाग्रन्थाः बाल–कथात्वेन विश्वकथासाहित्ये अनन्यस्थानम् अधितिष्ठन्ति। वस्तुतः 'बालकथा' इत्युक्ते न तावद्बालानां कृते बालैर्वा विरचिताः कथाः; किन्तु ताः सर्वा अपि कथाः बालकथापदेन संगीर्यन्ते याः कथाः तर्ककर्कशमतीनामपि प्रौढानां विद्वद्धौरेयाणां मनस्सु बालसुलभं सुकोमलं स्वाभाविकं सरलसरसं भावं जनयितुं समर्थाः भवन्ति। अतएव बालकथारचयितारः लोके महीयन्ते इति मन्मतिः। कथा हि जनस्याभिनवा वधूरिव सर्वेषां मनांसि प्रीणयति इति कविसम्प्रदायः। तत्र कथारसं निपीय बुधाः सुधामपि नाद्रीयन्ते इति प्रथापि लोकविश्रुता एव। कथासाहित्यपठनमात्रेण हृदयं प्रसन्नगम्भीरं सुविशदं च भवति। सार्वकालिकसुखानुभूत्या चेतसि काचिद् अनितरसाधारणी प्रीतिः समुन्मिषति। सरसं कथां पठन् जनः निरुद्विग्नमनस्कः सन् कमपि स्वप्नलोकं प्रतस्थे तत्र च चिरम् अमन्दमानन्दमनुभवति।

अद्यत्वे तु इतरासु भाषासु केचन दुर्वृत्तपराणां उन्मार्गगामिनां दुर्धर्षकारिणां रोमहर्षपराणि चेतोदुर्मर्शकारिणि वृत्तजातान्यवलम्ब्य कथाः विरचयन्ति, यत्पठनमात्रेण जनः दुःखपङ्कनिमग्नो भवति। चेतांसि तु उद्वेलितानि भवन्ति। अपि काव्यस्येदं स्वरूपं तन्मार्गदर्शनां महर्षिणाम् अभिप्रेतम् इति प्रश्नोऽपि विचारणीयः एव। तत्र काव्यस्वरूपं *"शिवेतरक्षतये सद्यः परनिवृत्तये"* भवति ननु? काऽत्र परनिवृत्तिः ? ?

इतरभाषानुसरणपरायणाः केचन संस्कृतभाषायामपि तथाविधाः कथाः विरचयन्ति याः मन उद्वेजनकारिण्यः भवन्ति। भाषा–साहित्य–दृष्ट्या अयं नवोपक्रमः अभिनन्दनीयः स्यादपि, किन्तु तत्र कविमर्यादायाः लोकमर्यादायाश्च उल्लङ्घनं यथा न स्यात् तथा दृष्टिर्देया।

गतेषु पञ्चसु वर्षेषु आधुनिकसंस्कृतसाहित्यमधिकृत्य प्रवृत्तासु शोधसंगोष्ठीषु शोधसमीक्षापरासु **सागरिका-दृक्**–इत्यादिपत्रिकासु अद्यतन–रचनाप्रवृत्तेः भृशं प्रशंसापरं वचनं चकास्ति। किन्तु तत्र ये क्षीरनीरविवेकपटवः समीक्ष्यकाः गोविन्दचन्द्रपाण्डेय–कमलेशदत्तत्रिपाठि–अभिराजराजेन्द्रमिश्र–राधा–वल्लभत्रिपाठि–कलानाथशास्त्रि–वेम्पटीकुटुम्बशास्त्रि–रेवाप्रसादद्विवदिसदृशाः महान्तः विद्वांसः सावधानपरं वचनमपि निर्भरं निर्विवादशब्दैरुज्जृम्भितं प्रकाशयन्तः शिष्टजनानुसृतं प्रशस्तं मार्गमादिशन्ति। अतः समकालिकरचनाधर्मिभिः सावहितैर्भाव्यमिति वयं विभावयामः।

****

संस्कृतभाषा यथा सर्वासामार्यभाषाणां जननी संस्कृतसाहित्यमपि सर्वभारतीयसाहित्यानाम् उद्गमस्थानम् मार्गदर्शकञ्चैति निश्चप्रचम्। किन्तु इदमप्यद्य विचारणीयं वर्तते यदद्यत्वे इतरभाषासाहित्यस्य तुल्यकक्ष्यं साहित्यं संस्कृतभाषायां निर्मीयते न वेति। अद्यतनसंस्कृतसाहित्यं यद्यपि साहित्यजगति स्पृहणीयं पदमध्यास्ते तथापि सर्वतोदृष्ट्या विचार्यमाणे तदिदं साहित्यं तां काष्ठाम् अधिगन्तुं प्रयतत इवाभाति। केचन विमर्शकास्तु इदं पृच्छन्तः सन्ति यत् –

अद्यापि संस्कृतसाहित्यं किमिति भारतीयज्ञानपीठपुरस्कारेण न सभाजितम् ? नोवेल्–साहित्य–पुरस्कृतिकथा तु दुरापेता।

अपि "नैष स्थाणोरपराधः यदेनमन्धो न पश्यति" इति यास्कीयामुक्तिम् अनुसृत्य आत्मतृप्तिमनुभवामो वयम्? उत "स्थाणुरयं भारहारः किलाभूत्" इति पातञ्जलं वचनमनुस्मृत्वा आत्मसमीक्षणं कार्यमस्माभिरित्यपि विचारणीयम्!

तदत्र केचन अन्येऽपि प्रश्नाः समुन्मिषन्ति मनसि; तानपि भवतां पुरस्तात् उपस्थापयितुमनुज्ञां याचे। ते सन्ति –

अपि अस्त्यद्य कश्चिद् अभिनव–विष्णुशर्मा यदीया रचना सार्वकालिकी कालतिषाह्या च स्यात् ?

अपि अस्ति कश्चित् काचिद् वा हरिकुम्भकार (Harry Potter) इव चरित्रनिर्माता, संस्कृते येन चरित्रेण, विश्वमनःसम्मोहितं स्यात्, स्याच्च आबालेभ्यः आ च देवर्षितुल्य–विद्वत्तल्लजेभ्यः तन्मनोविनोदाधायकम्?

अपि शक्यमस्माभिः याथातथ्येन निर्णेतुम् "Englishmen of letters" इव "संस्कृत–रचनाधर्मिणिः" इति मानं प्रतिष्ठापयितुम्।

एवं सन्ति नैके प्रश्नाः यदर्थमियम् अभिरूपभूयिष्ठा परिषद् अलं विवेचयितुं मार्गमादेष्टुं च।

तदत्र अस्माकम् विभागस्य आचार्याणां राधावल्लभत्रिपाठीनाम् अनुपस्थितावपि अस्माकं प्रार्थनामङ्गीकृत्य विद्वद्वरेण्याः अस्मद्गुरुचरणाः आचार्याः कुटुम्बशास्त्रिणः आदरास्पदाः अद्यतनकविसम्प्रदायेषु कनिष्ठिका–धिष्ठिताः आचार्याः अभिराजराजेन्द्रमिश्रवर्याः, काव्य–नाट्य–तन्त्र–साहित्येषु अनेन्यकेसरिणः आचार्याः उन्नीवर्याः; आर्यावर्तेषु आर्याच्छन्दसाम् अत्याश्चर्य–विधया पुनः प्रतिष्ठापकाः आचार्यधौरेयाः जगन्नाथपाठकवर्याः नैकेभ्यः प्रदेशेभ्यः समागताः विद्वतल्लजाश्च अस्माकं मार्गदर्शनाय समुपस्थिता इति महत्सौभाग्यम् अस्माकम्। अतः सर्वेभ्यः कृतज्ञताततिं वितीर्य विरमामीति शम्।

****

आधुनिकसंस्कृतगद्यसाहित्यम् - 1

अभिराजराजेन्द्रमिश्रः

(7/8-9-2003 दिनाङ्कयोः अस्मद्विभागेऽनुष्ठितायां **आधुनिकसंस्कृतगद्यसाहित्यम्** इति शोध-संगोष्ठ्यामुद्घाटनभाषणम्। ध्वनिमुद्रितस्योद्बोधनस्य सम्पादितांशोऽत्र प्रकाश्यते)

परमादरणीय! अस्य विश्वविद्यालयस्य कुलपतिमहाभाग!, अस्माकम् अग्रजवर्य प्रो. उन्नी महाभाग!, अन्योऽपि अग्रजवर्य संस्कृत विद्यायाः मानकभूत अथ च विविधैः पुरस्कारैः अलंकृत आचार्यप्रवर डॉ.पाठक महाभाग! दिल्लीस्थ राष्ट्रियसंस्कृत-संस्थान इति विश्वविद्यालयस्य प्रथमकुलपतिरूपेण विराजमानः अस्माकं बन्धुरत्नभूत प्रो. कुटुम्बशास्त्रि महाभाग!, सागर-विश्वविद्यालय-संस्कृतविभागे इदानीम् आध्यक्षं निर्वहन्त्यः डॉ.कुसुमभूरिया-महाभागाः! राष्ट्रस्य विविधेभ्यः भागेभ्यः समागताः मम अत्यन्तमेव पूर्वपरिचिताः स्निग्धाः सुहृद्वर्याः, विद्यार्थिनश्च, अद्य अस्मिन् पवित्रे अवसरे, सर्वप्रथमं सागररत्नभूतं स्वकीयं मित्रवर्य राधावल्लभ-त्रिपाठी महाभागं स्मरामि। यतोहि इदानीं यावत् एकोऽपि एतादृश अवसरः मया न स्मर्यते, यस्मिन् अवसरे राधावल्लभत्रिपाठी महाभागः अत्र नो भवेत्, परन्तु इदानीम् असौ विराजते थाईलाण्डदेशे बैंकक्नगर्याम्। अस्माकं सर्वेसां कृते इदं सौभाग्यसूचकमिव। परन्तु तदनुपस्थितावपि अस्मिन् विभागे पूर्ववत् साहित्यिककार्यक्रमाः इदानीमपि प्रचाल्यन्ते। बन्धवः! अस्मिन् विश्वविद्यालये समागत्य कश्चित् अपूर्व एव आनन्दः, आह्लादः अस्माभिरनुभूयते। यतो हि सागरे समागते सति अस्माकं प्रागूढभावः स्वयमेव तावत् क्वचित् विलीयते। अत्रागत्य एतादृशी भावना मनसि संजायते यत् स्वकीये कुटुम्बे एव वयं सर्वेऽपि समागताः स्मः, तादृशं किंचित् सौजन्यम् अत्र वर्तते। तादृशं किंचित् आत्मीयत्वम् अत्र वर्तते। सैव भावना इदानीम् अनुभूयते।

बन्धवः! संस्कृतगद्यस्य यादृशं ऐतिह्यं उपलभ्यते, तद्विषये भवन्तः सर्वे जानन्ति। यद् गद्यं प्रारम्भे समवलोक्यते, यजुर्वेदे यद्गद्यं विकसितं समवलोक्यते, केषुचित् पुराणेषु यच्च गद्यं उपबृंहितं समवलोक्यते। अभिजातसंस्कृतग्रन्थेषु गद्यस्य महान् इतिहासः परिलक्षते। यद्यपि केषांचित् गुणानाम् अनुरोधवशात् पद्यस्य स्थानं गद्यापेक्षया किंचित् महत्तरं प्रतीयते, तथापि यदि

गहनसमीक्षा क्रीयते चेत् तर्हि गद्यस्य ये सद्गुणाः वर्तन्ते ते सद्गुणाः स्वयमेव स्फारीभवन्ति।

सर्वप्रथमम् अहम् इदमेव विचारयामि, कस्मात् कारणात् पद्यं पद्यमिति, गद्यं गद्यमिति उच्यते। यथा मया पठितं क्वचित्, अत्र वैयाकरणाः वर्तन्ते अस्माकं भगिन्यः डॉ. पुष्पादीक्षितमहोदयाः, तासां कीदृशः विचारो वर्तते एतेषां शब्दानां व्याख्याविषये तदहं न जानामि, परन्तु यादृशी व्याख्या मह्यं रोचते, तां व्याख्याम् अत्र प्रस्तौमि। पद्यते पदैः नियम्यते इति पद्यम्। गद्यते इति गद्यम्। या रचना पदैः चरणैः नियम्यते सा तावत् पद्यम् इति उच्यते। परन्तु या रचना केवलं गद्यते, केवलम् उच्यते, नियमान् उपेक्ष्य, सर्वतन्त्रस्वतन्त्ररीत्या यत् किंचिदपि समुच्यते तद् भवति गद्यम्। अनेन प्रकारेण गद्यपद्यशब्दौ स्वव्याख्याप्रसंगेनैव आत्मानं तावत् प्रकटयतः। पद्ये यत्किंचिदपि सौन्दर्यं भवति तस्य सौन्दर्यस्य मूलं कारणं भवति, तत्र स्थिताः नियमाः। भवन्तः सर्वे जानन्ति, यतो कस्मिंश्चित् पद्ये चरणचतुष्टयं भवति अथच प्रत्येकचरणे अक्षराणां लघुगुरुविधानं तावत् सुरक्षितं भवति। सुनिश्चितं भवति। अनेन प्रकारेण पद्यस्य निसर्गबन्धे गृहीते सति स्वाभाविकं किंचित् सौन्दर्यं स्वतः एव जायते। यदि कश्चित् जनः छन्दःशास्त्रोक्तान् पद्यनिर्माणस्य नियमान् न जानाति अथच जन्मजन्मान्तरानुगत् काव्यप्रतिभाबलेन पद्यनिर्मातुं प्रभवति तर्हि महत् सौकर्यं जायते। अस्माद् एव कारणात् पद्यनिर्माणे सौकर्यं भवति।

पद्यनिर्माणे अभिव्यक्तिरपि सहसा भवति। अथच पद्यनिर्माणे कृते सति बहुनि साहित्यिकसौन्दर्याणि स्वत एव जायन्ते। परन्तु गद्यनिर्माणे वर्तते किंचित् काठिन्यम्। यतो हि गद्यस्य निर्माणे एते साहायभूताः नियमाः न भवन्ति। गद–व्यक्तायां वाचि इति वर्तते। सर्वतन्त्रस्वतन्त्ररीत्या नियमान् उपेक्ष्य यत्किंचिदपि कथ्यते, उच्यते तद् भवति गद्यम्। अतएव गद्यमाध्यमेन गद्यं समाश्रित्य यत्किंचित् अपि समुच्यते साहित्यकारेण। तर्हि काठिन्यं तु भवति एव, अस्मात् एव कारणात् मन्ये, इदं उक्तः यत् गद्यं कवीनां निकषं वदन्ति। गद्यं भवति कवीनां कृते निकषभूतम्। यत् गद्यं समाश्रित्य तादृशी कीर्तिः अवाप्तुं न शक्यते। यादृशीकीर्तिः पद्यसमाश्रयणेन स्वतः एव तावत् सम्भवति। अस्मादेव कारणात् एतादृशी उक्तिः प्रचलिता। यतः महाकविर्बाणभट्टः गद्यं प्रणीय तादृशम् एव दुष्करं यशः लभे, यादृशं यशः कविकालिदासः प्राप्तवान् पद्याश्रयण। तेनैव तावत् महाकविबाणभट्टस्य गद्यसमाश्रयेण चातुर्यं तावत् ध्वन्यते।

अनेन प्रकारेण प्राचीनकालादेव काचित् प्रतियोगिता परिलक्षते गद्यपद्ययोर्मध्ये। परन्तु काले व्यतीते सति एतादृशः विचारः क्वचित् प्रलीनः। आगामिनि युगे वयं सर्वेऽपि पश्यामः यत् संस्कृतसाहित्ये यथा पद्यानां रचना जाता तेनैव प्रकारेण गद्यानामपि तावत्, गद्यवन्धानामपि भूयिष्ठेन रचना जाता। अथच प्राचीनकालिके गद्ये प्रायेण कवयः गृहीतनिजदक्षाः दृश्यन्ते। सर्वेषां कवीनां स्वकीयः कश्चित् विशिष्टः गद्यादर्शः परिलक्ष्यते। विशेषेण यो बाणभट्टानां, तेषां तु स्वकीयाः आदर्शाः वर्तन्ते। भवन्तः जानन्ति, यत् प्रतिपदं श्लेषप्रपञ्चस्य इति एतादृशम् आदर्शं मन्वानः महाकविः सुबन्धुः स्वकीयं गद्यादर्शं प्रस्तौति, य आदर्श आसीत् तस्य गद्यस्य, स एव आदर्शः परिलक्ष्यते, अपि तस्य ग्रन्थे। तदनन्तरं संजातः महाकविर्दण्डिः, तस्य आदर्शः किंचित् भिन्नः एव प्रतीयते। सः कथयति यत् – "ओजः समासभूयस्त्वं एतद् गद्यस्य जीवितम्"। एतत् भवेति – ओजः ओजोगुणः, समासभूयस्त्वम्। अर्थात् समस्तपदानां प्रचुरता। अयं गद्यादर्शः दशकुमारचरिते पदे पदे संलक्ष्यते। प्रतिपरिच्छेदं संलक्ष्यते तदीयं वैदग्ध्यम्। एतदनन्तरं समायाति महाकविर्बाणभट्टः। सः खलु समन्वयवादी परिलक्षते। यतो हि यादृशः गद्यादर्शः तेन स्वीकृतः तस्य गद्यादर्शे दण्डी–सुबन्धोर्समन्वयः परिलक्षते। यदि भवद्भिः सर्वैः पठितं स्यात् तर्हि इदं सर्वथा सुस्पष्टं जायते। यत् स्वकीये हर्षचरितनाम्नि ग्रन्थे, प्रारम्भ एव भूमिकायाम् महाकविर्बाणभट्टः स्वकीयं गद्यादर्शं निश्चिनोति। केन प्रकारेण –

नवोऽर्थजातिरग्राम्या श्लेषाक्लिष्टस्फुटः रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्, ।।

एते सर्वेऽपि गुणाः प्रायेण अतिकाठिन्येन पुंजीभुताः भवन्ति। के गुणाः वर्तन्ते गद्यस्य। महाकविर्बाणभट्टः कथयति **नवोऽर्थः** अर्थात्, अभिप्रायाणां नवीनता। यदि गद्ये पीष्टपेषणं समवलेक्यते पूर्वतनकथानाम् अनुसरणं संदृश्यते तर्हि तादृशं गद्यं तावत् प्रशस्तं न भवति। अतएव गद्यस्य प्रथमविशेषता इयमेव, यत् गद्ये अभिप्रायाणां नवीनतां स्यात्। नूतनता स्यात्। कश्चित् नूतनः अर्थः कल्पितः भवेत्। अस्य आदर्शस्य कीदृशं परिपालनं बाणभट्टः करोति भवन्तः सर्वे जानन्ति यत्तस्य कादम्बर्यां पदे पदे नूतनः अभिप्रायः परिलक्षते। अलंकारमाध्यमेन पुराणमाध्यमेन, स्वकल्पनामाध्यमने, वर्णनकौशलमाध्यमेन, यदि काश्चन युवत्यः

महाराजं शुद्धकं स्नापयन्ति, तर्हि केन प्रकारेण स्नापयन्ति। तद्वर्णनमेव तावत् अभिव्यनक्ति, तदीयकौशलम्, यदभिप्रायाणाम् इदृशी नवीनता वर्तते कादम्वर्याम्। पदे पदे नावीन्यं परिलक्षते। **नवोऽर्थजातिरग्राम्या** अर्थात् अग्राम्यपदसंहतिः स्यात्। यानि पदानि प्रयुज्यन्ते तानि पद्यानि अग्राम्याणि स्युः। दोषविरहितानि स्युः। एतादृशः कश्चित् आदर्शः आसीत्। नवोऽर्थजातिरग्राम्या **श्लेषाक्लिष्टः**, श्लेषासंश्लेषस्य पक्षधरः दण्डीरपि आसीत्। परन्तु बाणभट्टः कोमलं श्लेषम् आकांक्षते। न तावत् कठिनं श्लेषम्। यतो हि कठिनः श्लेषालंकारः दुर्गमः, श्लेषालंकारः दूरारोहः। श्लेषालंकारः उद्वेगं जनयति पाठकेषु। अतएव तादृक्गुण-विशिष्टस्य श्लेषस्य पक्षधरः नासीत् सः। तर्हि केन प्रकारेण असौ सरलीक्रीयते। अस्या अपि समाधानं वर्तते बाणभट्टपार्श्वे। यतो हि बाणभट्टः कथमपि केवलं श्लेषं न प्रयुंक्ते। यत्र कुत्रापि श्लेषालंकारं न प्रयुङ्क्ते। तत्र श्लिष्टोपमा माध्यमेन प्रयुङ्क्ते। यतो हि उपमायाः संसर्गेण श्लेषालंकारस्य काठिन्यं न्युनीभवति। सर्वत्रापि कादम्बर्यां श्लेषोपमालंकारस्य प्रयोगो विद्यते। केवलं श्लेषस्य प्रयोगे क्वाचित्करीत्या तादात्म्यं चरित्वा एव संग्रहिष्यते। अन्यथा कठिनश्लेषस्य प्रयोगः कादम्बर्या क्वचिदपि न दृश्यते। तत्र द्वौ पक्षौ – उपमानपक्षः, उपमेयपक्षः। अथच तुलनामाध्यमेन तस्य श्लेषालंकारस्य काठिन्यम् अपि तावत् सारल्यं वृणोति।

एतादृशं किंचित् कौशलम् आसीत् महाकविबाणभट्टस्य। **श्लेषाक्लिष्टैः स्फुटो रसः** – अस्मिन् विषये न तावत् किंचित् वक्तव्यम्। यतो हि कादम्बर्यां पदे पदे रसनां प्रयोगाः वर्तन्ते। ते च रसाः कथं स्फुटः भवति सर्वेऽपि जानन्ति। क्वचिदपि तावत् कश्चित् संदेहो न वर्तते किंचित् काठिन्यमपि न वर्तते। यत्र यः रसः प्रयुक्तः तस्मिन् रसे वयं सर्वेऽपि मज्जामः। श्लेषाक्लिष्टो स्फुटो रसः। अन्ते च असौ कथयति यत् **विकटाक्षरबन्धश्च**। अक्षरबन्धः, अर्थात् पदबन्धः। अक्षरबन्धेन न तावत् किंचित्सम्भवति। अक्षराणि यावत् पदरूपताम् उपयान्ति तेनैव कश्चित् ग्रन्थः निर्मीयते। अतएव पदबन्धोऽपि सर्वथा निर्दुष्टः भवेत्, विकटाक्षरबन्धः सर्वथा निर्दोषः भवेत् इति एतादृशः कश्चित् महान् गद्यादर्शः महाकविर्बाणभट्टः तादृशीम् अनुपलभ्यकीर्तिं प्राप्तवान्। यादृशीं कीर्तिं कविकुलगुरुः कालिदासः स्वकीयैः काव्यबन्धैः प्राप्तवान्। अस्मात् एव कारणात् समुच्यते समीक्षा जगति यद् –**"बाणोच्छिष्टं जगत् सर्वम्"**। बाणोच्छिष्टं जगत् सर्वं कस्मात्

कारणात् ? यतो हि बाणभट्टः तादृशं निर्बन्धः "challange" इति आंग्लभाषायम्, समाश्रित्य तादृशं निर्बन्धम् अंगीकृत्य स्वकीय-काव्यरचनां कृतवान्। अथ च तादृशं यशः प्राप्तवान्। अस्मादेव कारणात्। तदुच्छिष्टं जगत् मन्यते।

बन्धवः! एतत् आसीत् किंचित् गद्यकाव्यस्य विषये। परन्तु शनैः शनैः वयं पश्यामः यत् गद्यरचनायामपि नूतनानि परिवर्तनानि जातानि। इदानीं वयं सर्वेऽपि अधुनातनगद्यविषये विचारयितुम् अत्र प्रवृत्ताः स्मः। अधुनातनशब्दः एव सर्वप्रथमं व्याख्येयः प्रतिभाति। यतो हि अस्मिन् विषये साम्प्रतिकाः ये समीक्षाकाराः वर्तन्ते, कलिकतानगर्यां समायोजीत एकस्मिन् समारोहे रत्नाबसुमहाभागाः, या खलु इदानीं तत्र विभागे Professor पदं अलंकरोति, सा खलु modern इति इमं शब्दम् अधिकृत्य, भूयसीं व्याख्यां कृतवती। अथ इदानीम् अयं विचारणीयः शब्दः प्रतिभाति। अधुनातनशब्दः अर्वाचीनशब्दः modern शब्दः कस्य विशेषणभूतः? युगस्य विशेषणभूतः? यद्वा साहित्यविशेषणभूतः? यद्वा साहित्येऽपि कस्यचित् विशिष्टस्य पक्षस्य विशेषणभूतः? यथा साहित्ये गद्यमपि वर्तते, पद्यमपि वर्तते, चम्पूसाहित्यमपि वर्तते। तर्हि अयम् अभिनवशब्दः, आधुनिकशब्दः, अर्वाचीनशब्दः कस्य तावत् विशेषणम्? कस्य तावत् विशेषणत्वेन स्वीक्रीयते? अयं प्रश्नः इदानीं महत्वपूर्णः प्रतिभाति। परन्तु यथा मया स्वकेषु अनेकेषु निबन्धेषु विषदीकृतः यत् आधुनिकशब्दः आर्वाचीनशब्दः मुख्यरूपेण कालखण्डस्य एव तावत् विशेषणभूतः प्रतीयते। यतोहि काल-परिवर्तनेन एव सर्वाणि अपि परिवर्तनानि सम्भवन्ति। कस्मिंश्चित् काले काव्यरचनायां प्रवृत्तिः अन्यादृशी आसीत्। अन्यस्मिन् कालखण्डे अन्यादृशी आसीत्। यथा भवन्तः हिन्दीभाषायां पश्यन्ति यत् कश्चित् कालः आसीत् वीरगाथाकालः। तस्मिन् काले यावन्ति अपि काव्यानि लिखितानि। तानि सर्वाणि अपि वीरगाथापराणि एव परिलक्ष्यन्ते। तदनन्तरमेव समायातः भक्तिकालः। तदनन्तरं समायातः रीतिकालः, तदनन्तरं समायातः तत्रापि आधुनिककालः। यस्मिन् काले यादृशी कापि प्रतिनिधिभूता रचना प्रणीता। तामेव रचनाम् अनुसृत्यः अन्या अपि रचनाः प्रणीताः दृश्यन्ते हिन्दी भाषायाम्। तादृशी एव काचित् प्रवृत्तिः संस्कृतभाषायां परिलक्ष्यते। कालपरिवर्तनेन साहित्यसंरचनापरिवर्तनपि अभिलक्ष्यते। अस्माद् एव

कारणात् मया इदमेव अंगीक्रियते यत् अर्वाचीनशब्दः काल-परिवर्तनस्य एव तावत् सूचकः परिलक्ष्यते।

यदि नाम अस्माभिः सर्वैः स्वीक्रियते यत् इदानीं कश्चित् अर्वाचीनकालखण्डः प्रचलितोऽस्ति। इदानीम् अर्वाचीनं साहित्यं लिख्यते, प्रणीयते, तर्हि अनेन एतद् दुःखं भवति यत् संस्कृत-रचनानाम् अवधौ किंचित् परिवर्तनं जायते। तार्हि कुतः तावत् प्रारभ्यते?

अयम् अधुनातनकालः कुतः प्रारभ्यते? किं पण्डितराजानन्तरं प्रवर्तते। यद्वा विश्वेश्वरपण्डितानन्तरं प्रवर्तते यद्वा अन्यस्मिन् कस्मिंश्चित् काले प्रवर्तते। कासौ तिथिः? यां तिथिम् अस्य परिर्वनस्य तिथिं वयं सर्वेऽपि स्वीकुर्मः? अयमपि प्रश्नः महत्वपूर्णः प्रतीयते। अन्ये सुहृद्वर्याः, अन्ये समीक्षकाः स्वमतानुसारं यत् किंचित् अपि स्वीकुर्वन्ति। परन्तु मया यथा चिन्त्यन्ते, यत्र ब्रीटिश्शासनकाले सर्वप्रथमं यदा चतुरशीत्यधिकसप्तदशशततम-खीष्टाब्दे यदा सर्वप्रथमं सर्विलियम्जोन्समहोदयेन कविकूलगुरु-कालिदासस्य अमरनाट्यकृतिः अभिज्ञानशाकुन्तलम्' आंग्लभाषया अनुदिता सैव तिथिः अस्माभिः सर्वैः परिवर्तनस्य तिथिः स्वीकरणीया। यतो हि ततः एव प्रारब्धा इयं संस्कृतभाषा या निरुद्धाः आसीत् पण्डितानां कुटरेषु संस्कृतज्ञानां बुद्धौ संस्कृतग्रन्थानां प्रचयेषु। येषु ग्रन्थेषु वयं प्रायेण त्रिप्रकारान् ग्रन्थान् पश्यामः, एके तु तादृशाः ग्रन्थाः वर्तन्ते येऽऽत्मकथापरा वर्तन्ते। विंशशताब्द्याः प्रारम्भे ये गद्यग्रन्थाः लिखिताः, ते प्रायेण आत्मकथापरा संदृश्यते। 'महाराजप्रतापस्य चरितम्', 'शिववीरस्य चरितम्', गान्धिनः तु पश्चात् संजाता। परन्तु, अनेनैव प्रकारेण ये खलु, अस्माकं पूर्वपुरुषा आसन् क्वचित् श्रीकृष्णस्य चरितम् क्वचित् पितामह-भीष्मस्य चरितम्। अनेन प्रकारेण चरितपरा ग्रन्थाः निबन्धाः संदृश्यते। अयं तु एकः प्रकारः गद्यग्रन्थानां। अथ च द्वितीयः प्रकारः वर्तते। अनुकरणात्मकग्रन्थानाम्, ये गद्यग्रन्थाः प्राचीनकाले निर्मिताः, तेषाम् आख्यायिकानां कथानां वा अनुकरणेन निर्मिताः, तादृशाः ग्रन्थाः अपि विंशशताब्द्यां निर्मिताः संदृश्यन्ते येषु ग्रन्थेषु अनेके उपन्यासाः सन्ति इति कथयितुं शक्यन्ते। यतोहि ते सर्वेऽपि कथायाः परिभाषाम् अनुरोध्य, यद्वा आख्यायिकायाः परिभाषामनुरोध्य प्रणीता वर्तन्ते। अनेन प्रकारेण एवं वक्तुं शक्यते – यत् ते ग्रन्थाः "कादम्बरीम्" अनुकुर्वन्ति। यद्वा 'हर्षचरितम्' अनुकुर्वन्ति। अनेन प्रकारेण पारम्परिकाः ग्रन्थाः

अपि तावत् लिखिताः। अयं द्वितीयप्रकारः तेषां ग्रन्थानाम्। परन्तु तृतीयप्रकारकाः ये गद्यग्रन्थाः लिखिताः ते तावत् अतिशयेन महत्वपूर्णाः प्रतीयन्ते। यतो हि येषु ग्रन्थेषु संदृश्यन्ते किंचित् नाविन्यम्। यतो हि तस्मिन् काले भारतीयसमाजः परिवर्तमानः आसीत्। आङ्गलशासने यादृशः संताप आसीत् समाजस्य यादृशी पीडा आसीत्, यादृशाः अत्याचाराः आसन्, सर्वत्रापि प्रसृताः तेषाम् अत्याचाराणां तासां पीडानां तासां व्यथाकथानामभिव्यक्तिः संदृश्यते। येषु ग्रन्थेषु, येषु गद्यकाव्येषु अनेन प्रकारेण वर्णिता ते गद्यग्रन्थाः संवेदनादृष्ट्या सर्वथा नूतनाः प्रतीयन्ते। अनेके एतादृशाः ग्रन्था संदृश्यन्ते, यथा **दुःखिनी बाला** इति। **वियोगिनी-बाला** इति एवंविधानेकानि नामानि वर्तन्ते। **दुःखिनी बाला** भट्टरमानाथशास्त्रिमहोदयः, पंचाधिकैकोनविंशतिशततमे खीष्टाब्दे दुःखिनीबाला इत्याख्यम् उपन्यासं प्रणीतवान्। अनेन प्रकारेण भट्टमथुरानाथशास्त्री **'आदर्शरमणी'** इति काचित् कथां लिखितवान्। अथ च श्रीबलभद्रशर्ममहोदयस्य **वियोगिनी बाला** इति तां परम्परामनुसरति। यदि केनचित् बालाम् अधिकृत्य, कंचित् ग्रन्थं लिखितवान्, तर्हि एका परम्परा तावत् प्रसृता जाता। यथा दुःखिनी बाला, तेनैव प्रकारेण वियोगिनी बाला। तेनैव प्रकारेण **संदिग्धा बाला**। एवंभूताः अनेके ग्रन्थाः तावत् एकस्यामेव परम्परायां सम्बद्धाः शृंखलिताः संदृश्यन्ते। अनेन प्रकारेण त्रिप्रकारकगद्यग्रन्थाः विंशशताब्द्याः प्रारम्भिकचरणे समवलोक्यन्ते। परन्तु संस्कृतगद्यकाव्यस्य जीवने सुमहत् विलक्षणं परिवर्तनं तदा संजातं, यदा राष्ट्रेण स्वाधीनता समवाप्ता।

वस्तुतः अस्य परिवर्तनस्य अभिज्ञाने स्वाधीनता संघर्षकाले एव संदृश्यते। तस्मिन् काले समुदिता आसन् अत्यन्तमेव विलक्षणाः गद्यकाराः अस्माकं राष्ट्रे। एकतः तु आसीत् पण्डिता क्षमारावमहोदया। अपरतस्तु जयपुरनगरे वर्तमाना आसन् महामहोपाध्यायः भट्टमथुरानाथशास्त्रिणः। एते तु नूतनकथाकाराः आसन्, नूतनोपन्यासकाराः आसन्। अतएवास्य बीजं तु स्वातन्त्र्यसंघर्षकाल एव समवलोक्यते। परन्तु तद्बीजम् अंकुरितं पल्लवितं जातं स्वाधीनतावरणान्तरम्। तदनन्तरम् प्रायेण गद्यवाङ्मये आमूलचुलपरिवर्तनं परिलक्ष्यते। यतोऽहि तस्मिन् काले याः गद्यरचनाः प्रणीताः वर्तन्ते, ताः सर्वाः न केवलं शिल्परीत्या, न केवलं संवेदनरीत्या, न केवलं लक्ष्यरीत्या, आमूलचूलं परिवर्तिताः

संलक्षन्ते। क्वचिद् अपि तावत् कादम्बर्याः अनुकरणं न अवलोक्यते, क्वचिदपि तावत् हर्षचरितस्य अनुकरणं नावलोक्यते। यतो हि सर्वतन्त्रस्वतन्त्रा आसन् इमे सर्वेऽपि गद्यकाराः। इमे सर्वेऽपि गद्यकाराः भारतस्य अन्यासु भाषासु प्रणीतान् तद्गुणविशिष्टान् ग्रन्थान् दर्शं दर्शं स्वरचनाः प्रणीतवन्तः। यादृश उपन्यासः मराठीभाषायां लिख्यते, यादृशः उपन्यासः गुर्जरभाषायां वर्तते, यादृशः उपन्यासः आङ्गल भाषायां वर्तते, यादृशः उपन्यासः गार्की महोदयेन, यादृशः लिखितः वोपसा महोदयेन यादृशः लिखितं जर्जवर्णडसा महोदयेन। एते सर्वेऽपि ग्रन्थकाराः प्रायेण आङ्लभाषाधीतिन आसन्। अस्मात् कारणात् भाषान्तर प्रतिच्छायाऽपि संस्कृतगद्यसाहित्यस्योपरि परिलक्षते। इदमेव तावत् वैशिष्ट्यम्।

क्वचित् इदं दूषणं भवेत्। भवितुं शक्यते वा। परन्तु अहं तावत् न तादृशीं दृष्टिं पोषयामि। परन्तु एतादृशी प्रवृत्तिः संस्कृतसाहित्यस्य वैशिष्ट्यानि अभिव्यनक्ति। तर्हि इदम् अस्माकं कौशलम्। यतोहि अस्माकं यत् किंचिदपि प्राचीनं विदग्धं वर्तते, पूर्वजनैः प्रत्तम् अस्माकं पार्श्वे वर्तते एव। परन्तु यानि कौशलानि अन्यदेशस्थानि वर्तन्ते, यदि तानि अपि कौशलानि स्वायत्तीक्रियन्ते अस्माभिः सर्वैः तर्हि न तावत् दूषणम् अपितु अस्माकं कृते इदं भूषणमेव। एतादृशी काचित् प्रशस्ता मम दृष्टिः वर्तते साहित्यक्षेत्रे। यतो हि अनेन संस्कृतसाहित्यस्य आयतिः परिलक्ष्यते, संस्कृतसाहित्यस्य विस्तारः परिलक्ष्यते। यदि अस्माकं पद्यकारैः स्वकीयेषु काव्येषु स्टाईमहोदयः नायकीकृतः मार्टिनलुथ्रकिंग महोदयः नायकीकृतः, कैनेटिक्महोदयः नायकीकृतः, आचार्य–देवप्रसादद्विवेदिनः न तद् दूषणम्, अपितु पोषणमेव, भूषणमेव। अनेन तावत् संस्कृतसाहित्यस्य वयं सर्वत्रापि प्रभवामः। न केवलं भारतीयकथावैशिष्ट्ये, न केवलं पुराणवृत्तानुकरणेऽपितु सर्वात्रापि वयं प्रभवाम। एवं हि स्वातन्त्र्योत्तरकाले यद्गद्यवाङ्मयं निर्मितं संदृश्यते तद् गद्यवाङ्मयं निश्चप्रचम् अस्माकं सर्वेषां कृते गौरवावहम्। तद्गद्यवाङ्मयं पठित्वा निश्चप्रचम् अस्माकं विचित्र एव परितोषः संजायते। अस्मिन् काले ये उपन्यासाः प्रणीताः, तेषु उपन्यासेषु तादृशं किंचित् विचित्रं वैशिष्ट्यं मुंशीप्रेमचन्द्रस्य उपन्यासेषु परिलक्ष्यते। यदि भवद्भिः सर्वैः के. के. श्रीनिवास–शास्त्रिणः उपन्यासाः पठिताः – **चन्द्रमहीपतिः** इति, **कृष्णतारा:** इति, तर्हि भवन्तः जानन्ति यत् प्रायेण असौ स्वकीयोपन्यासानां

नाम तादृशं तथा निश्चिनोति, यथा – **चन्द्रमहिपतिः**। अयम् एकः उपन्यासः, अश्र च **कृष्णतारा**, किं वा **नवपल्लवम्**।

अनेन प्रकारेण संज्ञाद्वयं तस्मै रोचते **सूर्यप्रभा** किं वा **वैभवपिशाचः**। विशिष्टं नाम विशिष्टाभिधानं तु वर्तते सूर्यप्रभा, परन्तु वैभवपिशाचः इति अनेन शब्देन इदमपि तावत् स्फारीकरोति उपन्यासकारः यत् अस्मिन् उपन्यासे किंदृशं चित्रणं वर्तते। अननैव प्रकारेण सर्वाम्युदयः इति तृतीयोपन्यासः। परन्तु अस्यापि नामान्तरं वर्तते। किं वा **सत्यं शिवम् सुन्दरम्** । अनेन प्रकारेण सर्वेऽपि उपन्यासाः के. के. श्रीनिवासशास्त्रिणः ये खलु प्रायेण विगतशताब्द्यां सप्तमे दशके प्रणीताः तेषु उपन्यासेसु तादृशं किंचित् वैशिष्ट्यं परिलक्ष्यते, यादृशं वैशिष्ट्यं हिन्दीभाषायां राचितेषु उपन्यासेषु परिलक्ष्यते। अनेन अस्य अयमभिप्रायः न ग्राह्यो यत् अस्मिन् काले केवलं नूतना एव उपन्यासाः प्रणीताः। कादम्बरीपरम्परा सर्वथा एव तावत् मुक्ता, नष्टा अस्माकम् आचार्यैः – ईदृशी कथा नास्ति। यतो हि अस्मिन् एव काले जगत्वकुलभूषणः **जयन्तिका** नाम्नि काचित् रचना प्रणयति। सा खलु जयन्तिका नाम्नी रचना सर्वथा कादम्बरीमनुसरति। तादृश एवानुच्छेदः, तादृश एव गद्यबन्धः पदे पदे श्लिष्टोपमायाः प्रयोगः। पदे पदे पौराणिकसंकेतः। जयन्तिकां पठेन् कोऽपि पाठकः निश्चप्रचं कादम्बरीम् अनुस्मरति। यतो हि तया एव शैल्या निर्मित अयं ग्रन्थः अष्टादशाधिकएकोनविंशशततमे खीष्टाब्दे प्रणीतम् आसीत्। परन्तु साहित्यअकादमीपुरस्कारः प्रायेण पंचाशत्वर्षानन्तरं प्रदत्तः आसीत्। एतं ग्रन्थमभिलक्ष्य अयमपि एव तावदपरो विचित्रः एव संयोगः, यत् रचनायाः पंचाशत्वर्षानन्तरम् इयं रचना प्रतिष्ठा जातः।

बन्धवः! अन्तें च इदमेव तावत् अहं कथयितुं प्रवृत्तोऽस्मि, यत् अयं खलु यः प्रत्यग्रकालः प्रवर्तते। विशेषेण एकविंशति–शताब्द्याः यः खलु प्रारम्भकालः इदानीं प्रवर्त्तते। इमं कालमासाद्य संस्कृतगद्यरचना स्वप्रसिद्धेः, स्वपरिपाकस्य शिखरम् इदानीम् अधिरोहति। यतोहि अस्मिन् काले प्रायेण गद्यरचनायाः यावन्तोऽपि प्राक्तनाः प्रकाराः आसन्, तेषां समेषां प्रकाराणामिदानीं पुनरावर्त्तनं परिदृश्यते। अस्माकं बन्धुरत्नभूतैः डॉ. राधावल्लभमहोदयैः इदानीमेव याः रचनाः गद्यमाध्यमेन प्रणीताः वर्त्तन्ते, ताः स्मारयन्ति पंचतन्त्रं, हितोपदेशं, शुकसप्तीम्। इदानीमेव प्रायेण

एकमासात्पूर्वमेव वैककनगरात् कांचित् नूतनां रचनां मत्पार्श्वे तैः प्रेषिता **अभिनवशुकसप्ततिः**। सा इदानीं प्रकाश्यते। यतो हि यदाहं कुलपतित्वेन वाराणसीम् आगतवान् तदा मया दृष्टं यत्, सर्वविधाः ग्रन्थाः तत्र सम्पूर्णानन्द संस्कृत विश्वविद्यालयतः प्रकाश्यन्ते, परन्तु, अर्वाचीनसंस्कृतसाहित्यसंबद्धग्रन्थानां काचित् प्रतिष्ठा तत्र न वर्तते। अत एव मया काचित् नूतना ग्रन्थमाला तत्र प्रतिष्ठापिता। आचार्यः वटुकनाथशास्त्रीखीष्टे–ग्रन्थमाला इति। तस्या ग्रन्थमालायाः प्रारम्भः यद्यपि मित्राणाम् अनुरोधवशात् मदीयेनैव केनचित् काव्येन जायते इदानीं मृगांकदूतमिति, परन्तु द्वितीयपुष्परूपेण इयम् **'अभिनवशुकसप्ततिः'** इदानीं प्रकाश्यते। इतः पूर्वमपि प्रो.त्रिपाठीमहोदयेन गद्यग्रन्थद्वयं प्रकाशितमासीत्। एकमासीत् **उपाख्यानमालिकेति**, अपरा रचनासीत् **विक्रमचरितम्** इति। तस्मिन् विक्रमचरिते अत्यन्तमेव संदिग्धं शीर्षकं वर्तते। शीर्षकं दृष्ट्वा एवं प्रतीयते यत् कस्यचित् विक्रमस्य अथवा विक्रमादितस्य चरितम् अत्र उपनिबन्धं स्यादिति। परन्तु तत्र "विक्रमे" नायको वर्तते कश्चित् सूकरः, तस्य सूकरस्य विक्रमः तस्य सूकरस्य चरितम् अत्र उपनिबद्धं भवति। अनेन श्लक्ष्णं तत्रैव निबद्धं वर्तते यत् पठित्वा अद्यतनकवेः प्रतिभायाः दर्शनं भवति। यद् अद्यतनाः कवयः अपि तावत्प्रतिभावन्तो वर्तन्ते यस्या प्रतिभायाः परिपाकः इदानीम् अपि तावत् सम्मुल्लसति, न केवलं सा प्राचीनकाले आसीत्।

अनेन प्रकारेण त्रिपाठीमहोदयः एव तिस्रः गद्यरचना इदानीं प्रस्तौति। अनेनैव प्रकारेणास्माकं वर्तमानपीठिकायां ये सुहृद्वर्याः वर्तन्ते, अत्रापि तावत् मध्येशालं निषण्णः वर्तते अस्माकं मित्रवर्यः अनुजभूतः डॉ. विश्वालमहोदयः। अस्य एषा रचना प्रकाशिता वर्तते – **"नीरवस्वनः"** नाम्नि। ताः कथाः पठित्वा संस्कृतगद्यस्य कौशलम्, संस्कृतगद्यस्य यौवनं लक्षयितुं शक्यते। प्रभुनाथद्विवेदी महोदयः **श्वेतपर्णां** प्रकाशयति। **श्वेतदूर्वां** प्रकाशयति। प्रशस्त–मिश्रशास्त्रिणः अनेके ग्रन्थाः वर्तन्ते गद्ये, अत एव नक्तं दिवम् इदानीं नूतनाः कथाः लिख्यन्ते। नूतनाः उपन्यासाः लिख्यन्ते। या अत्र वृत्तानि लिख्यन्ते। प्राचीनकाले षोडशशतके तु एकः एव ग्रन्थः अस्माभिः समवाप्यते, समरपुङ्गवदीक्षितविरचितः यात्राप्रबन्धः। परन्तु इदानीं न जाने कियन्ति यात्राग्रन्थाः समवाप्यन्ते। सर्वेषां संकलनमत्र वर्तते चेत् तर्हि यथाहं स्वीकरोमि यत् वर्तमानकालिकं गद्यं यौवने वर्तते। बार्धक्ये काले वर्तते इति कथयितुं तावत्

नोचितम्। परन्तु यौवने वर्तते। प्रौढयौवने वर्तते। इदानीन्तनं संस्कृतगद्यम्, इदानीन्तने संस्कृतगद्ये तादृशः सर्वोऽपि गद्यप्रकारः वर्तते यः गद्यप्रकारः अन्यासु भाषासु इदानीं प्रतिष्ठितोऽस्ति। अनेकेषां भाषान्तरोपन्यासानां रूपान्तरमपि इदानीं जातम्। अनेके एतादृशाः ग्रन्थाः भारतीयनाम्न्या संस्थया दिल्लीस्थया प्रकाशिताः वर्तन्ते। कन्नडभाषायां, तेलगुभाषायां गद्यग्रन्थानां रूपान्तराणि इदानीं प्रकाशितानि जायन्ते। एवंहि सर्वेऽपि इदानीन्तनाः सुहृद्वर्याः स्वाभिरूच्यनुसारं निरन्तरमेव स्वेषु स्वेषु कार्येषु संलग्ना वर्तन्ते। अहं तावत् अनुभवामि यदिदानीन्तनं गद्यं निश्चप्रचं देशान्तरगद्यैः सार्धमात्मानं तुलयितुं सर्वथा समर्थमस्ति। अथ च ये मूर्खाः एवं कथयन्ति तान् अपि तावत् प्रणामांजलिना अहं सभाजये। प्रायेण कथयन्ति यत्किंचितदपि बाणभट्टेन लिखितम्, इदानीं कः लिखितुं समर्थः? न। यत्किंचिदपि दण्डिना लिखितं, तदनन्तरं कः खलु लेखनीमुत्थापयितुं समर्थः? एवंविधा दुष्टाः विचाराः अपि तावत् प्रभवन्ति। परन्तु अहं सप्रणयं इदमेव तावत् कथयितुं प्रवृतोऽस्मि – स्वीकरोमि यत् बाणभट्टस्य कालेऽपि इदानीन्तनः कवयः क्व आसन्? बाणभट्टेन एव तावत् काचित् एवं विधा सरलां कथां कथं न प्रणीता? या कथा सर्वजनग्राह्या भवेत्। कादम्बर्या सर्वेषामनुरंजनं न सम्भवति, ये खलु पण्डितंमन्या, ये खलु तावत् शब्दधुरिणाः ये तावत् निरन्तरमेव स्वाध्यायसम्पन्नाः तान् एव कादम्बरी अनुरंजयितुं क्षमा वर्तते। परन्तु न तावत् सर्वसाधारणजनान्।यदि बाणभट्टस्य युगे अद्यतनं साहित्यं नासीत्, गद्यस्य तर्हि अद्यतन युगे बाणभट्टस्य कादम्बरी अपि तावदनपेक्षिता वर्तते। यतो हि साहित्यरचना युगापेक्षया एव जायते। यादृशी रचना, यादृशं साहित्यं रोचते समाजाय, पाठकेभ्यः, तादृशी एव रचना क्रियते। अन्यच्च एतदेव कथयित्वा विरामं लभे। एतदेव कथयितुं इच्छामि यत् इदानीन्तनं साहित्यकाराः गद्यकाराः पद्यकाराः वा तादृशं किंचित् प्रणयितुम् असमर्थाः सन्ति। अस्मात् कारणात् लिखन्ति इति न। इदानीमपि तादृशाः शक्तिमन्तः साहित्यकाराः वर्तन्ते। इदानीमपि अस्माकं मध्ये आचार्याः बच्चुलाल–अवस्थिनः वर्तन्ते, यत् तेषां शिखरिणीं कोऽपि शृणोति यवनकमन्तरात् तर्हि इदं निश्चयितुं सर्वथा असम्भवं स्यात् यदियं शिखरिणी आचार्यबच्चुलाल–अवस्थिनः वर्तते, यद्वा सौन्दर्यलहर्याः। यतो हि तादृशी एव काचित् गाढकरूणा तस्य

शिखरीण्यामिदानीमेव परिलक्ष्यते। अतएव तादृशीमेव शक्तिं, कामपि शक्तिं कश्चन विभर्ति इदानीम्। इदानींन्तनाः अस्माकं गुरुचरणाः अवस्थिमहोदयाः। अतएव शक्तिसाहित्यवशात् तादृशं साहित्यं न लिख्यते इति न तावत् मन्तव्यमस्माभिः सर्वैः। सा शक्तिः वर्तत एव। परन्तु तस्या शक्तेः इदानीम् आवश्यकता न वर्तते। यदि तस्याः, तादृश्याः शक्तेः प्रदर्शनं क्रियते यथाऽस्माकं मित्रवर्यैः भास्कराचार्यैः लघ्वक्षरैः, लघुमात्राभिः समग्रस्य काव्यस्य प्रदर्शनं कृतम्। मयाऽपि दुर्भाग्यवशात् कृतं तादृशमेव। तर्हि उपहास्यः एव संजातः। प्रायेण सर्वैः उपहसित यत् कीदृशोऽयं व्यर्थश्रमः। कस्मात्कारणात् एवं क्रियते। अनेन कारणेन बन्धवः! यादृशी रचना, यादृशं साहित्यं रोचते इदानीन्तनसमाजाय तादृशमेव वाङ्मयमस्माभिः सर्वैः विधातव्यम्। तावत् सुष्ठुतरं कविकर्मः भविष्यति। एतावत् उक्त्वा अहं विरमामि, भवतः सर्वान् प्रति कृतज्ञतां प्रकाशयामि।

****

आधुनिकसंस्कृतगद्यसाहित्यम् - २

वे. कुटुम्बशास्त्री

(**आधुनिकसंस्कृतगद्यसाहित्यम्** – इति (7/8-9-2003 दिनाङ्कयोः) अस्मद्विभागेऽनुष्ठितायां शोधसंगोष्ठ्यां विशिष्टातिथिरूपेणोद्घाटनभाषणम्। ध्वनिमुद्रितस्योद्बोधनस्य सम्पादितांशोऽत्र प्रकाश्यते)

परमसम्माननीयाः सभाध्यक्षाः विश्वविद्यालयस्यास्य कुलपतयः, प्रकृतशताब्दस्य कविकुलतिलकसमानाः सुहृद्वरेण्यः राजेन्द्रमिश्रमहांभागाः, श्रद्धेयाः कविमूर्धण्यः श्रीजगन्नाथपाठकमहाभागाः, विमर्शकाग्रेसराः नाट्य–शास्त्रीयं सर्वमपि तत्त्वमात्मसात्कृतवन्तः तत्रभवन्तः उन्नीमहाभागाः, संस्कृतविभागाध्यक्षाः, एवमत्रोपस्थिताः विद्वत्जनाः ! *'बुभुक्षितैः तु व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते'* इति वदन्ति। एवमेतदपि किंचित् अनुचितं समुत्पन्नम्। यतो हि असाधुकारी अच्युतानन्ददाशः, प्रथम राजेन्द्रमिश्रमहाभागानां व्याख्यानं विधाय, अनन्तरं मादृशं कमपि नियुङ्क्ते इत्युक्ते तर्हि किं वा अन्योऽपि वदामः। तथापि स्वनियोग अनुष्ठातव्यो भवति। सौभाग्यवशतः एतद्विभागस्य विभागाध्यक्षमहाभागाः एवं च अस्माकं मित्रमणिः अच्युतानन्ददाशः अन्ये च सुहृदः अत्र मामामन्त्रितवन्तः। अतः तेभ्य सर्वेभ्योऽपि आदौ मदीयं कार्तज्ञं विनिवेदयामि।

यस्मात् आधुनिकगद्यविषयिणी एषा गोष्ठीति आघोषणा कृता, तस्मात् मया गद्य साहित्यविषये प्रस्तावः कश्चनः कर्तुं शक्यते, प्राचीन गद्यविषये कश्चनप्रस्तावः कदाचित् अप्रासंगिको भवतिति भीया मया, तत्र व्यवसायः न कृतः। तथापि प्राचीनम् अभिनिबन्धं सर्वथा सम्बद्धमेव न भवति इति न, अभिनवं सर्वमपि प्राचीनं प्रतीकतया स्वीकरोति एव। यतोहि आधारशीलां विना भवनस्य निर्माणं न भवति, नैव संम्भवति, एवमेव प्राचीनगद्यच्छाया–माश्रित्यैव नूतनगद्यलेखनप्रकाराः सम्पद्यन्ते। यतोहि अहं स्मरामि यदि गद्यस्य आदर्श इति वक्तव्यम्, तर्हि एतद् वक्तव्यम् – *"महामना अनुचानमानी स्तब्ध एयाय"* इति छान्दग्योपनिषद् वदति, तदनन्तरं पिता पृच्छति – *"यन्नु सोम्येदं महामना अनुचानमानी स्तब्धोऽस्युत तमादेशमप्राक्षः ... ... येनाश्रुतं श्रुतं भवति"* – कियत् सहजमेतद् वाक्यं वर्तते। बालकः यदा गुरुकुलात् *'स्तब्ध एयाय'* – उपनिषद्गद्यमेतत्'। आर्षं गद्यमेतत्, अपौरुषेयं गद्यमेतत्। तत्र रामणीयकता कियती वर्तते। नाटकीयता कियत् वर्तते। अस्माकमक्ष्णोः पुरस्तात् श्वेतकेतोः विम्बं चक्षुःशात् कृतमिव वयमनुभवामः। *'अनुचानमानी स्तब्ध एयाय'* – झटिति पिता पृच्छति *'तमादेशमप्राक्षः?'*

"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति। कथं नु भगव स आदेशो भवतीति। यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्मणं विकारो नामधेयम्'। अपिवा तत्रैव सः वदति मम गुरवः अपि न जानन्ति, अत्र एव मां न अपाठयन् इत्यपि कथयति, इतोऽपि किं हास्यम् अपेक्षितं कथंचित् कथा रचने? औपनिषत् कथा वर्तते एषा। यथा खलु एतत्कालीनः कश्चनः छात्रः प्रत्युत्तरं दद्यात् – मम गुरवः एतन्न मां पाठितवन्त इति। एवमेव श्रूयते – कश्चन वदति मम गुरवोऽपि न जानन्ति। परन्तु तस्य कथनस्य अन्यः अभिप्रायः यत् यदि ते अज्ञासिष्यन्, तर्हि मां अवश्यम् अबोधयिष्यन्। मां न बोधितवन्तः, तस्मात् ते न जानन्ति इति अनुमितिं करोति। एवमस्माकमुपनिषत्सु नैकाः कथाः सन्ति। प्रवाहण– जाबालेः वर्णनं भवतु। अथवा *'शिवं चतुर्थं मन्यन्ते'* इति माण्डुक्योपनिषदि गद्यं किं केनापि कालेन, केनापि ग्रन्थकर्त्रा अतिशयितुं शक्यते वा? माण्डुक्यगद्यं केवलं करग्रहं चतुष्टयं वर्तते। उपनिषत्सु सर्वासु अपि मुर्धन्यभूता एव माण्डुक्योपनिषद्। एवं कथयन्ति केवलमेकपृष्ठं पठनीयम्, या च स्थायीनि तस्या स्थितिः। अजरामरा तस्या स्थितिः शाश्वतिकी अस्ति सा प्रेरणा। ततः संजायते गद्यप्रवाहः। ततः, तादृशात् कालाद् आरभ्य अस्माकं गद्यरचना प्रवाहः निरन्तरं प्रवहमानं वर्तते। यथा खलु अस्माकं श्रद्धेयैः राजेन्द्रमिश्रमहाभागैः सुनिपुणं व्याख्यातम्। अद्य तु तादृशी रचनाप्रसंगः वरीवर्तीति महान् संन्तोषः। मम तु एकमेव चिन्तनमस्ति – संस्कृते ममानुभवः एषः, यदि दोषः अस्ति क्षन्तव्यः, मामपि आन्तर्मनोविमर्शनेन एतत् कथयामि, न तु अहमन्यान् विमृशामि। परन्तु मामपि अन्तर्भावमवगन्तव्यम्। ममापि अस्ति अन्तर्भावः। संस्कृतक्षेत्रे नूनं सन्ति ग्रन्थकर्तारः, ग्रन्थलेखकाः, परन्तु न सन्ति ग्रन्थवाचकाः, ग्रन्थपठितारः। इदमेतत्तु दौर्गत्यं वर्तते संस्कृतजगतः। तादृशं विशिष्टं दौर्गत्यं, दुस्थितिः भाषान्तरेषु नास्ति, कश्चित् लिखति चेत् ... ... Harry Potter इति लिखितमुद्धृतं मम मित्रेण अच्युतानन्ददाशेन। पंचतन्त्रं पश्यन्तु – कतिपयशताब्देभ्यः स्फुर्तिं यच्छन्ति सन्ति ताः कथाः। को जानाति Harry Potter चरित्रं कालान्तरे कोऽपि पठिष्यति न वा? एतावद्दशसहस्रवर्षपर्यन्तं प्रेरणा ततः भविष्यति न वा संशतिविषयोऽयम्। यस्मात् अद्यतनाः आङ्ग्लछात्राः प्रेरणां न प्राप्नुवन्ति, John Keithतः ते प्रेरणां न प्राप्नुवन्ति। Wordsworth नाम कोऽपि न जानाति, Mool इति कः तन्नाम अपि न जानन्ति। द्वयं वा पद्यमेकं वा उदाहर्तुं न शक्नुवन्ति। दुस्थितिरेषा अद्य वर्तते। ब्रौर्णी नाम कः इति पृच्छन्ति। एवं तत् तत् भाषासु विस्मरणीयता बहु वर्तते। प्रेरणा ततः शास्वतिकी न संजायते। परन्तु संस्कृतसाहित्ये अस्ति तादृशं किमपि तत्त्वं

यत् सर्वत्रैव शास्वतिकीं कामपि प्रेरणां सर्वस्मा एव ददाति इति वयमनुभवामः। बाणभट्टस्य **कादम्बरी** कदापि कालदोषदष्टा न भविष्यति। प्रत्येकस्यामपि ग्रन्थजातौ, प्रत्यकस्मिन्नपि ग्रन्थदेशे कतिचन ग्रन्थाः सन्ति ये सर्वान् ग्रन्थानतिशेरेते। तेषां महिमा शास्वतिकी भवति। यतोहि – अहमेतत् वक्तुमिच्छामि, एकमुदाहरणं स्वीकर्तुमिच्छामि, काव्यप्रकाशस्य समुदयानन्तर–मलंकारशास्त्रे न्यूनातिन्यूनं द्विशताधिकाः ग्रन्थाः प्रकरणग्रन्थाः काव्यशास्त्र–पंक्तिच्छायामबलम्ब्य कृताः। कस्यापि नाम न श्रूयते। मेघदूतस्यावतारानन्तरं प्रायः मम मित्रमणयः जानन्ति कतिदूतकाव्यानि आविष्कृतानि आसन्। परन्तु मेघदूतं मेघदूतमेव वर्तते। एवं च प्रत्येकस्यामपि काव्यप्रक्रियायां तादृशं किमपि वैशिष्ट्यं कदाचित् कश्चन जन उपजायते यस्य वैशिष्ट्यं तिरोधातुम् अथवा अतिशयितुं बहुकठिनं भवति। संस्कृतसाहित्येऽपि सामान्यगद्यविषये यदि गोष्ठी भवति, यदा कदा अहं तत्र प्रभवामि, किमपि वक्तुमपि शक्नोमि। किन्तु अद्यतनगद्यग्रन्थानां विषये नाऽहमधिकं जानामि। अतः दुर्बलः अस्मि। किंचित् कथयितुम् न प्रभवामि। अहमुदाहरामि – भाष्याणि आश्रित्य, शास्त्रगद्यस्योपरि वा एका गोष्ठी भवितुमर्हति। यतो हि भाष्याणि ... पतंजलेः **महाभाष्यं** कियत् रुचिरं वर्त्तते। प्रत्ययानां प्रकृतीनां वा विचारादिकं द्वारा तदन्यथा अभवत्। शंकरभगवत्पादानां **भाष्यं** द्रष्टव्यम्। तदतिशयितं **शाबरभाष्यम्**। विमृश्यते तत्र केवलं कस्य यागस्य किमङ्गभूतमिति। परन्तु वाक्यरचना किदृशी वर्तते। यां वाक्यरचनां कादम्बरीकारः अपि नातिशयितुं शक्नोति तादृशं सौन्दर्यं वर्तते शाबरभाष्ये। अनुभूतिः काचित् अस्ति। अहं वदामि। वाचष्पतिमिश्रमहोदयानां गद्यानि वर्तन्ते। तेषां षड्दर्शनव्याख्यानेषु। सः वदति – *"मरुषु मरीचियमुच्चावच–मुच्चलत्तुंगतरंगभंगमालेयमभ्यर्णवमवतीर्णामन्दाकीनि"* इति। प्रयुक्तं तु स्वयमपि – *"आपीय पिपासामुपशमयेत्"*। वादविवादं करोति – यत्तु शुक्तौ रजतं सत्यं वा असत्यं वा" इति शास्त्रीयविचारं ख्यातिवादे अनीर्वचनीय–ख्याति उपस्थापयितुं प्रवृत्तः वाचस्पतिमिश्रमहोदयः। अतः ततोऽयमसत्यं न वा सत्यम्। परन्तु बहुगम्भीरं तत्त्वम्। वस्तुतः यदि प्राचीनगद्यशास्त्रे गद्यस्य गोष्ठी अभविष्यत् तत्सर्वं विषयमानीय आगतवान् स्याम्। बहुरुचिरं भवति तत्। सत्पक्षे, असत्पक्षे सदसत्पक्षे वाक्यानि एवमेव भवन्ति। अन्ततः अनिर्वचनीयख्यातिम् उपस्थापयति। एवमस्माकं कदा कदाचित् शास्त्रकाराः कवयः भवन्ति। कवयश्च शास्त्रकाराः भवन्ति। स्वकीयकवितायां सर्वेषामेव शास्त्राणां समन्वयनं प्रतिपादनं तथा कुर्वन्ति यस्य वैशद्येन प्रतिपादनार्थं महाशास्त्रविदां तत्र भागः स्वीकार्यः, न तु तत्सामान्यजनैः अवबोधव्यम्। कालिदासकृतिषु अस्ति तादृशं शास्त्रगाम्भीर्यम्। नैषेधे तु वर्तते एव। माघे तु

अस्ति एव। अतः काचित् सर्वाऽपि रचनाप्रक्रिया अनादिकालात् भारते सततमनुसृता वर्तते। इदं श्रुत्वा इदं ज्ञात्वा वयं अनुभवामः यत् अद्यत्वेऽपि स प्रवाहः एंवमेव गम्भीरतया प्रवहन् अस्ति। अविच्छन्नतया तथा प्रवहन्नस्ति। अद्यापि अस्माकं पुरस्तात् राजेन्द्रमिश्रमहाभागसदृशाः कवयः विराजन्ते। अस्मान् आनन्दतुन्दीलान् कुर्वन्ति। सौभाग्यम् एतत्। परन्तु सर्वस्मिन् अपि काले सर्वेषु अपि आदर्शेषु एकैकं यथा प्रतिष्ठितं तत् विद्यायामागतमपि तथा प्रतिष्ठितं नाभवत्। तत्र कारणं सर्वत्र अनुकरणमेव। अनुकरणं सर्वदा हानिकरं न भवति। स्वप्रतिभा स्वपद्यता यावन्न भवति तावत् पर्यन्तं तस्य चिरस्थायिता न भवति। अतः अनुकरणं साहित्यस्य किंचित् काठिन्यम् अस्ति एव। **"गद्यं कवीनां निकषं वदन्ति"** इति वदन्ति। पद्ये तु तत् यदि प्रासादिकस्थानमहिम्ना गणानां सन्निवेश महिम्ना किमपि सौन्दर्यं स्वयमायाति। अतः कोऽपि पद्यं लिखतु तत् तु 50% sucsessfull एव। अनन्तर 50% sucsessfull कर्तुं तेन किंचित् प्रयत्नं करणीयम्। गद्येतु तथा न। गद्ये तु पूर्णप्रभावेण पूर्णसामर्थ्येन एव तत्र सौन्दर्यं सिध्यति, ममानुभवस्तु शंकरभगवत्पादानाम् – *"अशोच्यानन्वशोचस्त्वम्"* इत्यत्र द्वितीयाध्यायस्य दशमकारिकायाः अधस्तादेकं पृष्ठद्वयात्मकं वा वाक्यं यदि विवेचनं कुर्वन्ति, गद्यस्योदात्तस्वरूपं दृष्टिपथमायास्यति। तदेव गद्यम्। तदन्यत् गद्यमेव भवितुं नार्हति। एवमेव त्रयोदशाध्याये –

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत" इति।

तत्र तावत्किंचित् उदात्तगम्भीरं गद्यं तेषां वर्तते। वृहदारण्यके, छान्दोग्ये वहुशः वयमेतद् सौन्दर्यमनुभवामः।

परन्तु गोष्ठी वर्तते अद्यतनगद्यवाङ्मयस्य। मम विद्यार्थिदशायाम् अहमेकं ग्रन्थं चितवान् आसम्। दौर्भाग्यात् सः ग्रन्थः मम पार्श्वे नास्ति इति बहु खिद्यामि। तदेतत् के. एल. व्यासशास्त्रिमहोदयैः, Macdonal विरचितस्य वैदिकसंस्कृतसाहित्यस्य संस्कृतानुवादः। प्रतीकभूतः स संस्कृतगद्यरचनायाः। विश्लिष्यते तत्र केवलं वैदिकवाङ्मयस्य इतिहासः। परन्तु तत्र वाक्यरचनारीतिः तथा महिमान्विता आसीत्, तद्ग्रन्थमहं सहर्षमानीतवान्। प्रायः तेषु दिवसेषु यथा अहं परीक्षायां लिखितवान् आसम् तदा जिह्वाग्रे सः ग्रन्थः पूर्णतः आसीत्। अद्य न स्मरामि परन्तु क्वचिदपि एषः ग्रन्थः उपलब्धव्यः इति मया बहु प्रयत्नः इदानीमपि क्रीयते। के. एल. शास्त्रीति तेषां संस्कृतवाङ्मयम्, वैदिकवाङ्मयं च इतिहासमिति नाम्नः विरचित–गद्यभागः सः अत्यन्तम् आदर्शभूतः। अहमिदानीमपि तस्य ग्रन्थस्य महत्वं स्मरामि। परन्तु नास्ति काचित् न्युनता संस्कृतगद्यलेखकानामस्माकं एव

किंचित् विंशति–त्रिंशत् वा वर्षेभ्यः पूर्वं ये स्वकीयं जीवनं परित्यक्तवन्तः। तत्रभवन्तः लक्ष्मणस्वरूपमहाभागाः तेषां सर्वेऽपि ग्रन्थाः आदर्शभूताः भवन्ति। **रामयणसंग्रहः, भारतसंग्रहः, नलचरितम्,** अनन्तरं तेषां **भीष्मविजय**मिति एतादृशानि वहुनि काव्यानि सन्ति। गद्यरचनायां प्रतीकभूताः आदर्शभूताश्च ते विराजन्ते। अहं तत्र बहु अनुभवामि तेषां सौन्दर्यं, मम इदमपि एकं निवेदनमस्ति कस्यचित् काव्यस्य, कस्यचित् उत्तमोत्तमरचनायाः शास्त्रीयः कश्चन विचारः अस्ति चेत् वयं वादविवादं यावतापि दीर्घेन कालेन यावतापि सामर्थ्येन कर्तुं शक्नुमः। परन्तु कस्यचित् श्लोकस्य यत् सौन्दर्यं, कस्यचित्काव्यस्य यत् महत्वं ... ... तदधिकृत्य किंवा वदामः। हृदयसम्वेदनीयं तु तत्। इदं तु तत्त्वं वादविवादविषयभूतं नास्ति। चक्षुसी निमील्य पठित्वानुभवितव्यमेतत्। तादृशेषु विषयेषु कदाचित् वयं मूकाः भवामः। अधिकं वक्तुमपि न पारयामः। यद्यपि Literary criticism इति नाम्ना आसन् अस्माकम् आनन्दवर्धनाः, नाट्यमहर्षयः, ये Literary criticism इति अस्य प्रथमसंस्थापकाः आसन् भारते। एकैकं श्लोकं नीत्वा, श्लोकं स्वीकृत्य तेषां यद् विवरणं यत् प्रपंचनं तत्सौन्दर्यस्य यत् व्याख्यानं तैः कृतं तदादर्शभूतमस्ति अस्माकं। परन्तु सर्वे सर्वत्र समर्थाः न भवन्ति।

आनुभाविकोऽयं विषयः, न तु वाग्व्यापारविषयः। अतः अहं कामपि कथां श्रावयामि। परन्तु मम अद्यापि बहवः बन्धवः लिखन्ति। वहु लिखन्ति इति सत्यम्। परन्तु कालान्तरं तेषां स्थिति शास्वतिकी भवति वा न वा इत्यत्रैव संशयो वर्तते। तत्राहम् अंशद्वयमतिमहत्वभूतं सर्वथा विभावयामि। सौशब्द्यमस्ति वामनेन जीवातुभूतम्। यदि सौशब्द्यं नास्ति तर्हि तस्य काव्यत्वं विभावनीयम्। सौशब्द्यमिति वामनेन व्याख्यातं वर्तते। व्याकरणदृष्ट्या ये सुशब्दाः सन्ति, येषां सकृदुच्चारणेन स्वर्गलोकः प्राप्यते। सः गुणः सौशब्द्य–गुणः। सौशब्द्यरूपः गुणः अवश्यं धर्तव्यो भवति रचनासु। अनन्तरं संस्कृतस्य काचन भाषामर्यादा वर्तते। या कापि भाषा भवतु तस्य कापि भाषामर्यादा वर्तते। कदाचित् अद्यत्वे लेखनमधिकाधिकं जायमानमस्ति। तत्र मम एषा भावना वर्तते। कदाचित् वयं हिन्दीं संस्कृतं कुर्मः। कदाचित् वयम् आग्लीं संस्कृतं कुर्मः। कदाचित् आन्ध्रीं संस्कृतं वयं कुर्मः। कदाचित् उदिचीं वयं संस्कृतं कुर्मः। सापि प्रक्रिया अपेक्षिता। येन हि संस्कृतस्य वैभवं वाङ्मय–विकाशः इतोऽपि अभिवृद्धो भवति इत्यत्र सर्वथा दोषं न पश्यामि। परन्तु अवश्यं पश्यामि, यावत्पर्यन्तं तत् संस्कृतीकरणं संस्कृतभाषामर्यादां परिबृंहितं न भवति। अतः अंशद्वयमतीव अपेक्षितम्, एकं तु सौशब्द्यम्, एकं तु संस्कृत–भाषामर्यादा इति। तत्राहं केवलं लघूपायमन्विष्टवान्। अधिककथने क्लेशः। श्रावयामि किंचित् गतशताब्द्यां लक्ष्मणस्वरूपमहोदयाः किदृशं वस्तु लिखन्ति

– तत्र कालस्तु गत एव। तथापि यत्र कुत्रापि एतद् भवतः **भीष्मविजयम्** ग्रन्थं पश्यन्तु। एवं निवृत्तोऽपि जामदग्नि–भीष्मविजयवृत्तान्तः तु भवन्तः जानन्ति। स्वयमनुवृत्ता कृतसंकल्पा सा कन्या अम्बा, तस्याः प्रकरणमिदम्[1]।

तत्र शब्देन अम्बा स्वीक्रीयते। सा कन्या स्वयं *युवजरति भूत्वा* ..., "युवजरति भूत्वा" इत्यत्र 'युवखलतिपलितजरतिभिः' इत्यनेन समासः। पश्यन्तु प्रत्यक्षरं प्रतिपदं ये ये विशेषाः भाषामर्यादारूपेण संस्कृते सन्निहिताः सन्ति तेषामत्र प्रयोगः वर्तते। *युवजरति भूत्वा* तीव्रेण तपसा महेश्वरमाराध्य ततो भीष्मवधाय वरमवाप्य स्वयमग्नौ जुहोवामास। 'जुहोवामास' इत्यत्रापि तत्रास्ति किंचित् वैशिष्ट्यम्। हुत्वा च साक्षीप्रमेव पाञ्चालेश्वरस्य राज्ञो द्रुपदस्य दुहितृत्वेन पुनर्जन्म लब्ध्वा स्थूणकर्णाक्षस्य यक्षस्य प्रसादन–पौंशमासाद्य, वंशमासाद्य। न तु पुंस्त्वमासाद्य। यदि पुंस्त्वमासाद्येति लिखामः तर्हि संस्कृतं तत्। पौंशमासाद्य यदि लिखामः तर्हि संस्कृतमर्यादाविभूषितं तत्। अयमेव भेदः। यतो हि तत्र 'श्नु' प्रत्ययः वर्तते। अत्यन्तमेवेक्षतिः वर्तमानं पूर्ववैरं पारयितुं समयप्रतीक्षा अवतारितास्ति।

'वैरं पारयितुम्' इति भाषामर्यादा वर्तते। रामायणे – वैरं निर्यातयतीत्येव सहस्रशः प्रयोगाः वर्तन्ते। यत्र यत्र रामायणे वैरशब्द वर्तते तदनन्तरं 'निर्यात' इत्येव बाल्मिकिना प्रयुज्यते। अन्यत्क्रियापदं न प्रयुज्यते। अस्य मर्यादा एषा *'वैरस्य प्रतिदानम्'*। इदानीं यदि वयं कथां कांश्चित् संस्कृते अनुवदामः अथवा कमपि प्रकरणं स्वीकृत्य वयं लिखामः तर्हि वयं लिखामः 'प्रतिदत्तवान्'। संस्कृते नास्ति एतत्। *'वैरं निर्यातयेत्'* अथवा *'वैरं पारयति'* इत्येव लेखनीयम्। अत्र पारयति इति धातुरेव संस्कृतभाषामर्यादा वर्तते। मम एकः सखा अस्ति – रामायणे शीघ्रं प्रबन्धान् लिखति सः। ... ... बाल्मिकेः संस्कृतभाषामर्यादा कीदृशीति अद्यास्ति अस्माकमावश्यकता। पण्डितनामस्माकं संस्कृतभाषामर्यादाविषयेऽसचेतनतैव चिन्त्या अद्यत्वे। एषा संस्कृतभाषामर्यादास्ति नास्तीति वा कश्चन गहनः विचारः करणीयः, येन लेखकानां मार्गदर्शनार्थं तद् भवेत्। अतः परिनिष्ठितं ज्ञानं शास्त्रेषु समवाप्य यदि वयं प्रवर्तामहे तर्हि अस्माकं प्रक्रियायां लेखने किंचित् वैशिष्ट्यं स्वयमेव प्रतीयेत। अत्र 'क्षत्रियेण' इति एकं शब्दं प्रयुक्तं वर्तते। भीष्मः वदति *"मातः सर्वमुपवर्णनमस्मद्गुरौ अत एव मे बलवती तेन सह युयुत्सा। बलीयसी सः व्यजानात् प्रसुप्ते प्रथियसी प्रथाम्"*। पौरुषाभिमाने वाक्यानि कियत् गाम्भीर्यम्। अत्रैव श्लेषः अस्तीति वामनः वदति – पदानां परस्परं संश्लेषः

---

[1] अत्र भीष्मविजय–पुस्तकात् काश्चन पंक्तय पठित्वा तदनुरोधेन विवरणमपि प्रस्तुतमधस्तात् श्रीमदभिः शास्त्रिमहोदयैः।

श्लेषः अत्र वर्तते। ओज नाम एतदेव। पदबन्धः तादृशः भवेत् येन अनुभावनीयं तद् भवति भावः अनुभवगम्यो भविष्यति।

एतदस्ति लेखनस्य आदर्शो नाम। अतो बहुमन्तव्या हि वैदर्भी रीती। अनन्तरमेवम् एकं श्रावयामि। विचित्रवीर्यस्तु यदा ते अम्बिका–अम्बालिके दारा न वा इति (वहु शिक्षणीयं वर्तते।) इत्युक्ते वयं कदाचित् नित्य–नपुंसकशब्दप्रयोगे विशेष्यविशेषणभावनिर्वाहार्थं विशेषणानामपि नपुंसकत्व–मपेक्षितं वा। तत्र पुं–स्त्री–लिङ्गमेव प्रयोक्तव्यं धा इत्यादिषु अस्माकं मनसि सर्वदा विचिकित्सा एव जायते। परन्तु एषः सर्वत्रदर्शितया रीत्या लिखति। एतस्य ग्रन्थः तथा उपदेशा भवन्ति। 'ततः आरभ्य स्त्री मयैव अहोरात्रं नापगमयन् क्षत्रियेण पक्ष्मणा क्षत्रीकृताः। नातिदीर्घेण कालेन उपरतो बभुवः।' अत्र *क्षत्रियेण पक्ष्मणा* इत्यत्र क्षत्रियशब्दस्य सौन्दर्यं पश्यन्तु। तत्र क्षत्रियेण अप्रतिकार्येण इत्यर्थः। The disease which does not have any remedy, अप्रतिविधेयरोगः। अप्रतिविधेय इति शब्दोऽपि आयाति। परन्तु 'क्षत्रियः' इति शब्दः एतेन प्रयुक्तः। यदा इदानीं कश्चन अस्ति अप्रतिविधेयः तत्र तु क्षत्रियः रोगः इति वक्तव्यम्। किमर्थमित्युक्ते, तत्र किञ्चित् भाषायां श्रावयामि ... ... पतञ्जलेः तत्र वहु सुन्दरमस्ति वर्णनम्। *'क्षत्रियः परक्षत्रियः चिकित्सा'* इति सूत्रं "परक्षत्राद्वा" तत्र चिकित्सा इति एतस्मिन्नर्थे परलोपः 'धा' च प्रत्ययः। परक्षत्रियचिकित्सा इति तत्र अर्थः। 'क्षत्रियः इत्यत्र परक्षेत्रचिकित्स्यः इति विग्रहवाक्यं वक्तव्यम्। यतो हि अन्यशरीरे नाम एतद्देहं परित्यज्य यदा देहान्तरं प्राप्नोति तदानीं एषः चिकित्सितुं योग्यः इत्युक्ते एतस्मिन् देहे चिकित्सार्थं योग्यो न इत्यर्थः। पाणिनिः इमं प्रत्ययं विधत्ते। पश्यन्तु एतस्मिन् अर्थे परशब्दस्य लोपः धा च प्रत्ययः इति भाष्यम्। तत्र कैयटः लिखति – परक्षेत्रे जन्मान्तरशरीरे चिकित्स्यः व्याधिः असाध्यत्वात् क्षत्रियः। कैयटस्य वचनः न केवलं क्षत्रियः शब्दः व्याधिविषयस्यैव। चतुर्षु अर्थेषु प्रयोक्तुं शक्यतेऽयं शब्दः ... ...। अयं सुन्दरः प्रयोगः। पश्यन्तु – यथा परक्षेत्रे धान्यार्थे क्षेत्रे यानि तृणानि तान्यपि क्षत्रियाणि इति उच्यन्ते। एतत् तेलुगु भाषायां 'लल्तुमर्क कलुम्' इति उच्यते। इदानीं 'कल्तुमर्क कलुम्' इति वदन्ति। संस्कृतशब्दः कः इत्युक्ते क्षत्रियो घासः इति। ओडिआमध्ये, हिन्दीमध्ये किं वदन्ति अहं न जानामि। परक्षेत्रे नाम धान्याय क्षेत्रे यानि तृणानि जातानि विनाश्यानि तानि क्षत्रियाणि इति कैयटस्य वचनम्। अनन्तरं तथा पारदारेभ्यो निग्राहाः क्षत्रियाः। तथा परशरीरेषु संक्रमयद् विषयं चिकित्स्यते तत् क्षत्रियम्। इति चतुर्षु अर्थेषु क्षत्रियशब्दः परशब्दलोपपूर्वकं 'धा'–प्रत्ययेन पाणिनिना अभिहितः। भाष्यकारेण व्याख्यातः कैयटेन विशदीकृतः। एषाऽस्ति अस्माकं भाषायाः मर्यादा। इदानीं कदाचिद्

अनुद्यलेखनसमये 'कल्तुमर्ककलम्' इति पदमागतम्। कि कुर्मः इति उक्ते वयं किमपि किमपि कृत्वा तत्र स्थापयामः। तत् न भवेदिति एतादृशानि पुस्तकानि अस्माकमादर्शभूतानि भवन्ति। तत्तु निघण्टुकाराः – *'अमरसिंहः प्रापीयान् सर्वं भाष्यमचुचुरदिति'* इति निन्दां कुर्वन्ति। भाष्यं समग्रं सः कोषे आनीतवान् अस्ति। पश्यन्तु एकतः क्वचिज्ज्ञानमेकतः व्याकरणज्ञानम्। क्षत्रियं क्षेत्रंजतृण–परदेह–चिकित्सायाः परदाररताद् रोगयोः क्षत्रियः पुमान् इति मेदिनी। परदाररतासाध्यरोगयोः क्षत्रियः पुमान्। रोगः असाध्य भवति सः क्षत्रियः। एतादृशा एव ते ते शब्दाः, सकृद् उच्चारणं स्वर्गलोकं प्रापयति। न तु सर्वे शब्दाः। वयमपि अनवरतं संस्कृते वदामः तावत्, स्वर्गः अवश्यं प्राप्यते। परन्तु एते शब्दाः सकृदुच्चारिताः स्वर्गलोकं गमयतीति कथनस्य तात्पर्यम् अत्र वयमनुभवामः। एतादृशम् एतदस्ति अभिनवगद्यसाहित्यम्। कादम्बरी नास्ति। अहं गतशताब्दस्य ग्रन्थमेव उदाहरिष्यामि। एतद् ग्रन्थं कमपि पठन्तु आनन्दो नाम आनन्दः। भाषाशैली भवतु।

कपिञ्जलस्य पुण्डरीकं प्रति उपदेशसमये बाणभट्टस्य गद्यमपि अस्त्येव। बाणभट्टः तु विचित्रमेव वर्तते। सर्वत्र दीर्घसमासं न करोति। तदौचित्यस्य मात्रां तथा निर्वहति यथा कादम्बर्याः वर्णने दीर्घ–दीर्घायन्ते समासाः। परन्तु कपिञ्जलोपदेशे पदद्वयेन एव वाक्यं तत्र भवति। त्रिषु अपि स्थानेषु एषा एव तस्य गतिः। शुकनासोपदेशेऽपि प्रायः सामान्यरूपेण भाषा वर्तते। एवञ्च वर्णनाषु दीर्घः समासभूयस्त्वं अन्यत्र च भावविनिमयार्थमपेक्षितं वैशिष्ट्यं च तत्र वर्तते। एतदनन्तरं तस्य पाण्डित्यमपि द्रष्टव्यम्। तस्य भाषारचनायाः संस्कृतस्य वा महत्वं, वैशिष्ट्यं, गाम्भीर्यमद्याप्यस्ति न वेति विचार्यम्। अतः अनुवादादिकमवश्यं कर्तव्यम्। परन्तु कर्तव्यं सौशब्द्य–समन्वितम्। अपि तु भाषामर्यादापि संरक्षणीया, समलंकृता च भाषा व्यवहार्या।

एतदपि वक्तव्यमस्ति। संस्थानेनाऽपि महान् परिश्रमः क्रियते। गतचतुर्षु वर्षेषु न तादृशः प्रस्तावः, संस्कृतग्रन्थानां प्रकाशनार्थं वा क्रयणार्थं वा आगतः योऽस्माभिर्निराकृतः। वयं न गणितवन्तः। धैर्येण वक्तुं शक्नोमि। एकः अपि नास्ति तादृशः प्रस्तावः। भवेत् हिन्दीपुस्तकानां विषये, भवेत् आंग्लपुस्तकानां विषये, संस्थानपक्षतः एका योजना वर्तते भाषान्तरेषु यत्साहित्यं प्रभुतमस्ति, अतिगाम्भीर्यं यथा प्रेमचन्द–इत्यादिकथासाहित्यं वर्तते, तेषामनुवादं कृत्वा शताधिकानां ग्रन्थानां प्रकाशनार्थमेका योजना वयं स्वीकृतवन्तः। एकः ग्रन्थः इदानीं प्रकाशितो वर्तते। यत्र लेखकानां प्रत्येकपृष्ठं वयं प्रायः सार्धशतं रूप्यकाणि पारिश्रमिक/सम्मानराशिरूपेण

दातुं योजनाकृतवन्तः। अहं सर्वान् एव लेखकान् विदुषश्च आमन्त्रये अस्माकं संकल्पपूर्तिर्भवतु। भवतां सहयोगं विना संकल्पपूतिर्न भविष्यति।

कालः महान् अतिक्रान्तो वर्तते, अतः विरमामि। सर्वेभ्योऽपि सागरविश्वविद्यालयस्य अध्यक्षेभ्यः तथाऽस्मत्सुहृद्भ्योश्च भूयो भूयः धन्यवादान् वितरामि। धन्यवादः।

****

संस्कृते निबन्धानां नवजागर्ति

देवर्षि कलानाथ शास्त्री

गद्यसाहित्यस्य वर्गीकरणं क्रियते चेत् कथाः, आख्यायिकाः निबन्धाः, विमर्शाः, टिप्पण्यः, समाचाराः, पत्राचारः सर्वमिदं गद्यात्मकमेवेति सर्वेषामेषां समावेशः कर्तुं शक्यते। किन्तु पाश्चात्यं समीक्षाशास्त्रमनुसृत्य कथासाहित्यं पृथग् वर्गीकरणं क्रियते (यथा फिक्शन इति वर्ण्य साहित्यं प्रोज इत्यभिधानवहाद् गद्यसाहित्यात्तत्र पृथङ् निर्दिश्यते।) नातश्च निबन्धसाहित्यं, यात्रावृत्तं, समीक्षादिकं च गद्यसाहित्येऽन्तर्भवति। एवंविधं गद्यसाहित्यं संस्कृते गतशताब्द्यां प्राचुर्येण विलिखितमुपलभ्यते। यदि निबन्धानां सर्जनात्मक–विमर्शात्मकेति वर्गद्वयं पाश्चात्यविधया क्रियते तर्हि स्पष्टीभवति यत् सर्जनात्मकगद्यस्य इतिहासः संस्कृते नाऽतिप्राचीनः। विमर्शात्मकनिबन्धास्तु सहस्राब्दिभ्यो व्यलेख्यन्तैव संस्कृते। सर्जनात्मकनिबन्धा अपि संस्कृतेऽद्य प्राचुर्येणोपलभ्यन्ते। तेषामिति सोऽपि प्रोज्जवलः। सर्जनात्मकनिबन्धेषु ललितनिबन्धा, व्यंग्यविनोदात्मका निबन्धाः, यात्रावृत्तानि विधिविशेषमवलम्ब्य प्रतिभाप्रयोगपूर्वकं लालित्यमुत्पादयन्तो लेखाः समावेशिता मन्यते।

सर्जनात्मका निबन्धाः

अस्मिन् हि वर्गे ललितनिबन्धाः, व्यंग्यलेखा, विनोदाभिव्यक्तयश्च समावेशिता भवन्ति। विषयविशेषमवलम्ब्य गंभीरविमर्शप्रस्तुवतां निबन्धानाम् इतिहासस्तु संस्कृते सुतरां प्राचीनः। हेमाद्रिप्रभृतीनां धर्मशास्त्रीया ग्रन्था निबन्धा इत्येवाभिधीयन्ते स्म। परिनिष्ठितार्थविषयविमर्शो निबन्ध इत्यभिधीयते स्म। किन्तु पाश्चात्येषु यल्लेखनं 'क्रियेटिव राइटिंग' (creative writing) इत्यभिधीयते तस्मिन् गद्यलेखनस्य परम्परा न संस्कृतसाहित्ये बहुपुरातनीति सामान्या धारणा।

तादृशं गद्यं "सर्जनात्मकम्" इत्यपि न भारतीयाभिधानम्। अस्माकम् अभिव्यक्तौ तत्प्रतिभोत्थं, रसप्रवणमित्यादिना केनचनाभिधानेन काममभिधीयेत, न सर्जनाभिधानेन विमर्शपरं सर्जनात्मकं चेति वर्गीकरणं खलु पाश्चात्य–परम्परानुसारि। अत्राहं चिन्तयामि यदानन्दवर्धनो यदा वर्गद्वयमित्थं व्यपदिशति *"या व्यापारवती रसान् रसयितुं काचित्कवीनां नवा दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती"* तदा स वैपश्चितीं दृष्टिं विमर्शात्मिकां विवक्षति व्यापारवतीं च सर्जनात्मिकाम्। अभिधानं किमपि

भवतु, किन्तु ललितनिबन्धानां विनोदपराणां निबन्धानां वा परम्परा न संस्कृते पुरातनीत्यस्माभिरत्र विविक्षितम्।

विषयविशेषमवलम्ब्य तस्य संक्षिप्तविवेचनपराणां, भावनाविशेषम् अवलम्ब्य स्वीयं हार्दमुद्गिरतां वा निबन्धानां परम्परा प्रमुखतः पाश्चात्यसाहित्यस्य एव अवदानमिति विदुषां मतम्। "एसे" (Eassy) "मोनोग्राफ" (Monograph), "ट्रीटीज" (Treatise) इत्याद्यभिधानानि वहन्ती सेयं विधा विषयस्यैकस्य विवेचनं कुर्वाणान् निबन्धान् निर्दिशति, यत्र तद्विषयकस्य परिज्ञानस्य संक्षिप्य समावेशः क्रियते। अपरतस्तु हृदये समुन्मिषन्तीनां भावनानां ललितमुद्वमनमपि निबन्धस्यैवाऽपरः प्रकारो यः "पर्सनल एसे" (Personal Essay) इत्याख्यायते पाश्चात्यसाहित्ये हिन्द्यादिभाषासु च ललितनिबन्धादिना अभिव्यपदिश्यते। सोऽयं प्रकारः पाश्चात्यजगति जन्माऽलभतेति साहित्यविपश्चितः कथयन्ति। फ्रांसदेशीयः साहित्यकारः मान्ते (Monataingne, Michel Eyquem de) (1533–1592) इत्याख्योऽस्य प्रकारस्य जनको व्यपदिश्यते येन सर्वप्रथम् "essay" शीर्षकं स्वीय निबन्धानां फ्रेंचभाषानिबद्धानां सङ्कलनं पेरिसनगरात् सन् १५८० ई. वर्षे प्राकाशि। एषु निबन्धेषु धर्म–नागरिकता–सभ्यतादि–मानवीयजीवन–संबन्धिनां विविधविषयाणां सम्बन्धे लेखकेन स्वहृदये समुन्मिषतां स्वकीय–विचाराणामुन्मुक्तं हृदयग्राहि च समुट्टङ्कनं कृतमभूत्। अस्याः लेखविधायाः प्रभावो विद्वत्सु तावत्प्रसृतो यदाङ्गलभाषालेखकैरपि Essay इति नामधेयाङ्कितस्यास्य प्रकारस्य सुमहत्साहित्यमलेखि, तत्प्रभृति चाद्यावधि विश्वस्मिन्नस्य प्रकारस्य कथं खलु व्यापकं सर्जनमभूदिति विदन्त्येव विद्वांसः।

संस्कृते निबन्धाः

भारते तादृशी निबन्धलेखनपरम्परा नाऽभूदिति नास्य कथनस्य तात्पर्यम्। अस्माकं विवेचकैरपि धर्मशास्त्रदिविविधविषयेषु निबन्धाः (हेमाद्रिप्रभृतीनाम्), प्रबन्धाः, सन्दर्भा, लेखाश्चालेखिषत येषां कलेवरस्य दैर्घ्यं दशपञ्चदशपृष्ठत आरभ्य परःशतं पृष्ठानपि स्पृशति स्म, किन्तु तेषां वर्गीकरणं ग्रन्थपरिवारे एवाऽक्रियते। संक्षिप्त–लेखपरिवारान्तर्भुक्तस्यास्य नूतनस्य प्रकारस्य निबन्धाख्यस्य या धारा पाश्चात्यजगतः समायाता, तस्याः फलमिदमभूद् यद् भारतीयासु भाषासु, विशेषतः पत्रपत्रिकामाध्यमेन, सर्वविधानां निबन्धानां, येषु विवेचनपरा वर्णनपराः प्रकारा अप्यभूवन्, मान्ते शैल्या निबन्धा, ललितनिबन्धा, रम्यरचनाश्चाप्यभूवन्, प्रभूतं साहित्यं प्रकाशमलभत। तत एव च भाषाशिक्षणे निबन्धलेखनशिक्षणमपि महत्वपूर्णम् अङ्गमभवत्। न केवलं हिन्द्याद्याधुनिकभाषाणां पाठ्यक्रमेषु, अपितु

संस्कृतपरीक्षाणामपि पाठ्यक्रमेषु निबन्धलेखनं छात्राणां कृते निरधार्यताऽऽवश्यकम्।

अत एव विंश्याः शताब्द्याः प्रारम्भत एव यथा संस्कृतपत्रपत्रिकासु विभिन्नप्रकारका निबन्धाः प्रकाशमभजन्, तथैव छात्रेभ्यो निबन्धलेखनं शिक्षयितुं संस्कृतविद्वद्भिर्गद्यलेखनमप्यारभ्यत। तदिदमुल्लेखनीयं यत् संस्कृतस्य मूर्धन्यैर्विद्वद्ऽभिः, येषु प्रमुखतः पत्रसम्पादकाः श्रीहृषीकेश–भट्टाचार्य–प्रभृतयः (**विद्योदय**स्य सम्पादकाः) आसन् पत्रपत्रिकासु निबन्धा व्यलेख्यन्त। तदनु पञ्चषैर्विद्वद्भिर्येषु प्रमुखा विश्रुतवक्तारः प्रशासकाश्च म. प्र. पं. गिरिधरशर्मप्रभृतयोऽभुवन्, निबन्धलेखनं शिक्षमाणानां बालानां कृते ग्रन्थाः प्राणीयन्त येषु संक्षिप्य निबन्धलेखनस्य कश्चित्प्रकारो भूमिकाभागे पूर्वमवर्ण्यत, तदनन्तरं प्रमुखतो विविधानां निबन्धानां संकलनमभूत्। एवंविधा ग्रन्थाः पाठ्यक्रमे सहायकत्वेन छात्रैः पठ्येरन्नित्यभूत्प्रमुखं प्रवृत्तिनिमित्तम् एषाम्। अतः "पाठमाला" अथवा निबन्धानां सङ्ग्रह एव तेषु प्रामुख्यमभजत्, स एव प्रायः सर्वमपि कलेवरमध्यतिष्ठत्। एवंविधा ग्रन्थाः पाठ्यपुस्तकत्वेन नियतीकृता अपि।

प्रबन्ध-कल्पलतिका -

दृष्टान्तविधया प्राचीनतमं पुस्तकत्रयमवलोक्यताम्। १६२८ ई. वर्षे कलिकातातो रेवतीकान्तभट्टाचार्येण **'प्रबन्धकल्पलतिका'**ख्यं निबन्धसंकलनं स्वकीयं प्राकाशि। अत्र हि प्रायः सार्धद्विशतपृष्ठेषु लेखकेन स्वीयाः संक्षिप्ता निबन्धाः संगृहीताः, भूमिकाभागे, यद्यपि शिक्षार्थिनां कृते रचनाशिक्षाऽप्यस्ति किन्तु तस्यां कारक–सन्धि–पदान्वय–गुण–रीत्यलङ्कारादीनां विवेचनम् एवास्ति प्रमुखतो यत्संस्कृतभाषाप्रयुञ्जतां कृते सहायकम्, किन्तु निबन्ध–लेखनविद्या, सिद्धान्ता वा न तत्र विवेचिता अवलोक्यन्ते। यतिचिह्नानां (Punctuation Marks) वर्णनमवश्यमेवाऽस्य विशेषः।

प्रबन्धमञ्जरी

१६२६ ई. वर्षे सुप्रसिद्धेन विदुषा हिन्दीसाहित्येतिहासे प्रसिद्धेन पं. पद्मसिंहशर्मणा श्रीहृषिकेशभट्टाचार्याणां निबन्धा, ये **'विद्योदय'**पत्रे समये समये प्राकाश्यन्त, **'प्रबन्धमंजरी'**शीर्षकान्तः संगृहीता, बिजनौरतः प्रकाशिताश्च। नात्र निबन्धलेखनशिक्षा मनागपि निवेशिता, हृषीकेश–भट्टाचार्याणां दशनिबन्धा एव संगृहीताः, भूमिकायां तेषां जीवनचरितम् तन्निबन्धानां समालोचना चावश्यं निवेशिता। अत्र उद्भिज्जपरिषद्, आत्मवायोरुद्गारः इत्यादयो ये निबन्धाः सन्ति तेषु भट्टाचार्याणां

"सर्जनात्मकता" (स्वोपज्ञप्रतिभाप्रवणता) प्रत्यक्षीभवति। दुर्गानन्दस्वामिनाम्ना चरित्रमेकं तैः कल्पितं यस्य पत्रं सम्पादकाय लिखितं ललितोद्भावनाः सूचयति। इत्थं कतिपये निबन्धा ललितनिबन्धाख्यविधायाः पूर्वाभासाः कथयितुं शक्यन्ते।

निबन्धादर्शः-

१९३७ ई. वर्षे म.म.पं.गिरिधरशर्मणा **'निबन्धादर्शः'** इति शीर्षकेण पाठ्यक्रमोपयोगिनिबन्धसंकलनं दिल्लीतः प्राकाश्यत। नात्रापि किंचन निबन्धलेखनशिक्षणं, निबन्धविधासिद्धान्तसामग्री वाऽभूत्, केवलं कादम्बरी–नलचम्पू–जातकमालादिभ्य उद्धृताः ३३ गद्यभागाः संकलिता आसन्। पाठमालारूपेण सेयं पुस्तिका छात्रेपयोगायैव संकलिताऽभूत्।

एवंविधानां पुस्तकानां प्रचीयमानां वाञ्छां वीक्ष्य, निबन्धानानां लोकप्रियतां, संस्कृतच्छात्राणां कृते तल्लेखनशिक्षाया आवश्यकतां च निभाल्य, संहैव च निबन्धलेखनप्रकारं बोधयतां पुस्तकानामभावमनुभूय तदानीं जयपुरीय–महाराजसंस्कृतकालेजाध्यक्षैः म.म.पं. गिरिधरशर्मचतुर्वेदैस्तत्सुहृदः सहकर्माणश्च कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रिणोऽस्मत्पितृचरणाः (ये तदानीं जयपुरात्प्रकाश्यमानस्य संस्कृतमासिकस्य **'संस्कृतरत्नाकर'**स्य संपादका अप्यभूवन्) अनुरुद्धा यत्ते निबन्धलेखनशिक्षात्मकमेकं पुस्तकं प्रणयेयुः। सत्यावश्यकत्वे, तस्मिन् निबन्धानां विभिन्नाः प्रकारा अपि प्रतिनिधि–दृष्टान्तरूपेण निवेश्येरन्। संस्कृतभाषायां तादृशं पुस्तकं सुमहतीम् आवश्यकतां पूरयिष्यतीति तदा सुस्पष्टमेवाऽभूत्।

निबन्धविद्या (प्रबन्ध पारिजातः)

पं. गिरिधरशर्मणां प्रेरणया कविशिरोमणिभिः **'निबन्धविद्या'**शीर्षकं पुस्तकं व्यलेखि यत्र निबन्धानां प्रकाराः लेखनविधा, तदीया परिपाटी, अन्ये च शिक्षणार्थिनामुपयोगयोग्या विषया विशदीकृता आसन्। अनया निबन्ध–विद्यया सह वर्णनात्मक–विवेचनात्मक–यात्रावृत्तात्मक–स्थूलवृत्तात्मक–विचारात्मक–शोधात्मक–ललितनिबन्धेत्यादिविविधवर्गविभक्तानां निबन्धानां बोधनाय प्रतिनिधिभूतान् १३ निबन्धान् पितृचरणैर्विलिखतान् संकलय्य मया **"प्रबन्धपारिजात"**शीर्षको ग्रन्थः संपादितो यः १९८७ वर्षे जयपुरस्थेन केन्द्रीय–संस्कृत–विद्यापीठेन प्राकाशि।

अत्र पितृचरणानां ये ललितनिबन्धाः संकलिताः सन्ति तेषु **"किन्तोः कुटिलता"**ख्यो ललितनिबन्धः १९३३ ई. वर्षे **संस्कृतरत्नाकर**पत्रिकायां

प्रकाशितोऽभूत्। सेयं विधा तदानीं हिन्द्यामपि न तावत्सुप्रतिष्ठिता सुप्रचलिता वाऽभवद्यथा भट्टमहोदयैः संस्कृते सा लोकप्रियतामवापिता। प्रवृत्ते कस्मिंश्चन कार्यविशेषे किन्तुः (किन्तुपदं) यथैव पदं धत्ते तथैव कथं सर्वमपि दृश्यंजातं कृत्यजातं वा विपरिवर्तते इति रमणीयता प्रस्तुवन्नयं निबन्धो ललित–निबन्धस्योत्कृष्टतया प्रातिनिध्यं विदधाति संस्कृते। एवमेव **"बालकभृत्यः"** इत्यादयो ललितानिबन्धास्तल्लिखिता अत्र संकलिताः।

प्रत्येकं पदं मकारेणारभ्येत – किन्तु संपूर्णा कथा सरसतया संपूर्येत, घटनाः, कथ्यमुद्देश्यं च साधु प्रकटितं स्यान्न च किंचन काठिन्यम् अप्रयुक्तत्वदोषो वा परिदृश्येतेत्यद्भुतं चमत्कारं वहन् **"मकारमहामेलक"**–शीर्षकश्चमत्कारात्मको निबन्धश्चापि तल्लिखितोऽस्मिन् संकलने समाविष्टो यः संस्कृतस्यापूर्वां क्षमतां लेखकस्य चापुर्वं सामर्थ्यं प्रमाणयति।

इत्थं हि ललितनिबन्धविधाया अपि समवतारणा संस्कृते युगेऽस्मिन् संजाता इति विशदयितुमेवात्रास्माभिः प्रबन्धपारिजातस्य प्रसंगेऽस्या विधायाः परिचयोऽभिज्ञापितः। इत्थं हि भट्टमहोदया यदि ललितनिबन्धविधायाः प्रवर्तका उच्येरंस्तार्हि न भवेदनौचित्यम्।

विंश्याः शताब्द्याः प्रारम्भेऽन्येपि प्रारंभिकाः प्रयासाः पंडितपुंगवैः संस्कृते निबन्धविधाया विक्षणाय विहिता अभूवन्। तेषु ग्रन्थद्वयस्य परिचयोऽस्माभिरत्र प्रस्तूयते। स्वतंत्रताप्राप्तेरनन्तरं तु **रचनाकौमुदी निबन्धरत्नाकर** प्रभृतिशीर्षकवहा अनेकें ग्रन्थाः प्रकाशमायाता येऽद्यापि छात्रैरधीयन्ते इति विदन्त्येव विपश्चितः। न तेषां पल्लवनेनात्र कश्चन लाभः। तेषु हि छात्रोपयोगिनां 'परोपकारः', 'विद्याया महिमा' प्रभृतीनां विमर्शपराणां निबन्धानामेव समावेशो न सर्जनात्मक पदवाच्यानां ललितनिबन्धानां व्यतिव्यंजकनिबन्धानां (पर्सनल एसे) वा।

प्रस्तावचन्द्रिका

विंश्याः शताब्द्या आरंभे निबन्धलेखनं शिक्षयितुं लिखितानां बहूनां निबन्धानां संकलनं विधाय पाठ्यपुस्तकत्वेन ग्रन्थं कंचन प्रस्तोतुकामैः विद्वद्भिः लिखितेषु पुस्तकेषु सांप्रतमल्पज्ञातं संकलनमस्ति पं.नृसिंहदेव–शास्त्रिणा सियालकोटवास्तव्येन लाहौरात् प्रकाशिता **प्रस्तावचन्द्रिका** (सन् १६२०)। अत्र , निबन्धलेखनविधिस्तु नोक्तः किन्तु षोडश विविधविषयका निबन्धाः संगृहीताः सन्ति यथा – 'संगः' (संगतेः प्रभावः), 'रमते न मरालस्य मानसं मानसं विना', 'दारिद्र्यम्', 'विद्या', 'राजभक्तिः', 'छिद्रेष्वनर्था बहुलीभवन्ति', 'धर्मो रक्षति रक्षितः', 'रसः' (रससिद्धान्तरस्य व्याख्या)

इत्यादयः। पूर्वं प्राचार्यस्य वुलनरस्य (लाहौरकालेजप्रधानाचार्यस्य) प्रशस्तिः, तदनन्तरं दाधीच–शिवदत्तशर्मणे समर्पणं ततश्चाल्पीयसी लेखकीया भूमिका मुद्रिताऽस्ति। प्रौढसंस्कृते प्रविष्टानां छात्राणामेव हितमनया चन्द्रिकया संजातं स्यादित्यनुमीयते।

संस्कृतप्रबन्धरत्नाकरः

उत्तरप्रदेशात्तदनु १६३८ वत्सरे प्रकाशितः **प्रबन्धसंग्रहो** मायादत्त–पांडेयशास्त्रिणा संकलितो मथुराप्रसाददीक्षितानां प्रस्तावनया नरदेवशास्त्रि–राजेश्वरशास्त्रिद्राविड़–परमेश्वरानन्दशास्त्रिप्रभृतीनामभिमतैश्च सहकृतः प्रारंभे किंचिन्निबन्धलेखनशिक्षणमपि चिकीर्षति, निबन्धप्रकारान्, निबन्धलेखन–प्रकरणानि चोपवर्ण्य 'ईश्वरोस्ति वा', 'क्रोधः', 'पृथ्वीग्रहः', 'नीतिर्धर्माय कल्पते', 'ब्रह्मचर्यम्' इत्यादीन् विषयान् प्रक्रम्य वैविध्यं स्पृशति।

इत्थं हि निबन्धविधाया नूत्नतयाऽवतारणा प्राचीनविमर्शात्मक–निबन्धानां युगमतिवाह्य भाषेतरक्षुण्ण–निबन्धविधानुरूपनिबन्धसिसृक्षया प्रेरितत्वाद् गतशताब्द्या अन्तिमे चरणे समभूत्। विश्लिष्यमाणा सेयमवतारणा स्पष्टं व्यनक्ति वर्गद्वयं निबन्धानाम्। उपरि सूचितेषु छात्रोपयोगिनिबन्ध–शिक्षणग्रन्थेषु निबन्धसंग्रहेषु च विमर्शपराणां लघुनिबन्धानां स प्रकारोऽवलोक्यते यत्र विषयविशेषस्य विवेचनं क्रियते। तादृशा निबन्धाः शिक्षणालयेषु विलिख्यन्ते विलेख्यन्ते चान्वहं छात्रैरध्यापकैश्च।

व्यक्तिव्यंजका निबन्धाः

अपरः प्रकारोऽभूत् पत्रकारतयोद्भावितस्य रंजकनिबन्धस्य, ललित–निबन्धस्य, व्यक्तिव्यंजकनिबन्धस्य वा यः खलु मान्तें प्रभृतिभिः निबन्धकारैः अभिज्ञापितत्वात् वैयक्तिकनिबन्धसंज्ञावहत्वाच्च विदेशमूलकताभ्युपगम्यते। एतस्य पूर्वजाः पूर्वाभासाश्चाभूवन् **'विद्योदय'**–संपादकस्य हृषीकेशभट्टाचार्यस्य बहवो निबन्धा येषां संकलनं पं. पद्मसिंहशर्मणा कृतमभूदस्माभिर्विवृतं च। अत्र नूतनोत्प्रेक्षाः, सरसा उद्भावनाश्चाभूवन्, स्वोपज्ञा प्रतिभोन्मेषजा विलक्षणताऽप्यभूद् याऽद्यत्वे *"मौलिकते"*त्याख्यायते। इत्थं हि हृषीकेश–भट्टाचार्यो व्यक्तिव्यंजकनिबन्धानां पूर्वोद्भावकः, तन्निबन्धाश्च वैयक्तिक–निबन्धानां (पर्सनल एसे) पूर्वजाः कथयितुं शक्यन्ते। यदि स उत्तमपुरुष–घटितायां ललितनिबन्धशैल्यां संक्षिप्तान् निबन्धान् व्यलेखिष्यत्तर्हि तस्यैव निबन्धा देशस्य प्रथमाः संस्कृतललितनिबन्धा व्यपादेक्ष्यन्त। निबन्धा इमे पञ्चाशत् (**महारण्यपर्यवेक्षणम्**) विंशतिः (**प्राप्तपत्रम्**) पंचत्रिंशत् (**उद्भिज्जपरिषद्**) इत्यादिसंख्यकपृष्ठप्रलम्बाः सन्ति। यद्यप्येषां शैली

प्रकामरमणीया। अत एवाद्य ललितनिबन्धत्वेन व्यक्तिव्यंजकनिबन्धत्वेन वा या शैली आधुनिकभारतीयभाषासु प्रचलिता तस्याः प्रथमो ललितनिबन्धकारो भट्टमथुरानाथशास्त्रीति कथयितुं शक्यत इत्यस्माभिः प्रस्तुतमभिमतम्। तदिदममिमतं डॉ. विष्णुकांन्त शुक्ल सदृशानां स्थापनामेवानुवदति।

अद्य हि विभिन्नासु भारतीयभाषासु यथा हृदयावर्जकानां ललितनिबन्धानां विधा लोकप्रिया तथा संस्कृतेऽपि तादृशान् सर्जन्तात्मक–प्रयोगान् कुर्वाणानां सर्जकानामुपस्थितिरुल्लेखनीया अस्ति। यद्यपि तेषां संख्याऽतिन्यूना। पं.परमानन्दशास्त्रि–विष्णुकांतशुक्ल–गणेशरामशर्मा–स्वामीनाथआत्रेय–को.ल.व्यासराजशास्त्रि–श्रुतिकान्तशर्म–प्रभुनाथद्विवेदीत्या–दिभिर्लेखकैः तादृशा एव ललितनिबन्धाः संस्कृतेऽपि सृष्टा यादृशा आधुनिकभारतीयभाषासु हिन्दीप्रभुतिषु दृश्यन्ते। परमानंद शास्त्रिणां 'जल' विषयमवलब्य जलसंबन्धिसमस्यानां सुललितं वर्णनं रुचिरशैल्या समुपस्थापयता ललितनिबन्धो लिखितो यस्य शीर्षकमस्ति **"वद रे मत्स्य! कियत्पानीयम्"**। मम ललितनिबन्धः **"मा च याचिष्म कंचन"** याचनाया ऋणग्रहणस्य, (चन्दा उगाहना) इत्यादेः प्रसंगानुद्भाव्य सुहृत्संलापरूपेण मनोरंजनं प्रस्तौति। अपरो निबन्धः **"छन्दसश्छटाः"** इति शीर्षकोऽपि सुहृत्संलापे एव छन्दोरचना, छन्दोभंगश्च कथं संजायते, छन्दस इतिहासेन देशेऽस्मिन् किं किं रुचिकरं कृतं किं च न कृतमित्यादि मनोरंजकविधया प्रस्तौति। एवं विधा निबन्धा अद्यत्वे संस्कृतस्य आधुनिकललितनिबन्धसाहित्यं प्रतिनिदधति, ललित निबनधस्य परिभाषां च चरितार्थयन्ति। एवंविधसाहित्यं संस्कृते स्वल्पतरं, (पद्यबद्धस्य काव्यसाहित्यस्य तु शतांशं सहस्रांश कोऽपि न स्पृशति) तस्य च पाठका अद्य वर्धन्त इति तादृशसाहित्यस्यापेक्षापि वर्धत इति स्वयं परिचिनुयुः सुधियः, किं वो मे विशेषनिवेदनेन?

****

सांप्रतिकं संस्कृतगद्यसाहित्यम् : समस्याः समाधानानि च

इच्छारामद्विवेदः

संस्कृतवाङ्मये गद्यसाहित्यं कस्यापि कवेः प्रतिभाया निकषत्वेन स्वीकृतं काव्यशास्त्रिभिः। संस्कृतवाङ्मये गद्यसाहित्यस्य यान्यपि प्रकाराणि समुपलभ्यन्ते वेदेभ्य आरभ्य सांप्रतं यावत्तानि सर्वाणि स्वस्वकालखण्डा-नुरोधवशात्स्वं स्वं नैजं वैशिष्ट्यं प्रकटन्तीति कोऽपि विचारशीलः पाठकः सम्यक्तया वीक्षितुं शक्नोत्येव । यजुर्वेदस्य गद्यात्मकमन्त्रेषु तदुत्तरवर्तिनि काले ब्राह्मणग्रन्थेषु च या गद्यशैली स्फुटतया यत्रकुत्रचिद्विराजमानाऽऽसीत् सा उपनिषत्सु यदावतरति तदा तत्र भावप्रवणतायाः, सरलतायाः शाब्दबोध-जनकताया च किमपि नूतनं हृद्यं च स्वरूपं प्रकटीभवति। कारणं किमस्ति? वेदेषु ब्राह्मणग्रन्थेषु च सिद्धान्त-स्तुति-यज्ञादीनां वर्णनप्रामुख्यात् तत्रत्यं गद्यं केवलं शाब्दिकं स्वरूपं धारयति तत्र नास्त्यवकाशः कलात्मक-गद्यांशानाम्। परन्तु उपनिषत्सु परमाध्यात्मिकरहस्य-प्रतिपादनवस्तुत्वात् हृदयावर्जकपदबाहुल्यमनुभूयतेऽत एव तत्रस्थ गद्यांशेषु यादृशी पदशैय्या प्रयुक्ता सा कमप्यलौकिकं मोदमारचयति सहृदयेषु ।

पुराणवाङ्मये पुनः संस्कृतगद्यसाहित्यस्य द्वितीयं व्यावहारिकं च रूपमुपलभ्यते। महाभारतादीतिहासग्रन्थेषु श्रीमद्भागवत-विष्णुपुराणादिषु च ये गद्यांशाः दृष्टिपथमवतरन्ति तेषामनुशीलनेन ज्ञायते यद् भाषायाः प्रवाहे उपनिषदां माधुर्यं तथा चार्षकवेर्व्यासस्य कल्पनाशीलत्वञ्च युगपद् अनुस्यूतं भवति। श्रीमद्भागवतस्य पञ्चमस्कन्धीयो गद्यांशः षष्ठस्कन्धीयश्च गद्यांशः विष्णुपुराणस्य गद्यांशाः महाभारतस्य चादिपर्वणः गद्यांशाः सर्व एव प्रथमत उपनित्कालस्थगद्यशैली-समर्थनं पिशुनयन्ति द्वितीयतश्च स्वसामाजिक-व्यवहारमात्मसात्कृत्वा व्यासस्य कविप्रतिभानञ्च समर्थयन्ति। यतो हि तत्र दृश्यते अलंकारयुक्ता पदावलिः। इदं खलु स्पष्टं परिवर्तनं वैदिकगद्य-साहित्याल्लौकिकगद्यसाहित्यस्य।

बाल्मीकि-व्यासयोरनन्तरं प्रसृते संस्कृतगद्यसाहित्ये प्रमुखतो दृश्यते नाटकानां वाक्यव्यापारात्मकी गद्यरचना। इयं गद्यरचना संवादप्रमुखत्वात् तथा च नाट्यनिर्देशनतत्त्वसंकलनात् स्वीयं पारिभाषिकं रूपमादधाति। यत्र नाटकेषु संवादात्मका अंशाः सम्भवन्ति तत्र प्रायशः कविभिः भाषायाः प्रभेदेषु प्रयोगो विहितः। नैके सन्ति नाटककाराः संस्कृतवाङ्मये भास-कालिदास-श्रीहर्ष-भवभूति-भट्टनारायणसदृशाः येषां वाक्यरचनाप्रकारः कमपि पाठकं हठादेव समाकर्षति। परन्तु नाटकेषु दृश्यानां बाहुल्यान्नारित

रचुरोऽवकाश सुदीर्घस्य गद्यबन्धस्य। मध्ये मध्ये श्रोतृसुखावहानि पद्यानि संगीतकानि च प्रयुज्यन्ते नाटकेषु येन गद्यरचनायाः कलेवराणि क्षीयन्त एव।

एवमेव चम्पूकाव्येष्वपि चमत्कारप्रदर्शनधिया विकटपदबन्धसंयुता–लङ्कारभारभरिता या शैली कविभिः स्वीकृता गद्यसाहित्ये सा कविकर्म–निष्णातानां विदुषां मनोमोदायैव भवति न पुनःजनसामान्याय। अतएव **नलचम्पूः-विश्वगुणादर्शचम्पूः-भारतचम्पूः-आनन्दवृन्दावनचम्पूः-भोजचम्पू-रामायणादि**प्रसिद्धेषु चम्पूग्रन्थेषु विदुषामेवादरोऽधिकत्वेन दृश्यते।

संस्कृतगद्यसाहित्ये ये पुनः गद्यसाहित्यप्रर्वतकरूपेण विद्यन्ते ते सन्ति सुबन्धु–बाणभट्ट–दण्डीति नामकाः स्वनामधन्या लेखकाः। सुबन्धोः वासवदत्ता यदि कवेः शब्दार्थसंग्रहपाटवं निदर्शनरूपेण प्रस्तौति ततो बाणभट्टस्य **कादम्बरी** स्वशब्दार्थगौरवेण स्वालङ्कारवैभवेन, स्वारस्यसमर्थनेन चाद्यापि सेमषां संस्कृतगद्यसाहित्यकाराणां कृते कामपि दिव्यां निकषभूताञ्च कलां प्रकटयतिः। महाकवेर्दण्डिनो **दशकुमारचरित**स्य गद्यशैली नितरां प्रवाहपूर्णा। तस्य पदलालित्यं सर्वथा मनोहारि ।

एवं खलु दृश्यते यत् प्रथम–ईशवीयाब्दतः पञ्चम ईशवीयाब्दं यावत् गद्यस्य यत्स्वरूपमासीत्तत् जनसामान्यस्य स्वाभाविकीं प्रक्रियामनुसरति। संस्कृते गद्यसाहित्यस्य यान्यपि रूपाणि दृश्यन्ते तानि सर्वाणि राज्याश्रिताया भाषाया अलङ्करणप्रधानतां प्रकटयन्ति। तत्र न केवलं कठिनपदबन्धानां प्रयोगो दृश्यतेऽपितु सरलार्थपद्धतिप्रयोगान् प्रति कवीनामरुचिश्च साक्षात्कर्तुं शक्यते। कारणं तदेव सामाजिकव्यवस्थायां राजतन्त्रस्य प्राधान्यं, भाषायाः विदग्धगोष्ठीमण्डनत्वं, पण्डितप्रवरेषु स्ववैदुषीसमर्थनाकाङ्क्षा च कवीनां मनस्सु पौनःपुन्येनोदेति स्म येन विवशास्ते भाषायास्तादृशं स्वरूपमेव स्वीचक्रुः।

परन्तु सर्वथा एतादृशी एवावस्थासीदित्यपि नास्ति समीचीनम्। तस्मिन्नपि काले सामान्यजनप्रतिबोधनाय गद्यस्य किमपि सरलं मनोहारि च रूपं प्रसृतं कविभिः। पंचतन्त्रस्य गद्यशैली अस्मिन् विषये स्वीयं नैजं वैशिष्ट्यमादधाति।

विंशतिशताब्द्यां पुनर्जागरणकाले दृश्यते संस्कृतगद्यसाहित्यस्य नवोन्मेषो यत्र नैके उपन्यासाः नैकानि नाटकानि नैके प्रबन्धा नैके कथाग्रन्थाश्च गद्यसाहित्यस्य श्रीवृद्धिं चक्रुः। पण्डितअम्बिकादत्तव्यासस्य शिवराजविजयादारब्धा संस्कृतगद्ययात्राद्यावधि निरुपधिरूपेण प्रवहति। श्रीपादहसूरकर–पण्डिताक्षमाराव–मूलशङ्करयाज्ञिकं–बसन्तत्र्यम्बकशेवडे–प्रभूतिभिः लेखकैः प्रचुरमात्रायां गद्यरचनं विहितम्। विंशशताब्द्याः पूर्वार्द्धे संस्कृतगद्यरचनायां विषय आसीत् प्रमुखरूपेण स्वातंत्र्यसंघर्षः। तात्कालिकी

देशव्यवस्था समाजव्यवस्था च तथाऽऽन्दोलयत्कवीनां लेखकानाञ्च चेतांसि यत्तेषां लेखने पौनःपुन्येन सैव राष्ट्रिया भावना ता एव सामाजिक्यः समस्याश्च प्रादुर्भवन्ति स्म यासामनुभवस्तैः क्रियते स्म। परन्तु स्वातंत्र्योत्तरे भारते नवस्वतंत्रतानुभूते जीवने, शनैः शनैश्च वैश्वीकरणव्यवस्थायां परिवर्तिते भूगोलमण्डले परिव्याप्ते च भुवने संचारक्रान्तिमाध्यमेन सुलभीभूते च प्रकाशनतन्त्रे मन्ये प्रादुर्भूतः कश्चन महानदः संस्कृतरचयानां गद्यसाहित्ये अपि। अनया दृष्ट्या वर्तमानसमयः स्वर्णयुगत्वेन ख्यापितः कैश्चित्समीक्षकैः।

सांप्रतं कापि संख्याविहीना पङ्क्तिः दृश्यते लेखकानां या खलु प्रत्यहं सूते गद्यशिशून्। परन्तु दैनिक–साप्ताहिक–मासिक–त्रैमासिक–वार्षिक–पत्रपत्रिकासु तथा विविधकथोपन्यास–लघुकथा–व्यंग्यकथा–स्पशकथा–टुप्कथादि–नूतनेषु प्रयोगेषु नाटकचम्पादिकाव्येष्वपि संस्कृत–गद्यस्य विरचने ये निरतास्सन्ति तेषां कोटित्रयं कर्तुं शक्यते। प्रथमास्ते ये खलु संस्कृतस्य पारम्पारिकं गरिमाणं स्वायत्तीकृत्य भाषायाः प्राञ्जलत्वं सुरक्षयन् स्वानुभूतिसंवर्द्धनपुरस्सरं सामाजिकसमस्यानां विषये साधिकारतया लेखनीमग्रे सारयन्ति। ते वर्तन्ते सुपठिताः सुविज्ञाः सुविचारकाः समर्पण–धुरीणाः साहित्यिकाः डॉ. अभिराजराजेन्द्रमिश्राः, डॉ. राघावल्लभत्रिपाठी, डा. श्रीपादहसूरकरः, डॉ. भास्कारचार्यत्रिपाठी, डॉ. रमाकान्तशुक्लः, देवर्षि कलानाथशास्त्रिप्रमुखाः। एते सर्वेऽपि विद्वांसः प्रायशः सावधानतया विषयोपस्थापनं, शैलीप्रयोगं शब्दचयनं, भावसम्प्रेषणीयत्वं च व्यञ्जयन्ति। द्वितीया पंक्तिरस्ति तेषां लेखकप्रवराणां ये सन्ति संस्कृतभाषया सह परिचिताः परन्तु न ते संस्कृतस्यात्मानं परिचिन्वन्ति तेषां लेखने नूतन–विषयाणामाविर्भावस्तु भवति परन्तु भाषायाः शैथिल्यात् स्वविचारप्रस्तावे न भवति तादृशी प्रभाविकता यया पाठकस्य सहृदयस्य वा मनसि समुद्भूतं भवेत् कश्चनान्दोलनम्। तेषां रचानसु वैविध्यं बहु वर्तते परं तत्सर्वमुपरि उपर्येव विषयस्य संस्पर्शं कुरुते नान्तःप्रविश्य गभीरं विवेचनं प्रतिपादयितुम् उत्सहते। एतादृशेन गद्यप्रबन्धेन गद्यसाहित्यस्य केवलं शरीरमुपचीयते न पुनस्तस्यात्मसंस्कारो भवति न चात्मपरितोषो जायते। यथा समाचारपक्षीय–साहित्यं भवति तथैव तदपि लेखनं प्रतीयते। अस्यां पंक्तौ नैके विराजन्ते महारथिनस्तेषां कृते प्रणिततिः निवेद्यते ।

तृतीया च कापि सर्वथाऽभिनवा प्ररोचना जागर्ति सांप्रतमेकविंश–शताब्द्यां यत्र वैश्वीकरणस्य प्रबलाघाताद् हठात्समुत्पन्ना नैके लेखनधुरन्धराः साहित्यकारम्मन्या अहर्निशं सुरभारतीकोषागारं पूरयितुं सन्नद्धाः प्रयतन्ते। तत्पूरणं रत्नैर्भवतु काचखण्डैर्वा भवतु विषयेऽस्मिन्तेषां नास्ति निष्ठा। तैस्तुं केवलं स्रज्यन्ते किं सृज्यते? कथं सृज्यते, कं वा हेतुमभिलक्ष्य सृज्यत इति

न तेषां कृते प्रश्नः। संस्कृतभाषायाः सरलीकरणप्रकियायां तादृशैर्महानुभावैः या पद्धतिः स्वीकृता सा पाणिनीयत्वं, प्राञ्जलत्वं, गाम्भीर्यत्वं, तथा च सहस्राब्देषु सुरक्षितां भाषायाः मर्यादां च कुत्र नेष्यतीति त एव जानन्तु न मादृशा अल्पधियः।

लोकतंत्रे वर्तते लेखनस्याधिकारः सर्वेषां कृते। किन्तु किं लेखनीयम्, कथं लेखनीयम्? कियत्परिमाणं लेखनीयम्? किं च प्रकाशनीयम् इत्येतत्सर्वं समालोचनीयं सुधीभिः? यदि लेखनेनैव प्रसृता स्यात्कापि विचारविहीना, समुच्छृंखला च परम्परा तर्हि सा कुत्रास्माकं संचितं गौरवं स्थापयिष्यतीति विचारणीयमेव। यदि भाषायाः प्रचार एवास्माकमुद्देश्यस्तर्हि सर्वं भवतु परन्तु तत्सर्वं गद्यसाहित्यमितिनाम्ना मा व्यवहृतं भवेत्।

लोकभाषायामपि रचनां कर्तुं शक्यते पंचतंत्रवत्। शास्त्रभाषायामपि रचनां कर्तुं शक्यते कादम्बर्यादिवत् परन्तु तस्याः कृते सुपठित–सुविचारित–परम्पराया महती आवश्यकता। अयमाशयो नास्ति मत्प्रबन्धयास्य यत्संस्कृते नूतनलेखनस्य प्रचार एव मा भवेत्। ममाशयोऽस्ति संस्कृते मूल्यवत्तासमर्थन पुरस्सरं गद्यसाहित्यस्योपबृंहणं भवतु। किंकारणमस्ति यत् बांग्ला–ओडिया–तेलंगु–कन्नडादि–क्षेत्रभाषासु विरचितानां ग्रन्थानां कृते साहित्यैकादेमी, ज्ञानपीठादि–पुरस्काराः प्रदीयन्ते न पुनः संस्कृतेऽद्यावधि तादृशी व्यवस्था जाता। यद्यपि पुरस्काराः कास्यापि भाषायाः वैशिष्ट्यं न ख्यापयन्ति तथापि त्रेषां सामाजिकं महत्वन्तु दर्शयत्येव।

अहं कृतांजलिः सन् भूयो भूयो विदुषां समक्षं विनिवेदयामि यत् पाश्चात्यलेखकजगति या परम्परा विद्यते तस्या या किंचिदनुपालनं विधायात्र संस्कृतेऽपि प्रमुखलेखकानां नवलेखकानां च पारस्परिकाः संवादाः गोष्ठ्यः समीक्षासत्राणि, लेखनशिविराणि, तथा च व्याख्यानानि भवेयुर्येन गुणवत्–साहित्यस्य प्ररोचना भवेत्। पुष्कलपरिमाणेऽपि यदि तत्र न लभ्यते गुणवत्ता तदा तस्य वस्तुनः स्वीकरणं समाजे नैव भवतीति सत्यमेव। समग्रेऽपि विश्वे ये सन्ति संस्कृतलेखकाः ते सज्जीभवन्तु तपश्चरणपूर्वकं साहित्यसमाराधनाय येन संस्कृतगद्यसाहित्यमपि पुनः गौरवपदमारोहेत्।

****

अभिराजराजेन्द्रमिश्रस्य कथानां समीक्षणम्

दीक्षितपुष्पा

को न पश्यति संस्कृतकवितारसिकः कविराजस्याभिराजराजेन्द्र–मिश्रस्य काव्यगाने दोधूयमानां यशःपताकाम्। इयं जीवितदुर्नदी यौवनोत्कट–कल्लोला वहत्कामादिसलिललोलसिफेनिला परावर्तमहावर्ता बन्धूनां स्नेह–वागुरासु निबद्धाप्यजस्रं वहन्ती वितते कालसागरे च निपतन्ती केनासकृन्न दृश्यते। परमहर्निशमपि तां दृष्ट्वा सर्वेषां मनःसु समानमान्दोलनं न जायते। केचित्पश्यन्तोऽपि न पश्यन्ति। केचिद् दृष्ट्वापि स्थाणुवत् निर्विकारा–स्तिष्ठन्ति। परन्तु यः कोऽपि दृश्यं पश्यन् दृश्यमेव भवति, तस्यैव हृदयं निर्मथ्य काव्यझरी हठान्निःसरति।

'राङ्गडा' इत्याख्ये कथासंग्रहे कविरयं भारतीयजीवनस्य नास्ति कोऽपि पक्षो यं न स्पृशति। कथा एताः पाठकस्याक्ष्णोः पुरस्तान्नृत्यन्त्य इव प्रतीयन्ते। अनवसितां कथां विहाय विरन्तुं पशुर्वा पशुपतिर्वा प्रभवति नान्यस्य कस्यचिच्छक्तिरस्ति कथामध्ये विराममधिगन्तुम्।

महती सूक्ष्मेक्षिका वर्तते कविराजस्यास्य। कस्य गेहेषु न प्रविशन्ति मार्जार्यः। पालिताश्च ताः कस्य पादयोर्न संश्लिष्यन्ति। किन्त्वस्य कथा–नायिका मार्जारी 'कुक्की' गृहे श्मशानवेताल इव विचरतो सर्वथैकाकिनो शुष्ककाष्ठोपमस्य नायकस्य पादयोर्लुठन्ती तस्य जीवनसरणिमेव परिवर्तयतीति चिन्तयति वराकः – 'अयि नियतिशैलूषि! अकृतदार–परिग्रहोऽस्मि। नाग्रे कोऽपि न पश्चात्। सर्वथा निर्गृहघट्टोऽस्मि, रजक–सारमेय इव। मायां नानुभवामि। ममत्वं न परिचिनोमि। करुणामुपेक्षे। दयां तिरस्करोमि। किमपि बन्धनं नाङ्गीकरोमि। एकल एव जातोऽस्मि। एकल एव दिवं गन्तुमपि समीहे। हन्त! यदि मां भार्यासहायीकर्तुमेव व्यवसितासि तर्हि किमियं दुर्भगा दुष्टा मार्जार्येव त्वया समवाप्ता। कस्य जन्मान्तरस्य ममेयं परिणीता, या मम पादाम्बुजयोः प्रणतिमुपदर्शयन्ती स्वपातिव्रत्यम् अनुपालयति'।

एकस्या मार्जार्या माध्यमेन सर्वो नारीधर्मः सर्वश्च मानवधर्मः कविना उपस्थापितः – 'मार्जारकुलसमुत्पन्ना केयम्। सर्वथा तपस्विनी मानवीव समाचरति। न स्वप्नेऽपि वल्लभेतरं मार्जारं पश्यति। न वा शावकौ मुहूर्त–मात्रमप्यरक्षितौ त्यजति। मानवी गृहवधूरपि सौशील्यमार्जवमीदृशं न सहजं बिभर्ति'। मार्जारीशावकयोर्जन्ममङ्गले हर्षामोदसम्भारविह्वल उन्मत्त इव ट्रांजिस्टरध्वनिं स्फारीकृत्य निष्कलङ्कायसपिठरं मुरजीकृत्य वादयन्,

प्राचेतसस्य मे कुशीलवामिमौ जनितावित्युक्त्वा शून्यकक्षे चैकाकी नृत्यन्, तेषां कृते च किलोपरिमितं दुग्धं नित्यं क्रीडन्नयं नायकः कथं कथं मार्जारीकुलस्याध्यक्षतामुपैतीति सर्वमतिसरसं हृदयावर्जकञ्च।

बालीद्वीपाधीश्वरी राज्ञी महेन्द्रदत्ता यदा कापालिकैः सहाहर्निशं तन्त्राभिचारसाधनसम्पादने निरता, तदा सर्वा एव प्रजा दैहिकदैविक–भौतिकभयैराक्रान्ता सञ्जाता। कश्चिद् खञ्जः, कश्चिद् कुब्जः, कश्चिद् कुष्ठी, कश्चिद् धनुष्टङ्कारोगाक्रान्तः, कश्चिदन्यरोगैरिति बालकानामपि सकरुणमाक्रन्दनं श्रुत्वा सूर्यवंशीय आर्यधर्ममर्यादापक्षधरो राजा धर्मोदयनदेवः प्रजाजनस्य विपत्तिकारणभूतां गर्भभरालसां राज्ञीं तत्याजेत्यार्यधर्मपरस्य प्रजारक्षकस्य सत्यधर्मपरायणस्य राज्ञो धर्मोदयनदेवस्य चरित्रं कस्य न हृदयं निर्मथ्नाति।

नारीहृदयस्योद्घाटने दक्षोऽयं कविस्तस्या नानारूपाणि प्रचिकटयिषु–र्दूरीदृश्यते। क्वचिच्छान्तं, क्वचित्क्रूरं, क्वचित्सरसं क्वचिद्रौद्रं क्वचित्कुसुमाद् अपि पेलवं क्वचिच्च राक्षस्या अपि कठोरतरं रूपं बिभ्राणा मानवी महिषा–सुरमर्दिन्यपि संजायते। कथास्वेतासु नार्यो सर्वेष्वेतेषु रूपेषु विलसन्त्यः पाठकस्य मर्माणि भृशं निकृन्तन्ति।

कस्य न मनोऽत्र भोगभोगिश्रितेष्वनेकदुःखदर्दुरधारिषु मोहान्धकूपेषु पूरेष्वनेकधा न विनिमज्जति। को न जानाति यद् दुःखजालमिदं नाम यत्किञ्चिद् जगतीगतम्। तथापि *'सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः'* इति कृत्वा सर्वोऽयं लोको सुखसंचयार्थमाकुलोऽनेनान्तःप्रविश्य निपुणं निरीक्ष्यते।

महानगरीनाम्नि रेलयाने, यात्रां कुर्वती, पतिं पुत्रान् च बहुविधैः यत्नैर्भोजयन्ती लालयन्ती च, प्रबलजिघत्साकुला नायिका स्वभ्रातृव्यायै बालिकायै कणमेकं न ददती, परिचर्या च तया स्वकीयां सर्वविधां कारयन्ती कस्य मनसि मर्माघातं न करोति।

जगत्यत्र कालानिलबलोद्धूताज्जर्जराज्जीवितद्रुमात् भोगपुष्पाणि दिवसपत्राणि च सततं निपतन्ति। अयथार्थक्रियारम्भैः कदाशावेशपल्लवैः तुच्छैः कर्मभिः कस्यायुर्न क्षीयते। किन्त्विन्द्रियोरगगर्तेषु मरणश्वभ्रभूमिषु तृष्णाकरञ्जकुञ्जेषु कामकोलाहलेषु च वासनावनजालेषु जन्मकूपान्तरेषु च दुःखदावाग्निदाहेषु पातोत्पातदशालक्षैर्मज्जनोन्मज्जनभ्रमैराविर्भावतिरोभावै–राशापाशविचेष्टनैः सततं लुठतामत्रत्यानां जनानां हृदयेषु वर्तमानं चीत्कार–मयमेव कविः शृणोति।

'सिंहसारि'रित्यस्याः कथाया नायिका दिदिशा स्वकीयं प्रथमं पति–ममृताङ्गं घातयन्ती, द्वितीयं पतिं राजकं च घातयन्त्यपि सहृदयानां मनांसि

भृशं मोहयतीति वैलक्ष्यण्यमिदमस्यैव कवेः कथोपस्थापनप्रकारस्य महिमा–भिव्यनक्ति।

रुदती नारी भिक्षुकी वा स्याद्, राज्ञी वा स्यात्, साक्षात्परमेश्वरी वा स्यात्, दयनीयैव भवति। अश्रुभिस्तया सर्वं रहस्यमुद्घाट्यते। सर्वमपि गौरवं लघुक्रियते। धूमलेखेव नारी सर्वावस्थितिस्वीकृतिक्षमा। यथा धूमलेखा घटे, कक्षे, वितताम्बरे वा तदाकाराकारिता सती सुखं तिष्ठति, तथैव नारी नियतिप्रदत्तं सर्वमप्यवस्थाविपर्ययं स्वीकरोत्येव (**सिंहसारिः**)।

गेहेऽनुरक्तायां साध्व्यां पुत्रद्वयस्य जनन्यां पत्न्यां सत्यामपि, नियतिपराधीनो नायको निहालो यां द्वितीयां पत्नीं सुशीलां शुश्रूषापरायणां महुलीमानयति, सापि पाठकानां हृत्सु हठात्प्रविश्य तेषामात्मीयभावमर्जयत्ये–वेति कवेरेव प्रतिभावैलक्ष्यणम्।

'राङ्गडा' इत्यस्याः कथाया नायिका, ईशानविक्रमधर्मोत्तुङ्गदेवस्य राज्ञमहिषी बालीद्वीपाधीश्वरी राज्ञी महेन्द्रदत्ता, चतुर्ण्णामपत्यानां जनन्यपि बुरवनारण्यं प्रविश्य विषोच्छ्वासमुद्गिरन्ती कालसर्पिणीव कथं कथं कापालिकानां दुःसङ्गैस्तन्त्रग्रन्थानामसकृदालोचनैः सहजाकुलजामाला–डाकिनीशाकिन्यादिवशीकरणैः विषूचिकायक्ष्मकुष्ठधनुष्टङ्कारादिदारुणासाध्य–रोगाकर्षणैः प्रजाजनरक्तपिपासुर्यातुधानी सञ्जातेति सर्वमतिरौद्रमतिभयानकं हृत्कम्पोत्करं नारीणां मर्यादोत्सारणे चालम्। प्रजायाः रक्षार्थं सा पत्या परित्यज्यते, तदर्थमेव च पुत्रेण कापालिकसाहाय्येन घात्यत इति सर्वं नार्या एव स्वरूपं वर्तते।

कथं च परसुखासहिष्णवो हि नार्यो सोहार्दमभिनीय रहस्यानि निर्गमयन्ति, पश्चाच्च तैरेव दिव्यास्त्रभूतैः प्रहृत्य मर्माणि भिन्दन्ति। कथं च कपटनाट्यसूत्राणि धारयन्त्यः स्नेहाचारमभिनयन्त्योऽलीकार्जवं प्रदर्शयन्त्यश्च रहस्यगोपनशपथपुरःसरं सकूटोपदेशमन्येषां मनोभावान् ज्ञात्वा घ्नन्तीति बहुज्ञता कवेः।

पल्लवानि मारुत इव कथा एताः पाठकानां मनांसि बहुशः क्षोभयन्त्येव। भाषाया अद्भुतः प्रवाहो वर्ततेऽत्र। वर्णनेषु भाषा संश्लिष्टा–लंकारैश्च शोभाढ्या वर्तते। क्वचिदुपमाः क्वचिदुत्प्रेक्षास्तु मनो हरन्त्येव किन्तु स्वभावोक्तयस्तु हृदयं नितरामाह्लादयन्ति।

'तिवारी शिवमूर्तिः दन्तच्छिद्रेषु संसक्तान् अन्नकणान् आढकीषिकया–पसार्य गण्डूषजलैर्मुखं प्रक्षाल्य मौञ्जीं खट्वां तलिच्छकावृतां शाल्मलितूलो–पधानां गत्वाधिशिश्ये'। अवसरं निभाल्य निहालोऽपि तच्चरणौ संवाहयितु–मुपचक्रमे। निहालस्वसा तावदेव ताम्बूलवीटिकामुपादाय श्वशुरसमीप–

मुपाजगाम। इत्येतादृशैश्चानेकैर्वर्णनैः कविः **'पोतविहगौ'** इत्याख्यायां कथायां भारतीयग्राम्यजीवनशैलीमक्ष्णोः पुरस्ताद् हठादुपस्थापयति।

वर्णनप्रधानस्थलेषु परिसंख्यायाश्चमत्कारश्चित्तं चमत्करोति, बाणभट्टं च स्मारयति। 'प्रशासति तस्मिन् महाविक्रमशालिनि भूभुजि असत्यं नर्मवाक्येषु वा स्त्रीषु वा, भयं राजदण्डेषु वाऽधर्मचरणेषु वा, आसक्तिः पुत्रकलत्रादिषु वा देवतासु वा, रतिः स्वप्रमदासु वा परोपकरणेषु वा, पराक्रमः कर्तव्यनिर्वहणेषु वा समराङ्गणेषु वा परिनिष्ठित आसीत् **(राङ्गडा)**।

उपमा अपि मनोहराः सन्ति। 'धर्मोदयनदेवः समुद्गिरद्धूम इव ज्वालामुखभूधरो मुषित इव, खलीकृत इव, सर्वजनसमक्षं न्यक्कृत इव, क्षणं मूढ इवावतस्थे'।

रसप्रधानस्थलेषु सैव शैली संश्लेषविहीना प्रसादगुणमयी च संजायते। यथा बाणभट्टः – "सखे ! पुण्डरीक ! नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः।" तथैव कथास्वेतास्वनेकत्र बाणभट्टायतेऽभिराजः – 'राजमणे! मित्रमसि, बन्धुरसि। बालसहाध्याय्यसि। कन्यायाश्च मम श्वशुरो भविष्यन्नसि **(चञ्चा)**।

तथा च – 'दग्धमार्जवम्। गतं गौरवम्। विलुलितं वैभवम्। विनष्टो विश्वासः। कलङ्कितोऽनुरागः। जितं पञ्चशरेण' **(कुक्की)**।

हिन्दीभाषयाः सर्वप्रचलिता लोकोक्तयः कथास्वेतासु यथावत् संस्कृते प्रयुज्यमानाः महता प्रभावेण न कस्य मनो हरन्ति। यथा–

भाष्ट्रे गच्छतु तवोष्णं शीतलं वा।

(भाड़ मे जाये तुम्हारा गरम और ठंडा।) **(कुलदीपकः)**

भ्राष्ट्रे गच्छतु तव समाधानम्।

(भाड़ मे जाये तुम्हारा समाधान) **(चञ्चा)**

अविद्यमाने वेणुदण्डे वेणुरपि नाधमिष्यति।

(न रहेगा बाँस न बजेगी बाँसुरी) **(अधमर्णः)**

भूमौ स्थित्वा हिमांशुपरिरम्भाकाङ्क्षा न जातु करणीया।

(जमीन पर रहकर चन्द्रमा पकड़ने की इच्छा नहीं करना चाहिये।) **(चञ्चा)**

परिणयोऽयं न पुत्तलिकाक्रीडानम्।

(ये विवाह है, गुड्डा गुड्डी का खेंल नहीं।) **(चञ्चा)**

तन्मुखभञ्जनार्थमसौ सद्य एवोद्यतो बभूव।

(वह तुरन्त उसका मुँह तोड़ने को तत्पर हो गया।)**(चञ्चा)**

सारमेयमिमं मध्येन्यायालयं नग्नं करिष्यामि, येन न जीवितुं न मर्तुं शक्नुयात्।

(इस कुत्ते को न्यायालय के बीच में ऐसा नंगा करूंगी, कि न जी सकेगा, न मर सकेगा।) **(चञ्चा)**

शीर्षे एको बालस्ते नावशिष्टो भविष्यति।

(एक भी बाल नहीं बचेगा तेरे सिर में।)**(चञ्चा)**

पत्नी शनिदेव शिरस्यारूढा।

(पत्नी, शनि की दशा के समान सिर पर सवार है।) **(पोतविहगौ)**

पत्नी शनिदशेव शिरस्यारूढा।

(पत्नी, शनि की दशा के समान सिर पर सवार है।) **(पोतविहगौ)**

कृष्णमुखी कुवीर्यजातेयं केन सम्बन्धेन त्वया सह सम्बद्धा।

(न जाने किसकी औलाद यह कलमुँही तुमसे कैसे सम्बन्धित हो गई ?)

(पोतविहगौ)

कज्जलावलिप्तं मम मुखं जातं तवानेन कर्मणा।

(तुम्हारे इस कर्म से तो मेरे मुँह में कालिख पुत गई है।) **(पोतविहगौ)**

मार्जारपुत्रक! अधिवक्तुः पुत्रस्त्वम्।

(अरे बिल्ली के बच्चे, नहीं जानता कि तू वकील का बेटा है।) **(कुलदीपकः)**

कियन्त एव प्राध्यापकपुच्छा मयावलोकिताः।

(जाने ऐसे कितने प्राध्यापक मैंने देख रहे हैं।) **(चञ्चा)**

अलं तिलं तालीकृत्य।

(अरे मत बनाओ तिल का ताड़।) **(पोतविहगौ)**

जलं निजाधारतलं स्वयमेव मार्गयति।

(पानी अपना रास्ता खुद ढूँढ लेता है।) **(सिंहसारिः)**

कान्तारे नर्तितो मयूरः केन दृष्टः।

(जंगल में मोर नाचा किसने देखा।)**(राङ्गडा)**

प्रेम्णि का प्रमाणमीमांसा।

(प्रेम में क्या प्रमाण।) **(एकचक्रः)**

परिणीता भार्या महुल्याश्चरणप्रक्षालनसमतामपि न बिभर्ति।

(तुम्हारी औरत इस महुली के पैर का धोवन भी नहीं हैं।) **(पोतविहगौ)**

अहमस्मि ते चरणधूलिः।

(मैं तो तुम्हारे पैरों की धूल हूँ।) **(पोतविहगौ)**

क्वचिदाङ्लभाषाया लोकोक्तयोऽपि संस्कृतेन प्रयुक्ताः सन्ति –

प्रेम्णियुद्धे च सर्वं युक्तियुक्तम्

(Nothing is unfair in love and war.) **(पोतविहगौ)**।

द्यूते प्रणये सर्वमेव युक्तियुक्तं भवति।

(Nothing is unfair in love and gamble.) **(सिंहासारिः)**

महाकवीनां काव्यसरणिमनुगच्छतोऽस्य काव्येषु तेषां कवीनां पदावल्योऽपि हठात् प्रतिबिम्बन्ति –

यथा शाकुन्तले – 'हृदय मोत्ताम्य'।

तथैवात्र 'भवतु अलमुत्ताम्य'। परिहासविजल्पितमेतत् **(एकचक्रः)**।

शाकुन्तले – 'सखे चिन्तय तावत् केनापदेशेन पुनराश्रमं गच्छामः।'

अत्र – केन व्यपदेशेनाश्रमपदं गच्छेयम् इत्यासीन्ममापि सम्भावनाविधुरा दौष्यन्ती स्थितिः **(एकचक्रः)**।

शाकुन्तले – 'किमिति जोषमास्यते भवता?'

तथात्र – मत्प्रश्नमप्रतिवचनीकृत्य कथं जोषमास्यते भवता **(राङ्गडा)**।

शाकुन्तले – 'मय्येव विस्मरणदारुणचित्तौ',

तथात्र – सोऽयं विस्मरणदारुणचित्तवृत्तिर्दुष्यन्तः कुक्क्याः?

शाकुन्तले – 'परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः।'

तथैवात्र 'परिहासविजल्पितमेतत्' **(एकचक्रः)**।

'महुलि! तदासीत् परिहासविजल्पितम्' **(पोतविहगौ)**।

शाकन्तुले – 'अयं तावत् प्रथमं पिबतु इति अनुकम्पिनोपच्छन्दित उदकेन।'

अत्र – तर्हि कथं मामुपच्छन्दितवानसि।

यथोत्तररामचरिते – 'अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः।'

तथैवात्र – पुटपाकप्रतीकाशौ ददाहान्तर्दाहेनैव **(कुक्की)**।

यथा किरातार्जुनीये – 'तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।'

तथैवात्र – 'निरस्तनारीसमया कापालिकधर्म– निरतेयम्' **(राङ्गडा)**।

यथा भासस्य स्वप्नवासवदत्ते – 'चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः',

तथैवात्र – 'चक्रारपङ्क्तिरिव सा कदाचिदुच्चैरारुरोह कदाचिच्च नीचैरवतस्थे।'

यथा कालिदासो रघुवंशे –

'स्थितः स्थितामुच्चलितः प्रयातां, निषेदुषीमासनबन्धीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्'।

तथैवात्र – 'यस्मिन् यस्मिन् कक्षे गच्छामि तत्रैव सापि गच्छति। यदि भूमावुपविशामि तर्हि निभृतं स्थिता मां प्रतीक्षते। समुत्थाय प्रचलिते मयि

सापि प्रचलति। मम क्रोधं, नैष्ठुर्यं विद्वेषं प्रणयाद्यप्रदर्शनं च सर्वथावधूय सा छायेव मामन्वगच्छत् (**कुक्की**)।

कविरयं बाह्याभ्यन्तरान् भावान् स्थूलान्, सूक्ष्मान् सूक्ष्मतरानपि संकल्पकल्पितान् कथासु निबद्धय सहृदयेभ्यश्चक्षुर्विषयं करोति। यथा पुष्पेष्वामोदस्तिलकणेषु तैलं, रसजातिष्विवास्वादस्तथैवास्य कविराजस्य कथासु सर्वोऽयं लोकः। अन्तःशुष्कद्रुमस्य तनाविव तनुषु सर्वेषां कामकोपात्मका अजगराः स्फूर्जन्तः सर्वैरेव दृश्यन्ते। परमपरगोचराणामन्येषां हृदयस्य भावानां साक्षात्कारो येन कर्तुं शक्यते स एव कविपदभाग्जायते। सम्बन्धः कोऽस्तु नः कामैर्भावाभावैरथेन्द्रियैरिति विज्ञातुं महती शक्तिरस्त्यस्य कविराजस्य।

सर्वदा सर्वसंस्थेन, सर्वेण सह तिष्ठता, सर्वकर्मरतेन, सर्वचिन्तासु सर्वचेष्टासु सर्वेष्वपि वस्तुषु सक्तमिव प्रतिभासमानेनाप्यनेन न जाने केन विधिना केवलं काव्येन सह संसज्यत इति विस्मयावहम्।

जयत्वेष कविराजोऽभिराजोऽस्माभिः सर्वैः संस्कृतानुरागिभिः सर्वदा शुभाशीर्भिर्वर्धाप्यमानः। दोधूयताञ्चास्य यशःपताका कल्पान्तं संस्कृतकाव्याकाश इति शम्।

****

भट्टश्रीमथुरानाथशास्त्रिणो गद्यसाहित्यम्

रमाकान्तपाण्डेयः

जयपुरवैभव–साहित्यवैभव–गोविन्दवैभवादि–विविधकाव्यग्रन्थप्रणेतुः श्री मथुरानाथशास्त्रिणो यथैव पद्यप्रणयने दृश्यतेऽप्रतिहता गतिस्तथैव गद्यबन्धप्रणयने–ऽपि। महाभागेनानेन उपन्यास–लघुकथा–ललितनिबन्धादि–गद्यविधासु प्रभूतं साहित्यं प्रणीतमितिं तद्विरचितं गद्यसाहित्यमिह चतुर्धा विभज्य संक्षेपेण समीक्ष्यते।

१. उपन्यायग्रन्थाः

भट्टमहाभागानां त्रय उपन्यासग्रन्थाः **प्रख्या**याः षष्ठे स्पन्दे प्रकाशिताः सन्ति – १ **आदर्शरमणी**, २ **मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः**, ३ **भक्तिभावनो भगवांश्चे**ति। एतेषु आदर्शरमणी १९०६तमे ईसवीयवर्षे **संस्कृतरत्नाकरे**ऽपि लेखकेन प्रकाशिताऽभूत्। अस्मिन् उपन्यासे वैधव्यदोषोपहताया कस्याश्चि–न्महिलाया दुष्करं जीवनं विषयीकृतं भट्टमहाभागैः। प्राचीनां बाणादिप्रवर्तितां गद्यलेखनप्रवृत्तिं न्यक्कृत्य लेखकोऽत्र स्वीयमभिनवं रचनामार्गं स्वीकरोति। ग्रन्थस्य प्रारम्भ एव महिलाया मुमूर्षुपतिमुखात् तात्कालिकीं विकटसमस्यामुपस्थापयति कविः –

"प्रभावति! ... मदग्रे कुरु प्रतिज्ञाम्। ... इयं बालिका यथा पैतृकसम्पत्तेः स्यादधिकारिणी तथैव प्राणपणात् प्रयतिष्य इति"।

सा च युवतिः – "यथैव योष्माकीणां सम्पतिं यौष्माकी कन्या लप्स्यते तथैवाऽऽप्राणपातं यतिष्ये। धर्मः साक्षी श्रीगुरुश्च साक्षी" (प्रख्या–६, पृ.११) इत्युक्तवती। तदैव धराधामपरित्यज्य चिरनिद्राविलीनोऽभवत् तस्याः पतिः।

एकतो विधवाजीवनमपरतश्च परहस्तगता सम्पतिस्तस्यां च कन्यायाः स्वामित्वमिति त्रितयमपि पुरस्कृत्य कविनोत्पादितं ग्रन्थादावेव परिणामजिज्ञासा–रहस्यम्।

दशपरिच्छेदेषु विभक्तोऽयमुपन्यासः इमामेव कथां पुरस्कुर्वन्नग्रेसरति। अन्ते च पतिविहीना सा विजयं लभत इति न केवलं शैलीदृष्ट्याऽपितु प्रतिपाद्य–विषयदृष्ट्याऽपि नावीन्यमस्य सिद्ध्यति संस्कृतसाहित्ये। सरला भावोन्मेषिणी भाषा घटनानां च मनोहरि चित्रणमिति सर्वं भट्टमहाभागानां गद्यप्रणयनपटुत्वं पिशुनयति। कविरत्र रचयति नूत्नं भावसंसारम्। यथा जगदिन्दोर्मुखात् –

"येन खलु भवती कृता पथि भिक्षुस्तस्यैवाऽद्योपारूढविनयस्तनयस्तात–कृतमृणं परिशोधयितुकामः साम्प्रतं भिक्षुकभावेन भवत्याः सम्मुखमागतोऽस्ति। एषोऽहमुन्मुकुलीकृतकरसम्पुटो भिक्षुभावमावहन् भवत्यास्तनयाया विकचकमलकोमलं पाणिं भिक्षामाकाङ्क्षे। (तत्रैव पृ. ३६)

तथा चाऽन्ये – "दिष्ट्या किमद्य दैवमनुकूलमुपदर्शयति कलम्? हन्त! हन्त! तं खलु प्रियजनविप्रयोगविषमयं समयं स्मरामि यत्र हि स्वर्गगतः सृगृहीत–नामधेयः स्वामिमहाशयो मृत्युशय्यामधिशयानः स्वमनःशल्यमुज्जिहीर्षुर्मां प्रतिज्ञा–बद्धामकरोत् – यत् यथा हि भविष्यदनुमीयमानसद्गुणशालिनी सेयं मृणालिनी पैतृकीं सम्पत्तिमुपलभते तथैवाप्राणपातं प्रयतिष्य इति।" (तत्रैव पृ. ४०)

भट्टमहाभागानां ग्रन्थनायके कथासङ्घटनायां च यद्यपि बङ्गभाषासाहित्य प्रभावोऽवलोक्यते तथापि ग्रन्थोऽयं मौलिकत्वं न परित्यजति।

कविवर्यस्य मथुरानाथस्य द्वितीय–उपन्यास ऐतिहासिकोपन्यासभूमौ प्रणीतः। आमेरराज्यस्य स्वनामधन्यो महाराजो मानसिंहोऽत्र नायक इति तन्नाम्नैव ग्रन्थोऽयं **"मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः"** इति शीर्षकेणाभिहितः। उपन्यासोऽयं प्रकाशनदौष्कर्यात् पूर्वम् **ईश्वरविलासमहाकाव्य**स्य कविकलानिधि–श्रीकृष्णभट्टप्रणीतस्य भूमिकारूपेण प्रकाशितोऽभूत्। किन्तु तत्र तस्य किमप्यौचित्यं न प्रतिभाति स्म। अतश्चाऽस्माभिः **मञ्जुनाथगद्यगौरवा**भिधाने प्रख्यायाः पष्ठे स्पन्देऽयमपि सङ्गृहीतः। षोडशलघुखण्डेषु विभक्तोऽयं ग्रन्थः महाराजमानसिंहस्य जीवनं तत्कृतवीरोचितकार्याणि च पुरस्करोति। अत्र हि प्रथमे परिच्छेदे सम्राड–कवरेण सह परिचयः, द्वितीये प्रारम्भिकी वीरता, तृतीये गुर्जरविजयः, चतुर्थे विनाशस्य सूत्रपातः, पञ्चमे गुर्जराणां बिहारबङ्गानां च समराङ्गणे, षष्ठे सम्मुखसमरे, सप्तमे ताटस्थ्येन सम्मुखसमरे, अष्टमे भारतस्य पश्चिमे प्रान्ते, नवमे सिद्धान्ते निर्भयता, दशमे काबुलमारभ्य बिहारपर्यन्तं प्रभुत्वम्, एकादशे प्रबलो हृदयाघातः, द्वादशे पुनः समराङ्गणे, त्रयोदशे बङ्गेष्वन्तिमः समरः, चतुर्दशे अकबरस्यान्तिमानि दिनानि, पञ्चदशे परिवर्तनं, षोडशे च महाप्रस्थानमिति विषया वर्णिताः।

भट्टमहाभागानां पूर्वजा जयपुरराजवंशे सम्मानिता आसंस्तेषां च राजसभायां गमनागमनमासीदिति तत्सम्बन्धिघटनानामयं ज्ञाताऽभवत्। महाराज–मानसिंह–प्रतापसिंहयोर्विवादकारणे यत्र ऐतिह्यविदां मतैक्यं नास्ति तत्राऽयं नैकानि तथ्यानि प्रस्तौति। सम्राटकवरस्य मानसिंहं प्रति विश्वासः, तस्य च राज्ञो राजनीतिचातुर्यं स्वामिभक्तिश्च कविना सप्रमाणमत्र न्यरूपि।

ऐतिहासिकोऽप्ययमुपन्यासः स्वीयं साहित्यिकं वैशिष्ट्यं न जातुचिदपि जहाति। सरसा प्रबोधमयी कवेर्वर्णनशैलीह पाठकानां चेतांस्यावर्जयति। यथा–

"समापतन् प्रान्तमाक्रमितुं भूयस्यो जातयो युद्धाय सन्नद्धाः, किन्तु हिमाचलनिरुद्धा वात्या इव निराशास्ताः प्रत्यावर्तन्त तस्मिन् काले। तास्तु प्रबलं सन्नह्यमानानां पठानानामाक्रमणमभूद् दुःसहम्" (पृ. ६७)। तथा चाऽन्यत्र –

"अदूरदर्शिन् देशद्रोहिन् राणा! अग्रे न ममोपालम्भो देयो यन्मानसिंहेन मेदपाटो विपाटितः। विवेचयिष्यन्ति राजनैतिका एव यत् एकव्यक्तेर्मिथ्यादम्भरक्षायै

परोलक्षप्रजानां प्राणाः सङ्कटापन्नाः, देशश्च सर्वदार्थं विनाशमुखे। "मेदपाटः स्वनिश्चये निश्चलः"। (तत्रैव पृ. ५३)

अत्र वीररसस्य दृश्यते प्राधान्यम्। आमेरदुर्गे भगवती शिलादेवी कथं प्रतिष्ठापिता, कथं च महाराजभगवन्तदासस्य सञ्जातं स्वर्गमनमिति नैकानि ऐतिह्यतत्त्वानि ग्रन्थस्याऽस्याध्ययनेन ज्ञातुं शक्यन्ते। एवमेव अकबरस्य कानिचि–दितिहासेऽप्रसिद्धानि वैयक्तिकतथ्यान्यपीह पुरस्कृतानीति ग्रन्थोऽयं साहित्यविदा–मैतिह्यविदां च सममेवोपकारकम्।

भट्टमहाभागानां प्रथम **आदर्शरमणि**रित्युपन्यासः सामाजिकोपन्यासकोटौ द्वितीयश्चैतिहासिकोपन्यासकोटौ तिष्ठति। तत्प्रणीतस्तृतीयोपन्यास एतयोर्विलक्षणः। तत्कदाचित् साम्प्रतिकसंस्कृतसाहित्ये प्रथमो दलितसाहित्यप्रतिनिधिभूतो ग्रन्थो भवितुमर्हति। तत्र कमला नाम्नी काचित् कृतापराधा समाजबहिष्कृता तरुणी नायिका। तां च मुनिजनदुर्लभां गतिमिति कल्पयति कविः। कथेयं स्मारयति पदे पदे भक्तिभावनभगवतो दयार्द्रहृदयम्।

भक्तिभावनाख्योऽयं कवेस्तृतीय उपन्यास इदंप्रथमतया प्रख्याया **मञ्जुनाथगद्यगौरव**मिति शीर्षकं षष्ठे स्पन्दे प्रकाशितोऽभूत्। इतः पूर्वमयं मातृकारूपेण मञ्जुनाथस्मृतिसंस्थानपुस्तकालये संरक्षित आसीत्। अत्रादौ गीतायाः श्लोकोऽयं दृश्यते।

अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः।।

अत्र यौवने कृतापराधा बालविधवा कमला विद्यते नायिका। सा तु प्रतिवेशिनैकेन युवकेन सह गृहाद् बहिरभूत्। न्यवात्सीत् कानिचन दिनानि निजाऽऽनेत्रा युवकेन सह पृथग् भाटकभवने रथ्यायाः प्रतिमुख एव। एष एव तस्या अपराधो येन समाजे सा कलङ्गिनीरूपेण स्वीकृता। तस्याः देवमन्दिरादिप्रवेशोऽपि निरुद्धः।

कथामग्रेसारयितुं कविर्यमद्वितीयायां यमुनास्नानाय समागतानां स्त्रीणां दृश्यं कल्पयति। मथुरापुर्यामस्मिन् दिने महाञ्जनसम्मर्दो भवति। कमलाऽपि भक्तिभावनया यमुनास्नानलालसया तत्र गच्छति किन्तु स्त्रीभिरपमानपूर्वकं दूरीकृता सा – 'अपेहि रे पापिनि, इहैवं कि मर्तुमवकाशमलब्धाः। ... दूरमपसर। न किं विलोकयसे यदस्मिन् स्थाने वयं स्नामः।' (पृ. ८८)

कमला नाऽनेन पराजिता भवति। सा भगवतो मदनमोहनस्य मन्दिरं गच्छति किन्तु तत्रापि सा तिरस्कारमेवाऽनुभवति । तत्र मन्दिरसम्मार्जनकर्मणि नियुक्ता आभीरी तां दूरमपसारयति। यदा कमला स्वकलशजलेन मन्दिरं

सम्मार्जयितुं कथयति तदा सा वदति – 'वेश्या सलिलमादाय समागताऽस्ति, कामयते च यद्देवमन्दिरं पयसा प्रक्षालयेयम्'।

कवेः सामाजिकी दृष्टिरत्र सर्वमात्मवत् पश्यति। मन्दिरादपमानितायाः कमलायाः कृते तस्य हृदये कारुण्यं वर्तते। सः स्पष्टं वदति यत् समाजे तिरस्कृतानां कृतेऽपि मन्दिरप्रवेशाधिकारो वर्तते एव। अस्मासु न कोऽपि विद्यते दुग्धधौतः। ग्रन्थान्ते कमलाया भक्तिभावं दृष्ट्वा कः खलु सहृदयो विस्मितो न भवति। मुख्यार्चकमहोदयस्य मुखात् "प्रणम पुत्रि! भगवन्तं मदनमोहनम्" इति श्रुत्वा कमला समभाषीत् –

"कं प्रणमामि? अपि भगवन्तम्? तस्य चरणयोरहं प्रत्यहं कोटि कोटि प्रणामानकरवम्। तस्य चरणयोरहं प्रत्यहं लोठामि। एषाऽहं तस्यैव चरणयोर्मस्तकं निधाय निपतिताऽस्मि। इदानीं कुत्र मस्तकं निधाय कस्मै प्रणामं करवाणि?"

यदा मुख्यार्चकमहाभागस्तां "चरणामृतं गृहीष्यति" इति पृच्छति तदा सा वदति –

'अपि चरणामृतम्? चरणामृतं कुत्र दास्यसि? मुखे स्थानं नास्ति। समस्तदेहस्योपरि भगवतो मदनमोहनस्याऽधिकारः संवृत्तः। मस्तके मदनमोहनः, जिह्वायां मदनमोहनः, हस्ते मदनमोहनः। क्व दास्यसि चरणामृतम्?'

समाजकलङ्किनीं तां कमलां कविरेतादृशभावभूमौ संस्थाप्य कल्पयति तस्याः कृते मुनिजनदुर्लभां गतिम्, स्मारयति च "सोऽहम्" इत्यादि वेदान्तवाक्यम्।

अन्ते ध्यानमग्ना कमला मदनमोहन एव विलीना जाता। परमदयालुः मुख्यार्चकमहोदयः कमलायाः पाञ्चभौतिकं शरीरं स्वस्कन्धेनोढ्वा यमुनापुलिने सश्रद्धमग्निसाच्चकार।

एतेन कवेः श्रीमथुरानाथस्य समाजे कलङ्कितत्वेन परिगणितान् प्रति कीदृशी भावनेति स्पष्टं ज्ञायते।

२. कथासाहित्यम् -

भट्टश्रीमथुरानाथशास्त्रिभिः शताधिका लघुकथाः प्रणीताः प्रकाशिताश्च काले काले विविधपत्रपत्रिकासु। चपण्डुकः, पश्यतोहरः, दयनीया, नैकाश्चाऽन्याः कथाः विविधपाठ्यपुस्तकेषु सङ्कलिताः सन्ति। भट्टमहाभागानां नवकथाः प्रख्यायाः षष्ठे स्पन्दे सङ्कलिता यासु भाग्यरेखा, शस्त्रपाणिः क्षत्रियाणी, क्षत्रियशोणितं चेति तिस्रः कथाः प्रख्यायामेव प्रथमतया प्रकाशिता अभूवन्। अन्यास्तु **संस्कृत-रत्नाकर**प्रभृतिपत्रेषु पूर्वं प्रकाशिता आसन्। तत्कथानां पत्रेऽस्मिन् समीक्षण–मसम्भवमित्यतोऽनुसन्धित्सूनामुपकाराय ता अत्र सन्दर्भपुरस्सरं सूच्यन्ते।

क	**ऐतिहासिककथाः**		
१.	अलक्ष्येन्द्रश्च दस्युश्च	भारती	८.२
२.	वीरबालकः	संस्कृतरत्नाकरः	५,७,८
३.	वीरपरीक्षा	"	८, ८
४.	धन्योऽसि धर्मवीरं	"	८, १२
५.	अत्याचारिणः परिणामः	"	६, १२
६.	सिंहदुर्गे सिंहवियोगः	"	६, ३
७.	पुरूराजस्य पौरुषम्	"	६. ५
८.	अंङ्गुलिमालः	"	१०.१०
९.	पृथ्वीराजपौरुषम्	"	१०. ०२
१०.	आल्हा च ऊदलश्च	"	१०. ०४
११.	मातृसेवायां चिरममरे द्वे बलिदाने	"	१०. ०६
१२.	सामन्तसङ्ग्रामः	"	१०: ०८
१३.	भारतध्वजः कालवीरः	"	१०. १०–११
१४.	अनुतापः	"	११. ०२–०३
१५.	चन्द्रहासः	"	११. ०२–०३
१६.	कृत्रिमबूँदी	"	११. ०४
१७.	वीरवाणी	"	११. ०६
१८.	प्राणानां भाषा	"	१२. १२
१९.	विजयी घण्टा	"	१३. ०५
२०.	कर्णश्चाऽर्जुनश्च	"	१३. ०६
२१.	सत्यो बालचरः	"	१३. ०९
२२.	धन्यो भारतवीरः	"	१३. १२
२३.	पुरुषपरीक्षा	"	१४. १२
२४.	शस्त्रपाणिः क्षत्रियाणी	प्रख्या–६	
२५.	भाग्यरेखा	"	"
२६.	क्षत्रियशोणितम्	"	"
ख	**सामाजिककथा**		
२७.	असमसाहसम्	संस्कृतरत्नाकरः	५. ३–४
		"	७–८
२८.	पश्यतोहरः	"	५. १–२
२९.	सरला	संस्कृतरत्नाकरः	६. १–२
३०.	एकबारं दर्शनम्	"	१. ४–५
३१.	दयनीया	"	२. ४, प्रख्या ६
३२.	अनादृता	संस्कृतरत्नाकरः,	३. ६
३३.	प्रत्युत्पन्नमतिर्हालिकः	संस्कृतरत्नाकरः	११. ११

३४.	अद्भुतचिकित्सा	"	
३५.	प्रतिशोध	भारती	३..१०
ग	**प्रणयकथाः-**		
३६.	प्रेम्णो विजयः	संस्कृतरत्नाकरः,	६. १०
३७.	परीक्षा	"	१०. ०७
३८.	निराशप्रणयः	"	७. ३, ७
३९.	प्रेम्णः प्रतिदानम्	"	३.४, प्रख्या ६
४०.	जले ज्वाला	प्रख्या	६
घ	**प्रतीकात्मककथाः -**		
४१.	बालकभृत्यः	संस्कृतरत्नाकरः,	२. ७–८
४२.	हीरकः	"	६. ६
उ	**हास्कथाः -**		
४३.	मिस्टरस्य गीताज्ञानम्	"	०७. १२
४४.	चंपण्डुकः	"	८. ५–६
४५.	शिष्या	"	८. ७
४६.	फाल्गुनगोष्ठी	"	६. ७
च	**मनोवैज्ञानिककथाः -**		
४७.	विषमा समस्या	"	११. ८
द	**विविधविषकयण्यः कथाः -**		
४८.	करूणा कपोती च युवती च	"	१३. ८
४९.	मृगयुः	"	८. २
५०.	दानी दिनेशः	"	६. ६
५१.	वीरो बालचरः	"	६. १२
५२.	धर्मधनयोर्युद्धं धर्मस्य विजयश्च	"	६. ११–१२
५३.	परीक्षा	"	१२. १
५४.	न्यायाधिकारी	"	१२. ५–६
५५.	द्वे स्पर्धे	"	११. १२
५६.	ममाध्यापनम्	" प्रख्या	६

अन्या अपि कथाः कविवर्यस्य शास्त्रिणः स्युः, किन्तु नाद्यत्वे लभ्यन्ते इति प्रार्थ्यन्ते विद्वांसस्तासामन्वेषणाय।

३. निबन्धाः -

ललितनिबन्धलेखनपरम्परा फ्रांसदेशाद् भारते समागता। परम्पराया अस्या जनको मान्ते नामा कश्चन कविः स्मर्यते। यद्यपि भारतेऽपि निबन्धलेखनपरम्परा प्राचीनकालादेव विलसति किन्तु विषयदृष्ट्या ललितनिबन्धपरम्परातोऽस्या भिन्नत्वं वदन्ति सुधियः।

भट्टमहाभागैः संस्कृते नैके ललितनिबन्धाः प्रणीता अभूवन्। जयपुरस्थ–केन्द्रीयसंस्कृतविद्यापीठात् प्रकाशिते प्रबन्धपारिजाते कविवर्येणानेन विरचिता श्चत्वारो ललितनिबन्धाः सङ्गृहीताः सन्ति। प्रथमे "किन्तोः कुटिलता" इत्यस्मिन् निबन्धे 'किन्तु'शब्दस्य कुटिलतां प्रतिपादयन् कविः कामप्यभिनवामेव विनोद–विच्छित्तिं प्रतनोति संस्कृतसाहित्ये। यथा –

"कुटिलेनाऽमुना "किन्तुना" कियत्कालात् क्लेशितोऽस्मि। यत्र यत्राऽहं गच्छामि तत्र तत्रैवाऽस्य शत्रुता सम्मुखस्थिता भवति। अस्य किन्तोः कारणात् कस्मिन्नपि कार्ये सफलता दुर्घटाऽस्ति। ... पश्याम्यहम् – एष कुटिलः किन्तु दूरदूरपर्यन्तमप्याक्रमणं करोति। ऋषिमहर्षिणामाश्रमानवाप्य तेषां निभृतशास्त्र–व्यासङ्गेऽपि हस्तक्षेपं विदधाति (प्रबन्धपरिजाते पृ. ८८–८३)। एवमेवाऽत्र 'बालकभृत्यः', 'हीरकः' 'मकारमहामेलकम्' इत्यन्ये निबन्धाः सन्ति। एतेषु मकारं–महामेलकम् शब्दशय्योत्थश्चमत्कारनिदर्शको निबन्धः। निबन्धेऽस्मिन् सर्वत्र मकारस्यैव प्रावाल्यमित्ययं भट्टमहाभागानां भाषाप्रयोगनैपुण्यनिदर्शकः सन् संस्कृत–भाषाया वैशिष्ट्यमपि द्योतयति। यथा –

'मन्यामहे मान्यमनीषिणां मानसमुदन्तेनाऽमुना महान्तं मोदमासादयेद् यन्मालवमण्डलान्तर्गतमन्दसौरमेदिन्या 'माघमासस्यामायां मङ्गलवासरे मकाराणां महामेलकमेकमघटत। मेलककन्यकाया मार्गे मध्यदेशीयमित्रमण्डलेन मनोरमो महान् मण्डपोऽमण्ड्यत।' (प्रबन्धपरिजातः पृ. ११४–११५)

भट्टमहाभागानां ललितनिबन्धानां सूचनाऽत्र दीयते –

ललित-निबन्धा

क्र.	शीर्षकम्	पत्रिका	वर्षम्	अंका
१.	श्रद्धायाः पराकाष्ठा	सं. रत्नाकरः प्रा.	५	११, १२
२.	वासन्तिकः प्रमोदः	सं. रत्नाकरः प्रा.	६	८, ६
३.	किन्तोः कुटिलता	सं. रत्नाकरः	१	७, ८, ६, १०
४.	संस्कृतज्ञानां महाशयता	सं. रत्नाकरः	१६	१०, ११
५.	अङ्ककौतुकम्	सं. रत्नाकरः प्रा.	६	१, २
६.	कविकौतूहलम्	सं. रत्नाकरः प्रा.	६	३, ४
७.	अपि अस्वार्थिनी ब्राह्मणः शूद्रेषु?	"	६	७, ८
८.	संस्कृतस्य नवीनं संस्कृतम्	सं. रत्नाकरः	३	११
६.	संस्कृतभाषा च तत्कोषश्च	सं. रत्नाकरः	६	५

१०. विद्वद्भ्यो निवेदनम्	सं. रत्नाकरः	६	६
११. महार्घता पिशाची	सं. रत्नाकरः	६	६
१२. कुतो वा न प्रसरेतां चरणौ ?	सं. रत्नाकरः	१०	३
१३. दन्तकथा	सं. रत्नाकरः	१०	६
१४. जरीयान् ज्यौतिषी	सं. रत्नाकरः	११	१२
१५. मकारमहामेलकम्	प्रबंध परिजातः		

४. निबन्ध साहित्यम्

भट्टमहाभागैः काले काले विविधविषयाश्रयेण प्रणीतानां निबन्धानां परिगणनं त्वसम्भवि। तथापि प्राप्तनिबन्धानां सूचनाऽत्र दीयते –

क्र. शीर्षकम्	पत्रिका	वर्षम्	अंका
वर्णनात्मका निबन्धाः			
१. अहं मोहमय्याम्	सं. रत्नाकरः	प्रा. ५	१, २
२. चीनदेशे धर्मचर्चा	सं. रत्नाकरः	६	५, ६
३. कार्नेगी–कारु–विद्यालयः	सं. रत्नाकरः	७	२
४. संस्कृतसेवाकुञ्जः	सं. रत्नाकरः	८	६,११,१२
५. स्वतन्त्रताया मंगलप्रभातम्	सं. रत्नाकरः	१२	२
६. भारतस्य राष्ट्रीयपताका	सं. रत्नाकरः	१२	२
७. व्रजबिहारिणा विहारिणो द्वंद्वम्	सं. रत्नाकरः	१३	११
८. सत्यम्	भारती	३	२
९. परोपकारः	भारती	३	५
१०. कालिकातातः प्राचीनसाहित्य प्रकाशनम्	भारती	८	८

शीर्षकम्	पत्रिका	वर्षम्	अंकाः
१३. सोवियतसंघे संस्कृतस्याध्ययनम्	भारती	१०	६
१४. राजधान्यां संस्कृतोन्नतेः प्रयत्नः	भारती	१०	१०
१५. सोमनाथे यवनाक्रमणम्	सं. रत्नाकरः	६	१०
१६. अमरकण्टकम्	सं. रत्नाकरः	१२	०७
१७. स्वागतं महाराजस्थानस्य	सं. रत्नाकरः	१३	१०

१८. मरुस्थलनिरोधस्य योजना	भारती	०३	८
१९. भगवतो बुद्धस्यावशेषोपरि लिच्छविनिर्मितः स्तूपः	भारती	०८	८

विवरणात्मकनिबन्धाः

१. प्रभातवायुः	सं. रत्नाकरः	प्रा. ६.	५, ६
२. भारतपर्यटनम्	सं. रत्नाकरः	प्रा. ७	६, ८, ११, १
३ वर्तमाने युरोपीय–महायुद्धे भारतीयाः	सं. रत्नाकरः	प्रा. ६	८, ६
४. कांकरोली–यात्रा	सं. रत्नाकरः	६	७
५. विक्रमार्कस्य द्विहस्राब्दी	सं. रत्नाकरः	१०	३
६. महायुद्धस्य जगति जाज्वल्यमानः – प्रभावः	सं. रत्नाकरः	१२	२
७. प्राचीनाऽऽर्याणां वस्त्राणि	सं. रत्नाकरः	१२	६
८. प्राचीनभारते पोतनिर्माणकला	भारती	३	८
९. आर्याणां होलिकामहोत्सवः	भारती	५	५
१०. हिमालयाञ्चले बद्रीनाथयात्रा	भारती	६	१२
११. आर्याणाम् उत्सवसमाजश्च दीपावली च	भारती	७	०१
१२. होलिकामहोत्सवः	सं. रत्नाकरः	७	०१

विचारात्मका निबन्धाः

१. दीपावली	सं रत्नाकर	प्रा.७	८
२. हिन्दुविश्वविद्यालयः	सं रत्नाकर	प्रा.७	८.६
३. एशियाप्रदेशे अदृष्टवादः	सं रत्नाकर	प्रा.७	६,१०,११
४. भारतीयानां राजभक्तिः	सं रत्नाकर	७	११
५. चलच्चित्रपटे समुद्रगर्भस्य	भारती	१	११

रोमाञ्चकारीणि दृश्यानि			
६. वर्तमानयुगस्य परीक्षा –	सं. रत्नाकरः	प्रा.२	१,२,३
७. दीर्घजीवनार्थमायोजनानि	सं. रत्नाकरः	८	४
८. निबन्धलेखस्य विराट् प्रवाहः	सं. रत्नाकरः	३	२,३,४,५
९. संस्कृतपण्डितान् क्व निनीषन्ति शिक्षाधिकारिणः?	सं. रत्नाकरः	६	२
१०. प्रिये मधुरवाणि!	सं. रत्नाकरः	६	२
११. भारते संस्कृतभारती राष्ट्रभाषा–प्रश्नश्च	सं. रत्नाकरः	६	४
१२. हंसवाहना सरस्वती मयूरवाहना कथं जाता (शोधलेखः)	सं. रत्नाकरः	१०	४
१३. पशुपक्षिषु मनुष्यस्य सभ्यता	सं. रत्नाकरः	१०	५
१४. संस्कृतपण्डिताः पश्यन्तु	सं. रत्नाकरः	१०	६
१५. सम्राडवरङ्जीवस्य निजपुत्रम्	सं. रत्नाकरः	१०	६
१६. संस्कृतं च तच्छिक्षा च	सं रत्नाकरः	१०	१०,११
१७. संस्कृतभाषा च प्रारम्भिकी शिक्षा च	सं रत्नाकरः	११	७
१८. संस्कृतशिक्षा–परिष्कारः	सं. रत्नाकरः	११	७
१९. साहित्यस्य सत्ता मानवस्य महत्ता	"	१२	८
२०. संस्कृतभाषा च तदुपजीविनश्च	सं. रत्नाकरः	१३	२
२१. भारतस्य का स्यात् संस्कृतिः ?	"	१३	२
२२. संस्कृत–पण्डिताः	सं. रत्नाकरः	१३	३,४
२३. संस्कृतस्य संकटं सेवकानां साम्प्रतिकं कर्तव्यम्	सं. रत्नाकरः	१७	२,३
२४. वर्तमानयुगस्यापेक्षा संस्कृत–भाषा च	सं. रत्नाकरः	१७	२,३

२५. संस्कृतभाषाविषये संस्कृतज्ञानां कर्तव्यम्	भारती	५	४,५
२६. ६३कोटिमुद्राणां करभारो भारतीयानामुपरि	भारती	७	६
२७. विद्यायाः महिमा	भारती	८	१
२८. नवसाहित्यनिकषः	भारती	८	४,५
२९. बालशिक्षां प्रति पितुः कर्तव्यम्	भारती	८	७
३०. आंग्लसंस्कृतिरपसार्यताम्	भारती	८	८
३१. संस्कृतं राजभाषाऽवश्यं भवेत्	भारती	८	८
३२. काश्मीरविषये पाकिस्तानस्य दृष्टिकोणः	भारती	९	६
३३. समस्तसंसारः संस्कृतं प्रत्युन्मुखः किन्तु भारतीयाः ?	भारती	९	६
३४ चरित्रबलं विना देशस्य संपूर्णा अपि योजना निष्फलाः	भारती	१०	१
३५. श्रीहनुमतः आदर्शचरितम्	भारती	१	१
३६. अन्येषामुपकारको भवेत्	सं रत्नाकर	९	११

समीक्षात्मका निबन्धाः

क्र.	**शीर्षकम्**	**पत्रिका**	**वर्षम्**	**अंकाः**
१.	अपि जापानः स्यात् अस्माकम् आदर्शः	सं. रत्नाकरः	प्रा.५	९, १०
२.	जर्मनशिक्षानीतिः	सं. रत्नाकरः	प्रा.६	१, २
३.	सीता	सं. रत्नाकरः	प्रा.६	९, १०
४.	फ्रांसदेशवासिनो दृष्टौ भारतम्	सं. रत्नाकरः	प्रा.७	२

५. गाथासप्तशती अमरुकश्च	सं. रत्नाकरः	१	४
६. प्राकृतभाषा कैः कैः कारणैः संस्कृततो मधुरा ?	सं. रत्नाकरः	१	५
७. गाथासप्तशती बिहारीं –सतसई च	सं. रत्नाकरः	१	६
८. प्राप्तपत्रस्य प्रत्युत्तरम्	सं. रत्नाकरः	२	६
९. समादधतु सज्जनाः	सं. रत्नाकरः	११	४,६
१०. संस्कृतानुरागिणः श्रृण्वन्तु	सं रत्नाकरः	११	५
११. अपि सत्येवं कोकिलानां परपुष्टता?	"	६	४
१२. अपि नासाभूषणमिदमासां यवन जातीनां सहवासादनुकृतम् ?	सं. रत्नाकरः	६	६,७,८,९
१३. सांख्यशास्त्रस्य चिरविस्मृतो ग्रन्थकारः	सं. रत्नाकरः	१२	
१४. रेऊ महोदयस्य आर्यविधानम्	"	१२	३
१५. आगरानगरस्यैतिहासिकता	सं. रत्नाकरः	१२	१०,११
१६. भारतीयं भोजनशास्त्रं शष्कुली (जलेबी) च	सं. रत्नाकरः	१२	१०, ११, १२
१७. पी. के. गोडे महोदयस्य गवेषणाकार्यम्	सं. रत्नाकरः	१२	१०,११
१८. अनुपलब्धं संगीतसूत्रम्	सं. रत्नाकरः	११	८
१९. गन्धर्वसेनस्य स्वर्गयात्रा	सं. रत्नाकरः	१२, १४	४, ६
२०. प्राचीन ऋषयश्चौद्भिदतत्त्वं च	अमरभारती	०२	१, ४
२१. अद्भुतचिकित्सा	अमरभारती	०१	१०,११
२२. मुद्राराक्षसस्य चाणक्यः	अमरभारती	०१	०१,०२
२३. अमरकोषे टीकाकाराणां कृपा	अमरभारती	०१	०६
२४. सांप्रतिकशिक्षाया धनभिक्षा	अमरभारती	०१	०७

२५. नवीनशिक्षितानां दृष्टौ
प्राचीनमस्मत्साहित्यम् अमरभारती ०२ ०७

२६. अपि नाम सेयमव्यावहारिकी? सारस्वतीसुषमां ०७ ०२

२७. संस्कृतभाषयाः महत्वम् · सूर्योदयः ०८ ०१

एतेषु केचन निबन्धाः प्रबन्धपारिजाते केचन च गीर्वाणगिरागौरवेऽपि सङ्कलिताः। प्रख्यायाः षष्ठे मञ्जुनाथगद्यगौरवमिति नाम्नि स्पन्देऽपि त्रयः शोध-लेखाः शास्त्रिचरणानां प्रकाशिताः। संस्कृतप्रबोधिनी प्रभृति पाठ्यग्रन्थेष्वपि महाभागानामेतेषां निबन्धाः कथाश्च दृष्टिपथमायान्तीत्यनुसन्धित्सुभिः तत्सर्वम् आकलनीयम्। यथोपलब्धगद्यसाहित्यमाकलय्य कृतमिदं विवेचनं तु दिङ्मात्र निर्देश एव भवितुमर्हति।

सन्दर्भ ग्रन्थाः

१. प्रबन्धपारिजातः, केन्द्रीयसंस्कृतविद्यापीठम्, जयपुरम्, १९८७

२. गीर्वाणगिरागौरवम्, " " १९८८

३. प्रख्या (षष्ठः स्पन्दः), प्रतिभा प्रकाशनम् दिल्ली, २००४

४. संस्कृतके युगपुरुष भट्टमथुरानाथशास्त्री, जयपुर, २००४

५. सागरिका, आधुनिकसंस्कृतसाहित्यविशेषांकः, सागरम्

****

आचार्यराधावल्लभत्रिपाठिकृतं संस्कृतगद्यसाहित्यम्

प्रेमनारायणो द्विवेदी

विंशशताब्दी संस्कृतसाहित्योन्नतेः स्वर्णयुगमिति विद्वांसो मन्यन्ते। **"आधुनिक संस्कृत साहित्य - वीसवीं शताब्दी"** नामके ग्रन्थे श्रीराधावल्लभ– त्रिपाठिना पञ्चशतसंख्यकानां संस्कृतग्रन्थानां सूची रचनाकार–नाम–विषय–प्रकाशनस्थान–तिथिनिर्देशपूर्वकं दत्तास्ति। ऊनविंशतिशताब्द्याः त्रिषष्ठिवर्षाद् आरभ्य विशंशताब्द्या अन्तिमभागपर्यन्तं सार्धचतुःशतसंख्याकाः पत्रिकाः प्रकाशिता आसन् इति सूचितम्। वर्तमानेऽपि प्रकाशमानानां त्रिचत्वारिंशत् संस्कृतपत्रिकाणां स्थानं नामनिर्देशपूर्वकं परिचयो दत्तोऽस्ति। यासु विविध–विषयिणी सामग्री प्रकाश्यते। पञ्चत्रिंशवर्षस्य **सागरिका**पत्रिकायाः आधुनिकसंस्कृतसाहित्य–विशेषाङ्के" श्रीबनमालिविश्वालमहाभागेन पञ्चाशत् संख्यातोऽप्यधिकानां संस्कृतलघुकथालेखकानां नामानि दत्तानि सन्ति। अस्मिन्नेव अङ्के श्रीसातकडिमुखोध्यायेन मराठीभाषात "ज्ञानेश्वरीगीतायाः दासबोधस्य, बंगलाभाषातः श्रीवङ्किमचन्द्रस्य उपन्यासानां भारतीयभाषातः आंग्ल–भाषातश्च कृतानां संस्कृतगद्यानुवादानां नामानि दत्तानि। अस्मन्मेवाङ्के श्रीसम्पन्दानन्दमिश्रेण, श्रीयज्ञेश्वरशास्त्रिकृतस्य सप्तदशाध्यायात्मकस्य गद्ये अरविन्दचरितस्य, श्रीसत्यसिंहकृतस्य श्रीअरविन्ददर्शनस्य चोल्लेखः कृतोऽस्ति। मध्यप्रदेशसंस्कृतअकादेमीतः प्रकाशितायाः संस्कृतपत्रिकायाः '**दूर्वा**याः' द्विसहस्राब्द्याः विशेषाङ्के आंग्लभाषातो नवकथानां संस्कृत–गद्यानुवादाः प्रकाशिताः आसन्। तत्र द्वौ अनुवादौ ,हिन्दीभाषातः स्तः। एवमिदानीं संस्कृतगद्यसाहित्यस्य समृद्धिः सूचिता भवति।

अद्यत्वे नाट्यशास्त्र–नाटक–निबन्ध–काव्यरचना–समीक्षादिषु भाषणेषु विविधग्रन्थरचनासु च लब्धप्रतिष्ठेन विजितानेकविविधपुरस्कारेण विद्वज्जनवल्लभेन श्रीराधाबल्लभेन त्रिपाठिना गद्यसाहित्यरचनायामपि असाधारणप्रतिभायाः परिचयो दत्तोऽस्ति। अस्य संस्कृतगद्यग्रन्थानां काव्यसौन्दर्यस्य गुणवत्त्वस्य यथासंभवमुल्लेखकरणे प्रयत्नं करिष्ये।

अस्य प्रथमो ग्रन्थः १६७६ ईशवीयाब्दे प्रकाशितः **संस्कृतनिबन्ध-कलिके**ति नाम्ना ख्यातोऽस्ति, यस्मिन् अष्टपञ्चाशन्निबन्धाः स्नातकानां लाभार्थं प्रकाशिता सन्ति। पश्यन्तु तन्निबन्धलालित्यम् – "समाप्ते सौन्दर्यसौरभसमेते वसन्ते भृशं भीष्मो ग्रीष्मऋतुः समायाति। यथा यथा वासन्तिकी सुषमा विनश्यति तथा तथा निदाघः समधिकतरं त्रासयति मनुजलोकान्।" यथा च – 'कस्य न प्रियो मदनसहचरे' वसन्तो

यस्यागमे प्रमोदमुपयाति चराचरं जगत्। कल्लोलां कलकाकली कलयन् कोकिलः ऋतुराजस्य स्वागतगानं प्रस्तौति। महीरुहाश्च नूतननूतनै-र्मनोहारिभिः विकचकुसुमैरर्घ्यमिव एतस्यै प्रददति। भ्रमराश्च मञ्जुगुञ्जन्तो गान्धर्वमुपकल्पयन्ति।'

अस्य द्वितीयः समीक्षात्मको ग्रन्थो **बाल्मीकिविमर्शः** विंशशताब्द्याः नव सप्ततितमेवर्षे सागरविश्वविद्यालयस्य विद्वत्परिपदा प्रकाशितः। अस्मिन् अष्टादशविमर्शाः सन्ति। यत्र रसालङ्कारध्वनिविमर्शपूर्वकं व्यासकालिदासादिसंस्कृतकवीनां काव्यैः होमर-तुलसीदासादिकृतकाव्यैश्च सह तुलनात्मकम् अध्ययनं कृत्वा बाल्मीकेः वैशिष्ट्यं श्रेष्ठता च प्रतिपादितमस्ति। यथा – यद्यपि रसावेशवैशद्यहृद्यनिरवद्यसौन्दर्य-निधानभूते रामायणकाव्ये निखिलानाम् अपि नवरसानां समुल्लासः समवलोक्यते तथापि कारुण्यसन्तानविताने अन्यैव कापि सरणिरादि-कविनोररीकृतेति निश्चप्रचम्। ... कालिदास आदिकवेर्गृहीतविद्यो विनयावनतशिष्यो वाल्मीकिकृतवाग्द्वारेण काव्यजगति तत्प्रदर्शितपथि एवासौ विचरति।

होमरकवि तुलनायां स कथयति – किन्तु नैतिकदृष्ट्या तु वाल्मीकि-होमरयोर्महदन्तरम्। होमरे नास्ति वाल्मीकिसदृशम् उदात्त-जीवनमूल्यानां परिष्कृतोऽवबोधः।" ... होमरवीरास्तु खानपानादिदत्तरुचयः पशुवद् व्यवहरन्ति उद्दामाश्च सन्ति तेषां पाशविकवृत्तयः। होमरे तु नास्ति क्वचिद् वाल्मीकिवन्नारीचरित्रस्य प्रतिष्ठा। सीतासदृशं चरितमपि तत्राशक्यकल्पनम्। ... होमरस्य नायिका न बलादपहरन्तं पेरिसं तृणाय मन्यते। सा विवशा पेरिसं पतिं स्वीकारोति पूर्वपतिं सर्वथा न विस्मरति .. ... बर्बरताचित्रणे होमरो बाल्मीकिमतिशेते।"

अस्य द्विसहस्रखीष्टाब्दे प्रकाशिते **संप्लव**ग्रन्थे सप्तविवर्तेषु षष्ठे विवर्ते "गद्यवीथी" परमोत्कृष्टगद्यसमृद्धा वर्तते। तस्य भागद्वयम् अस्ति 'उपशारदाविवाहम्' 'अनुशारदाविवाहं च' अस्मिन् विवाहसज्जा पर्वतायितस्तोषकराशिः, वरयात्राप्रतीक्षा, व्याकुलता, वरपक्षकोपः, कन्यापितुः स्थितिः, वरयात्रादिविषयाः सन्ति। कविस्तान् विषयान् प्रत्यक्षानिवोपस्थापयति। स वरयात्रा वर्णनं करोति – "अपीमे मानवा उत दानवाः, किं भूतगणा वेतालाः शिवगणा वावतीर्णाः, निगीर्णा यैः सभ्यता धुता शालीनता हता मानवता। एतेषां पादप्रहारैः प्रकम्पिता भूमिर्दीर्यते। स्पन्दन्ते जलौघैः परिपूर्णमाणेव जनौघैः संघट्टमाना वरयात्रा तरङ्गिणी कूलङ्कषा कूलद्वयमिव कुलद्वयं निपातयन्ती। ... उत्फाल्यन्ते

कालकुद्दाललाङ्गलतुल्याः पादा हस्ता नितम्बाः संचरणपादाघातैर्मृदन्तो महीं रजःपटलमिव सृज्यन्तो युवानो नरीनृत्यन्ते। त्रुट्यन्ति तथादर्शविम्बा, दरकुटिलतनयना दर्शं दर्शं विहसन्ति महिलाः ...अन्यच्च कीदृशमिदं चायम् ... अपशब्दावलीसमृद्धायते विकृतापदावली स्तूपायते गालीनामावलिर्निबन्धायते विडम्बना डामरायते कलहडम्बरश्च शम्बर इव प्रबलायते। नवीने जन्यवासे निखिल नवायते। ... अरे कीदृशा इमे पशवः कन्यापक्षीयाः, मनसः पताका दोधूयते कन्याभ्रातुः। ... अथ यौतकविषये प्रवृत्ते कलहडम्बरे कौरवसदसि कृष्यमाणे पाञ्चालीपरिधानमिव पितुः सम्माने ... एतन्न मर्षयामो, भवतु व्रजामः, साधयामः, त्र्युट्यतु सम्बन्ध उत्थाप्यतां वरो मण्डपात् ... प्रसीदन्तु प्रसीदन्तु महोदयाः करिष्यामि पूर्तिं सद्य एवा अवशिष्टस्य यौतकराशेः ... स च रुग्णो जर्ज्जरः कन्यापिता सकलमपि भविष्यनिधिं सेवानिवृत्तौ प्राप्तं ज्येष्ठदुहितुः शारदाया वैवाहिकयज्ञ आजुहाव। चिन्तयति किमिति व्याधेभ्यस्तु नार्पिता वत्सतरीव शारदेति रोदितुं न पारयति ...। शारदाया यवीयस्यो भगिन्यश्चतस्रः कोष्ठे कोणे संकुचिता अवेपन्त। एतासां कुसुमसुकुमाराणि हृदयानि। ... शान्तिः सन्धिवेलायाः शान्तिरेषा।'

एवमस्य निबन्धस्य कोमला शब्दावली हृदयस्य मर्माणि स्पृशति। अनेके मनोभावाऽत्र उद्भाविताः सन्ति।

विक्रमचरितम् -

द्विसहस्राब्दे प्रकाशितमिदं कथानकं पञ्चतन्त्र–हितोपदेशरीत्या विरचितमस्ति। सिंहसूकरशृगालवृकव्याघ्रगण्डगजशुकमयूरादयोऽत्र पात्राणि सन्ति। अत्र वीभत्सरस भूयिष्ठेऽपि शृङ्गारवीरहास्यकरुणदिरसानां रसा–भासनां वाऽनुभूतिः पाठक मनःसु कौतुकं चोत्पादयति। अत्र शब्दशय्या मनोहरा सालङ्कारा प्रवाहपूर्णा शैथिल्यरहिता सरला चास्ति। अस्मिन् लेखकेन वने सिंहराज्यस्थाने सूकरराज्यस्थापनस्य प्रयत्नं कृत्वा वर्तमाना राजनीतिः समालोचितास्ति।

अस्य कोचिदंशा –

वीभत्से शृङ्गाराभासः – आसीद् राठापुरा नाम्नि ग्रामे धूकरो नाम सूकरः। स खलु ग्रामाधिपस्य तिलकसिंहस्य सौधं निकषाऽतिसंकीर्णायां मलाक्लिन्नायां वीथ्यां ... क्वचिन्मुग्धभिरुद्भिद्यमान–यौवनाभिः क्वचिन्मध्यमाभिस्तारुण्यकर्कशाभिः क्वचित् प्रकृष्टाभिः प्रगल्भाभिर्विविधधूत्कारमनोहराभिः रिरंसाऽरमणीयाभिः सूकरसुन्दरीभिः

रममाणो मलमूत्रदिग्धायां पूतिबहुलायां नानाकृमिकीटदंशमशकादि–विहारस्थल्यां स्ववसतौ नानारसभूयिष्ठां विष्ठाम् अश्नन् उवास। ... आसंश्चास्य काश्चन कालागुरुकल्पा अपि दुर्गन्धयुता काश्चन सिता अपि भुविविलुण्ठनाद् धूसराः षोडशसूकरसुन्दर्यो भार्याः। स चासां मध्ये गवां मध्ये वृषभ इव विहरन् ... आदिवसं तूलगोलकसदृशान् कृष्णशशानिव च रमणीयान् शूकरशावकान् दर्शं दर्शं स्वपौरुषाभिमानित्वात् तृणाय सकलं जगन्मन्यमानः ... पङ्कगर्ते सुरसरिति स्नातमिव स्वात्मानं कलयन् शूकरीणामतिबल्लभतया मदावलेपेनाविष्टोऽभुत्।

अन्यभावैः सह करुणभावः –

एकस्मिन् दिने हवेलीं प्रविष्टस्तत्स्वामिपुत्रैर्निर्धनकृषकश्रमिक–स्ताडनपीनैर्लगुडैर्भृशं ताडितोऽर्धमृत इवाभवत्। ... पट्टमाहिषी तस्य शूकरचक्रवर्तिनो ज्येष्ठा कलङ्कवती सस्नेहं पप्रच्छ – नाथ! किमिति किमप्यनालप्यैव विशीर्ण इव शोकेन शेषे शय्यायाम्। ... एवं तु स्वज्ञातिभिर्विप्रलब्धा मानवा गच्छन्ति हताशतां न वयं सूकरा इति। ... नाहं नरः कश्चिद् य एवं निराकृतोऽपि जीवेयं पश्यन्तीनां मम भार्याणां सूकरसन्तीनां च। तिलकसिंहतनयैर्मनुष्यमारं मारितोऽस्मि विष्टौ गृहीता श्रमिका अपि नेत्थं ताड्यन्ते। ... .नाथ! नश्यतु सदारापत्यस्तिलक–सिंहोऽयम् इति शूकरी कलङ्कवती सहसा रोदितुमारब्धा। शिष्टाः पञ्चदशभार्यास्तस्य विस्वरं रोदितुं प्रवृत्ताः।

सायंकालवर्णनम् – अस्ताचलमारुरोह भगवान् भास्करः। विहगाश्च सूकरसमाजरोदने सङ्गतिमिवाचन्तः स्वकुलायान् शिश्रिये। शूकरविहार–स्थल्यां गाढपङ्कमिव तमोऽवन्नतार धरणीम्।

सिंहवर्णनम् – वनमिदं प्रशांस्ति नाम्नैव जितारातिश्चरितेन दान्तः क्रान्त–समस्तजङ्गलजन्तुरिति पशुपतिरूपं दधान काश्मीरदेश इव केशरविभूषितः कलिङ्ग इव साहसिको मसृणचरितो राजा विक्रमसिंहः। .. . लोमशिका तु नाम्नैव जितारातिं राजसिंहमपि छत्रचामरविहीनं पशुपतिमपि चिताभस्मशून्यं निहतगजारिमपि गजचर्मरहितम्, प्रतिक्षणं शत्रुविमर्दनशीलमपि अजातशत्रुं भीषणमपि रम्यम् एकाननमपि पञ्चाननम् अतुलितबलधामानमपि तुलितपरधामानं प्रलम्बकेशरमपि अनास्वादितकेशरं तं चक्रवर्तिनं दूरादेव प्रणम्य तस्थौ।

शृगालीशृमालविनोदे शृङ्गारः –

अयि चतुरिके किमिति सद्यो विहितपुरुषसंपर्केण पुरन्ध्री भीतेव चकितेव लज्जितेव कम्पमानेव दृश्यसे ? अधुनापि स्तनवेपथुं जनयन्ति ते श्वासः प्रमाणाधिकः। ... अपि सुन्दरि! शूकरदर्शनेनोद्विजितासि? अपि पृथुलैः पूतिगन्धैर्घूर्णितं ते शिरः ? ... अहो कीदृशो राजानो ये एतादृशीं मसृणगात्रीं तन्वी बालां घृणितकार्ये नियोजयन्ति? ननु एतन्नीलोत्पल–धारया शमीतरोश्छेदनम्। ... अयि वासु वृथैव विद्धेव वीतरागेव दृश्यसे विद्रवसे च। ...प्राणेश्वरि अनिशमहं त्वामनुसरामि ध्यायामि त्वामेव चिन्तयामि च त्वद्रूपचुलुकितेन चेतसा त्वामेव। त्वं किं करोषि क्व यासि केन कुत्र किमालपसि इति सर्वं निभृतं लतामण्डपेषु स्थित्वा प्रेक्षे। यतो यासि ततो यामि यत्र भवसि तत्र भवामि।

नवा राजनीतिः –

एहि संस्थापयामः शूकरसाम्राज्यं रचयामो नवीनमितिहासम्। ... पश्य कलौ शूद्रा एव राज्यं करिष्यन्तीत्युक्तं व्यासेन। शुकाद्याः द्विजा सिंहाद्याः क्षत्रियाः सदैवास्कन्दन्ति दलितान् जन्तून्। यदा हीना उत्थिता भवेयुस्तदा धूलिसाद् भवष्यिन्ति सत्तायाः सप्तभूमिकाः प्रसादा एतेषाम्। ... निरस्यैनं कुनृपं स्वीकरोतु श्रीमान् राजलक्ष्मीम् एकच्छत्रमकण्टकं च त्वदीयं राज्यं स्थापयिष्यामः। ... सूकरसाम्राज्ये सूकराभिषेको भवति, मन्दमती रासभो महामन्त्रिपदे, प्रज्ञाचक्षुरुलूको रक्षामन्त्रिपदे, कम्बुकण्ठः शृगालश्च खाद्यमन्त्रिपदे स्थापितः। गजा व्याघ्रा मयूरा हंसाश्च मौनमाश्रिता ... सूकरसाम्राज्ये सूकरपरिषद् दुर्गभवनस्थाने सूकरक्षेत्रमिति नाम परिवर्तनं जातम्। मन्त्रिणो वराहमूर्तिस्थापनमहोत्सवे लग्ना बभुवुः। कवयो वराहकाव्यानि वराहस्तोत्राणि च रचयामासुः। ... तस्मिंश्च सूकरसाम्राज्ये धावल्यं कुमुदेषु न प्राणिषु, गौरवं पर्वतेषु न चाधिकारिषु, शीलं शिलासु न नारीषु ...। सूकरसम्राट् तु संप्राप्य राजसत्तां तां तां केलिं कुर्वाणः कां कां लीलां नाततान। आत्मानमसौ महामहेश्वरममन्यत।

सूकरसाम्राज्ये स्थितिः

सूकरसाम्राज्ये दुर्गन्धेन समं सर्वत्र प्रससारं वैमनस्यं कम्बुकण्ठाश्च शृगालास्तं प्रलभ्य मूढं सूकरं सर्वत्र स्वप्रभुत्वं विस्तारयामासुः। स्वभ्रातृव्यान् भ्रातृन् तनयांश्च तेषु तेषु पदेषु नियोजयामासुः।

एतदाख्यानव्याजेन कविः कथयति यदेवंविधा राष्ट्रहितपराङ्मुखा उदरम्भरिणो नीतिहीना आचारहीना नेतारः सूकरशृगालतुल्या एव

स्वजीवनं यापयन्ति। नैतादृशैः नेतृभिः राष्ट्रहितं कल्पनीयं स्वच्छं शासनं च स्थापनीयम्।

उपाख्यानमालिका

एषोपाख्यानमालिका अस्या विंशताब्द्याः नवनवतितमे वर्षे प्रकाशिता। अस्यां चत्वार्युपाख्यानानि सन्ति। अत्र प्राचीनतायां नवीनतायाः समन्वयोऽस्ति। अस्यां सूतमुखे वर्तमानस्थितेर्वर्णनं कारितमस्ति।

प्रथमे विचित्रोपाख्याने वने वसतः कस्यचिद् विचित्रमेव जीवनं वर्णितमस्ति। कस्मात् कालात् सोऽत्र वसति किं करोतीति विषये जनानां पत्रकाराणां पुरातत्त्वविदां वैदेशिकगुप्तचराणां विविधानि मतानि कल्पितानि विविधाश्च कल्पनाश्च कल्पिताः सन्ति। तदन्वेषणाय वैदेशिको मिनीनाम्नी कन्याप्यायाति। तस्याः तेन प्राणिना प्रेमसम्बन्धोऽपि कल्पितोऽस्ति। तस्या विलासमये जीवनेऽपि परिवर्तनं भवति। सा काषायवस्त्रधारिणी भूत्वा वनेषु विविधानि परिवर्तनानि करोति। तस्या माध्यमेन तस्याः मातापित्रोः कठिनजीवनस्य वर्णनं कृत्वा पेरिसनगरस्य संस्कृतेः सभ्यतायाः सौन्दर्यस्य विलासिजीवनस्य च वर्णनं कृतमस्ति विदुषा लेखकेन। अस्य भाषा मधुरा प्रसादपूर्णा व्यङ्ग्ययुता भावप्रधाना चास्ते।

अस्योपाख्यानस्य केचिन्मनोहरा अंशा –

"एकदा शिशिरसंध्यायां प्रभवति हिमे प्रवहत्यस्थिच्छेदके वाते नैमिसारण्यस्य सङ्कीर्णे प्राङ्गणे शौनकादयोऽष्टाशीतिसहस्रं मुनयो यथाकथञ्चित् समायाताः महामतेः सूतस्य सम्मुखमासीनाः शैत्येन प्रकम्पिता देशस्य दुर्दशया दूनहृदया ऋषिसमाजमध्ये प्रज्ज्वलता वह्निकुण्डेन कथमपि शैत्यवाधां विनिवारयन्तः कालचक्रपरिवर्तनं कलयांबभूवुः। ... ननु दृष्टो मया नद्या अपरे तीरे विचरन् जरद्गवः। ... केचित्तु अरे अतितरां छविल्लोऽसौ दिवसावसाने समायाति प्रच्छन्नं दर्शयति कामकमनीयं वपुर्ललनाभ्यश्चरण्डीभ्यः। ... न कस्यापि शीलं सुरक्षितं वर्तते। ... वृत्तपत्राणि सर्वकारमनिन्दन्। वेदेशिकी कन्याऽस्माकं देशान् समायाता सा क्व विलीना किं करोतीनि शासनं न जानाति। सा गुप्तचरा वा दुरभिसन्धिकरी वा देशविध्वंस घटनं वा योजयति। सर्वथा समाप्तिंगता देशसुरक्षाव्यवस्था। ... फ्रांसदेशीयराजदूतेन घोषितं यन्नास्माकं देशस्य सा नागरिकेति

सूर्यास्तवर्णनम् –

अस्तमुपगच्छता भास्वता पश्चिमाम्बुधौ सहसा विहितेनाधःप्लवनेन समुत्थिता जलबिन्दवस्तारका इव भूत्वा नभसि टिमटिमायिताः ...।

पेरिसनगरी

अस्ति निखिलभुवनमण्डलमण्डनायमाना चाकचक्येन चमत्कुर्वन्ती जगत्सकलकलानिधानभूता सहस्राब्दवृद्धापि नववधूरिव मनोहरन्ती सौन्दर्यसारसमुदायमयैः पदार्थैरिव विनिर्मिता फ्रांसदेशेषु पेरिसाख्या नगरी।

मिनीजरद्गवप्रेमलापः –

जटिलः प्रोवाच – अयि सुभ्रु! अलमायासेन सुश्रोणि मा शय्यां जहि, अयि कदलीस्तम्भोरूयुगे, प्रागेव क्लान्तासि वनभ्रमणेन भयविह्वलासि द्वीपिनो दर्शनेन परिमृदितमृणालीतुल्यानि तेङ्गानि। ... वासु किमिदं नवीनं रूपम् ? कुचगतानि तानि वैदिकवस्त्राणि ?

एवमिदमुपाख्यानं विविधाभिः संवेदनाभिः सहृदयेषु किमपि कौतुकं जनपद अस्मिन् विषमे जटिले. समये जनैः कथं सावधानैर्भाव्यमिति कर्तव्यबोधं कारयति।

मायाविन्युपाख्यानम्

अत्र सूतः स्वग्रामे जातस्य नवपरिवर्तनस्य कथां श्रावयति। यथा मनोहरानोकहस्थाने गगनचुम्बीनि भवनानि, ग्रामदेवता चात्वरस्थाने भव्यं देवालयं चाहमपश्चम्। मालिनीनदी अपि तत्र नासीत् सा शृङ्खलाभिर्बद्धा त्रोटनाय यतमाना ललनेव दृष्टा। मामपि तत्र कश्चिन्न जानाति। अनेके दानवास्तत्र मानवैः कार्ये नियोजिताः सन्ति। वेषपरिवर्तनमपि तत्र जनानां दृष्टम् इत्यादि। अस्मिन् कवेरद्वितीया वर्णनकुशलता दृष्टिपथमायाति।

उपाख्यानस्य केचिदंशाः –

"अधिभालं चाध्यतिष्ठद् ग्रामदेवता, या खलु प्रस्तरमयोऽपि सजीवेव काकिणीनयनापि निखिलं निभालयन्ती वहन्ती ग्रामस्य योगक्षेमं तस्थौ। ... कश्चिद् दानवस्य पृष्ठमारूढस्तस्य मस्तकं भ्रामयति। केचन दानवमेकं प्रस्तराणां कुट्टने नियोजयन्ति, केचिदपरेऽपरेण दानवेन वज्रलेपचूर्णमिश्रणं कारयन्ति। सुदूरे क्वापि नद्या जलं वन्दीकृतं तिष्ठति। ... सिंहासने विचित्रवेशभूषाभूषितो राजा, वेत्रासनेषु पञ्चषाः प्रधानाः

आपादमस्तकं वस्त्रैराच्छन्ना अपरमिदं विचित्रं यत् तेषां कण्ठेषु न यज्ञोपवीतानि किन्तु कौपीनानि लम्बन्ते, मणिबन्धेषु न कङ्कणानि अपि तु घटिका यन्त्राणि तेषु ते मुहुर्मुहुर्दृष्टिपातं कुर्वन्ति अन्यथा समयगती रूद्धा स्यात्। ...

"राजा पुरोवर्तिनीं शृङ्खलाभिर्निबद्धां मुहुर्महुर्निःश्वसन्तीमविन्दु–सुन्दरीमपि गलल्लावण्यविन्दुकां प्रसन्नामप्यवसन्नाम् ... व्याघ्रैः परिवारितामिव हरिणीम् अतितन्वीमपि तनोरतनुप्रभाभिरापूरितभुवनभोगां बन्धनानां त्रोटनाय यतमानां समन्तात् रक्षापुरूषैर्नियम्यमानां कशाभिस्ताड्यमानां च ललनां सरोषमश्यत्।

अभिनवशाकुन्तलम् –

अस्मिन्नुपाख्याने गुरूकुलपवित्रता गुरूणां विद्वत्ता साधुता, आश्रमे काचित् शकुन्तलाकल्पना, धनिनां गुरुकुले दानार्थमरुचिः, राजासाहिबानां चरित्रनिर्वलता, नायिकायाः शकुन्तलाया मनोवेदना, निर्धनपितु–रपमानसहनं, चिकित्सालये चिकित्सकानामनुत्तरदायित्वं, नायिकाया अविवाहितजीवनं यापयितुं प्रतिज्ञा इत्यादयो विषया वर्णिताः सन्ति।

अत्र सूतः पाश्चात्यवस्त्राणि उपनेत्रं च धारयन् विश्वविद्यालय–प्राध्यापकरूपेणोपस्थितो भवति स्वाध्यायनकालकथां च वर्णयति। अत्र गुरवो वैय्याकरणा आसन्। अत्र शाकुन्तलपठननिषेध आसीत्। किन्तु तत्पुस्तकेषु शाकुन्तलं प्राप्य पठित्वाहं साधुशरणसिंहस्य दुहितरं पुष्पाणि चिन्वन्तीं दृष्ट्वा तस्यां शकुन्तलाबुद्धिं कृतवान्। तया सह वार्तालापोऽपि जातः। आश्रमनिरीक्षणार्थं राजा साहिबा केचिदागत्य तया सहानार्याचरणं कृतवान्। तत्पिता तामन्यत्र नीतवान्। अहं च पठित्वा विश्वविद्यालये प्राध्यापकोऽभवम्। सा विद्यापीठेऽध्यापिका बभूव। एकदा विद्यापीठे मुख्यातिथ्यं कर्तुं गतस्तां दृष्टवान्। उद्बोधनानन्तरमपि सा तत्र न मिलिता। विभागाध्यक्षस्य रुग्णावस्थायां सा चिकित्सालयमागता स्वपितरं तत्र प्रवेशयितुम्। किन्तु तत्रापि वार्ता नाभूत्। तत्प्रेषितपत्रविषये मित्रमुखेन ज्ञानवान्। ततः विद्यापीठप्राचार्यदुहितुर्विवाहावसरे मिलिता। तत्पत्रवार्ता कृता किन्तु शकुन्तला शनैरवदत् मम वालिशत्वं च तदासीत्। अधुना नैतत् संभाव्यम्।

अस्य केचिदंशाः – सूत आह – मुनयः कालोऽयं सर्वं परिवर्तयति। कालक्रमेण ये न परिवर्तन्ते ते त्वन्ततः पराजिताः भवन्ति। अहमपि कथं तथाभूतः स्थातुं शक्नुयाम्? इदानीमहं विश्वविद्यालये प्राध्यापकोऽस्मि ...

सा एकस्मात् पादपाज्जपाकुसुमान्युच्चिनोति स्म। अहं समीपं गत्वा पादपान्तर्हित– स्तदीयां रूपसुधां पिवामि। उत्पक्ष्मराजि बालकुरङ्गचञ्चलमपाङ्गं प्रत्यङ्गं च संनद्धं यौवनम्। पुष्पावचयोत्थापितकोमलविटपानुकारी बाहुः स्वयमेव मौक्तिकस्रग् इव तरुशाखया ललम्बे ...

राजान आयास्यन्ति। अतः स्वस्तिवाचनं किञ्चित् करणीयं श्वः। ..राजासाहिबवर्यागताः गुरुकुलमिदानीं गजकुलमृदितमिव पद्मिनीवनम् ... शकुन्तला न क्वापि दृश्यते। मयूरा न तथा वने नृत्यन्ति। क्व गतास्ते ? सर्वे राज्ञः सैनिकैर्मारिता इति मन्ये। ... पिता राज्ञे दातुं स्वकन्यां प्रतीष्टवान्। परं शकुन्तला दूतं प्रत्याचष्टे। ... शकुन्तला विषमभक्षयत्। कथंचित् प्राणास्तस्या रक्षिताः। ... कियन्ति दिनान्येवं गतानि। शकुन्तलाया नाचेतोपसरतीति। ...गतायां शकुन्तलायां तमोभिस्तमिवाजायत भुवनं मत्कृते। सा कथमात्मानं धारयति? अहमस्तव्यस्तोऽस्मि विपर्यस्तोऽस्मि ध्वस्तोऽस्मि। एतावती व्याकुलता न मया कदाप्यनुभूता।

मदनदहनम् –

अति मनोहरमिदमुपाख्यानं रमण्या मन्दस्मितमिव मनसि पेशलान् भावानुत्पादयति।

कथानकम् – कार्याध्यक्षः शिवः (शिवदयालुः) कार्यालये स्थित आसीत्। रमणीये काले कोकिलः कूजति, रमणीयवेषा रमणीया चोमा कक्षं प्रविश्य कथयति – सर् सर्वं टङ्कणकार्यजातं सम्पन्नम्। शिवः पञ्जिकाः पश्यति! सा तं चारु निर्वर्णयति, सोऽपि ताम्। अन्तिमे पृष्ठे रवीन्द्रनाथटैगोरकवितां टङ्किकतां पश्यति। चेतोविकारमनुबभूव। पृच्छति किमेतत्? सा वक्ति – ननु भागिन्याः कृते टङ्किकता। ननु भगिन्याः कृते टङ्कणं करोति भवती कार्यालये? सलज्जा सा सापराधां मन्यमानाऽवकाशं गृहीत्वा गृहमागत्य त्यागपत्रं प्रेषयति। कारणं ज्ञातुं शिवस्तद्गृहं याति। किन्तु सा गृहे नासीत्। उमा कन्याशालायां नियुक्ता भवति। तत्र सांस्कृतिककार्यक्रमे सा "**मदनदहन**नाटिकां छात्रीभिरकारयत्। शिवदयालुरेव तत्र मुख्यातिथिरासीत्। नाटिकां दृष्ट्वा स प्रशंशति गत्वा वर्धापयति कथयति च – सा कविता मत्समीपे सुरक्षिता वर्तते। सा वदति नेदानीं सा कवितापेक्षिताऽस्ति। भवतां कृते एव टङ्किकता आसीत्। स उच्छ्वस्य वक्ति तस्माद् दिनादेव त्वां प्रतीक्षे। विधुरोऽस्मि सर्वथा एकाकी। उमे वह मे जीवनधुरम्। शिवेन गृहितं

निजकरमपसारयन्ती सा शनैरुवाच – नैतत् संभविता। गार्हस्थ्यबन्धनं मत्कृते नास्ति।

अस्य रम्या अंशाः पाठं पाठं चन्द्रोदयारम्भ इवाम्बुराशिर्दरपरिधृतधैर्य इव शिवो विम्बाफलाधरोष्ठे उमानने नयनयुगलं व्यापारयामास। अस्मिन्नेव क्षणे पुरोवर्तिनि पञ्जिकाप्रपञ्चे विलीनो मदनोऽधिज्यं शरमारोप्य तत्संधानाय तत्परस्तस्थौ। ... वातायनात् सहकारमञ्जरीणां सौरभं समादाय सहसाऽन्तःकक्षं ससार समीरः। ... उमायाः प्राणा अधिकण्ठं प्राप्ताः। ... शिवेन तु अकारणमेव भर्त्सिता उमा। एका कविता तया भगिन्याः कृते कार्यालयस्य टङ्कणे टङ्किता तर्हि नैतेनाभ्रं छिन्नम्। अस्मिन् कार्यालये नियुक्तिभाज इतरे जनाः कार्यालयसमये चत्वरबलीवर्दा इव इतस्तत सञ्चरन्ति। द्वित्रा इतरा महिलास्तु आदिवसं वार्तालापेन स्वेतरवयनेन वा कालं क्षपयन्ति। ... उमा उमेति शिवस्य हृत्तन्त्र्य इदानीं झङ्कुर्वन्ति। ... विद्यालये नाना पुष्पाणि विकसतिनि। शिक्षिकाः कक्षे आसीना आलपन्ति विहसन्ति च। उमैव एकाकिनी उद्याने शिलापट्टमेकमध्यासिता किमपि ध्यायति धारयति चात्मानम्।

तण्डुल प्रस्थीयम्

कवि प्रतिभाप्रकल्पितजनजीवनवृत्तसंश्रितं दशाङ्कात्मकं प्रकरणमिदं विंशशताब्द्या नवनवतितमे ईशाब्दे प्रतिभाप्रकाशनतः प्रकाशितम्। विद्वद्वरेण्याय चावस्थिमहोदयाय समर्पणमिषेण विद्वद्भ्य एव समीक्षणार्थं समर्पितमस्ति। सकलबाह्याडम्बररहितं मालतीमाधववत् श्मशानयोगिनी–कापालिक–सिंहवध–नरवल्यादिभयानक–वीभत्सा–तिरञ्जित–दृश्यविवर्जितं साम्प्रतं प्रासङ्गिकमिदं सहृदयहृदयाह्लादाय प्रयोगाय चालं भविष्यतीति मन्ये।

अस्मिन् प्रकरणे सर्वाण्यपि पात्राणि संस्कृतभाषयैव व्यवहरन्ति। तत्तु सामयिकमेव। अस्मिन्नभिनेतृणामेकैकमपि वाक्यं सन्तुलितं महत्वपूर्णं विशिष्टभावार्थव्यञ्जकं मृदुहास्यसम्बलितं च। कविरत्नः प्रविश्यैव सर्वान् मनोगतान् भावानुद्घाटयति। श्लोकबाहुल्यं नास्ति। गद्यं स्पष्टार्थं मनोहारि च वर्तते। सम्बादा अपि विस्तृता न सन्ति।

अस्मिन् सर्वाणि पात्राणि नाम तुल्यगुणवन्ति विद्यन्ते। यथा – निरञ्जनो नायकः शुद्धहृदय प्रतिभाशाली च । शारदा नायिका परम–विदुषी शारदातुल्या, सकलकलाकलापज्ञा। सख्यः धृतिः स्मृतिः मतिश्च

नामानुरूपगुणवत्यः। छात्राः चान्द्रायणः कृच्छ्रायणः मन्द्रायणः तन्द्रायणश्च नामानुरूपगुणबुद्धिशीलाः मलिना मन्द्राः तन्द्रालवश्च।

प्रकरणसंक्षेपः –

सूत्रधारेणाहूता नटी वदति – गृहे जलं नास्ति, विना जलं न किमपि शक्यते। ततः सनटीकः सूत्रधारो जलान्वेषाणाय याति। जलादिसाधनहीने ग्रामे मधुरं गायन्तमेव गोपबालं पश्यति। तं स प्रकरणनायकं मन्यते। तं पठनाय प्रेरयति। स मातुरेक एवाश्रय आसीत्। अस्य जन्मकाल एव पिता जलान्वेषणाय गतो न पुनरागतः। स बालः मातरमनुनीय समाश्वास्य गुरुकुलं प्रति प्रयाति। मार्गे देव्या मन्दिरे स्तुतिं कुर्वन्तं तं काचिद् विदुषी राजकुमारी दृष्ट्वा पृच्छति – कुतस्त्वया गान्धर्ववेदः शिक्षितः। स ब्रूते – स्वत एव मधुराणि गीतानि ममान्तःस्फुरन्ति। सा सरस्वतीदत्तां प्रतिभां मन्यते। स्वरथेन तमाश्रमसमीपं प्रापयति। तत्र गोत्राज्ञानेन दूरत एव शास्त्रश्रवणाय गुरवस्तमाज्ञापयन्ति। स दूरत एव श्रुत्वा पञ्चभिर्वर्षैः शास्त्रपारंगतो भवति। अन्ये छात्रा–स्तथैवातिष्ठन्। गान्धर्ववेदनिष्णातापि गुरुपत्नी निरञ्जनमुखान्मधुराणि गीतानि शृणोति। छात्रा भेदमुत्पादयन्ति। गुरवः शङ्कन्ते। स्वगुरुसमीपे तं हिमालयं गन्तुमाज्ञापयन्ति च हिमालयेऽतिकठिने मार्गे सैव राजकुमारी शारदा मिलति प्रसन्ना च तं स्वसाधनैः जोशीमठं यावत् प्रापयति। गुरोः दर्शनं विधाय स आश्रमं प्रतिनिवृत्य मुखे प्राप्तं प्रसादादि समर्पयति। राजकुलात् राजकुमार्या विवाहस्य निमन्त्रणे प्राप्ते, सशिष्यः सपत्निकश्च गुरुः पञ्चाननस्तत्र याति। निरञ्जन आश्रमव्यवस्थां करोति। तत्र तालकमासीत् बुभुक्षितो निरञ्जनः गोचारणाय गतो मार्गभ्रष्टो भूत्वा देव्या मन्दिरं प्रविश्य देवीं प्रार्थयन् मूर्छितो भवति। अत्र राजकुमारी शारदा विवाहसमये देवीं दर्शनार्थमागता सखीमुखात् वरस्य काणात्वं विज्ञाय दुःखिता देवीं प्रार्थयति। तत्र निरञ्जनं मूर्छितं पश्यति। तमुपचारैः स्वस्थचित्तं कारयित्वा सखीभिः संम्मता तमेव श्रेष्टं वरं मत्वा तमादायविवाहमण्डपमायाति। निराशा वरयाचिका स्वगृहं प्रति निवर्तन्ते। निरञ्जनेन सह शारदाया विवाहः सम्पन्नो भवति। तस्य बुभुक्षावार्तां कोऽपि न शृणोति। सोऽवसरं प्राप्य ततः पलायते। तत्र तं न दृष्ट्वा बुभुक्षितं कुत्रपि गतं पतिं निरञ्जनं चिन्तयन्ती दुःखिता सती, स्वयं बुभुक्षिता तमन्वेष्टुं दत्तचित्ता दीनेभ्योऽन्नं वितरति। सर्वत्र तेषु निरञ्जनमेव पश्यति। केचनिद् विक्षिप्तेन दृष्टोऽसाविति श्रुत्वा तमानीय रथेन तं मार्गयन्ती निरञ्जनस्य गृहं यावदायाति। तत्र तस्य माता

धारिणी, पिता व्योमकेशश्च मिलति। एकस्मिन् स्थाने जलविवादे भूमिधरजनैस्ताडितो मूर्छितो मिलति निरञ्जनः। सर्वे प्रहृष्टा भवन्ति। राजकुमारी तद्ग्रामे जलकुल्यां च कारयति।

अस्मिन् प्रकरणे भावपेशलो मनोहरो गद्यांशः

नटी – जलानि न सन्ति गेहे। अस्मिन् ग्रीष्मे कूपाः शुष्का नलेभ्योऽपि जलं न लभ्यते, तण्डुलानोदनं पक्तुमिच्छामि, किन्तु जलाभावे किं वा पचामि किं वा रन्धयामि? संप्रति नास्ति पातुमपि जलं गेहे। देहे जागर्ति पिपासाः। ... पानीयं नास्ति ग्रामे। ... ग्रामात् क्रोशत्रयं वर्तते मालिनी नदी। ... एकः कूपो वर्तते। स तु भूमिधरस्य। अन्ये कूपा निखाताः, परं तेषु जलं नास्ति। एवं तावत् कुर्मः। समीपमेव वर्तते मे ग्रामः। मम गृहे एकस्मिन् घटे स्यात् संचितावशिष्टं जलम्। ... तत्र जलं पीत्वा गच्छताम्। गृहे वर्तते मे जननी। सा युवयोर्दशनेन प्रीयेत। ... शृणु यस्मिन् दिने त्वं जनिं प्राप्तवान् तस्मिन् दिने गृहे जलं नासीत्। एतादृशः एवासीद् दारुणः संध्याकालः समयो अभून्निदाघस्य, आमध्याह्नमङ्गारप्रख्यान् करान् विसृजति स्म भास्करः। प्राप्तायां संध्यायां पिपासया सर्वथा शुष्यति कण्ठ इति मयोक्ते ते जलमानेतुं गता नदीतीरम्। आः इयं पिपासा पिशाची कथं तस्मिन् जजाग इति रोदिति, न ते परावृत्ताः। तस्यां रात्रौ नान्येद्युर्वा अहं स्वयमन्वेष्टुं नदीतटं गता। नद्यां पञ्चक्रोशं यावज्जलमेव नासीत्। मम मन्दभागिन्याः कृते जलमानेतुं ते कति क्रोशांस्तस्यां रात्रौ चेलुरिति को जानाति।

मातृस्नेहः

रन्धनकर्मव्यग्रा निरञ्जनमाता धारिणी चुल्लके फूत्कुर्वन्ती – पञ्चरोटिकाः पक्तव्याः"। तदर्थमेव सर्वः समारम्भोऽयम्। इयं प्रथमा रोटिका गौर्याः (धेनोः) कृते। (चुल्लकात् फुल्लाया रोटिकाया निःसारणं निरूपयन्ती) इयमपरा निरञ्जनस्य कृते। अत्र भवति श्यामायाः (चटकायाः) अपि भागः। (पुनस्तथैवाभिनीय) इमे द्वे अपि तस्यैव। इयमन्तिमा एका ममोदरपूर्त्यै अलं स्यात्। अवसितं भोजनकर्म। ... अस्तमेति भगवान् भास्करः। ... निरञ्जन इदानीं यावन्नागतः। ... सर्वथा क्लान्तोऽसि एतावान् भारो न वोढव्यः खेदाञ्चितं ते वदनम्, एहि भुङ्क्ष्व"।

देव्याः मन्दिम्, तत्पूजकस्य शाकटायनस्य देवनिष्ठा स्थितिश्च –

कृता मया सपर्या भगवत्याश्चण्डिकायाः, करोमि प्रतिदिनं, परं चण्डीतु चण्डी एव तिष्ठाति। न सा मयि प्रसीदति। भगवति! नवानि वासांसि परिधापयिष्ये ते यदि पूरयसि मे मनोरथम्। "याचे न वस्त्रं, न द्रविणं, न भोगं, प्रस्थं परं तण्डुलमेव मेऽस्तु"। जघन्येन मया तदपि न लभ्यते प्रतिदिनम्। निर्जने कानने संस्थितेऽस्मिन् देवालये न नैवेद्यं न देवताप्रसादो न धनं न भोगः। तथापि पितृपैतामहं देवार्चनं कर्म परित्यज्य अन्यत्र गन्तुमपि न पारयामि। इहैव क्षुधाजीर्णो जराजीर्णो विशीर्ये।"

गुरुकुले छात्रास्तेषां च मधुरो हासः –

"जपाकुसुमं तु न प्रत्यक्षप्रमाणेन विदितं नानुमानेन ... मानस्या सत्तया गुरुपत्नी नाराद्धुं शक्या। सा तु कलहप्रिया कराली। लवणमरिच–मिश्रणपुरःसरं मां विषयीकृत्य यद् वा तद्वा गुरोः पुरो जल्पिष्यति सा। ... अथ गुरवो मत्कृते प्रचण्डास्त एव गुरुपत्न्याः समक्षं कातराः। सा पुरुषायते ते स्त्रीभवन्ति वयं च पेषिण्या गोधूमा इव पिष्टा अनयोर्मध्ये ... गुरुकुलं गरलकुलं वेति न जानीमः। ... पञ्चाननस्वत्रैव निवसति यावदसौ नायाति त्वां च कवलीकरोति तावत् पलायस्व इतः। ... एतत् तदेव गुरुकुलं किन्वत्र विद्या न पाठ्यते।

प्रतिभा –

"पञ्चाननः – हुं अस्मात् स्वाध्यायकक्षात् बहिःस्थित्वाऽपि चतुर्ष्वेव वर्षेसु निरञ्जनः सर्वाणि शास्त्राणि समधिगतवान् इति न वक्तुं पारयामि। ...मन्द्रायणः – अस्माकं तु आयुः क्षपितं गुरुकुलेऽस्मिन् निरञ्जनो निष्प्रयासमल्पेनैव कालेन महापण्डितो जातो वयं च तथैव मन्दाः।"

नायिकायाः शारदाया विद्वत्ता -

"विप्रवर! इयं प्राणपुरनरेशस्य महाराजब्रह्मदेवस्य दुहिता शारदेति गुरुभिरभिहितनामधेया सकलकलाकलापविशारदा सत्यं शारदैव। स्वयं सा वदति – अस्माकं प्रासादे वर्तते ग्रन्थानां पञ्चसाहस्री। प्रायः सर्वे ग्रन्थाः मया पठिताः। ...

मन्द्रायणः – भगवन्! पण्डितसार्वभौमा सा।

निरञ्जने गते शारदायाः स्थितिः –

धृतिः – कति दिवसा याता एवं इतस्ततो भ्रामं भ्रामं न सम्यग् भुज्यन्ते न सम्यक् सुप्यते। शारदा यावन्निरञ्जनो न प्राप्यते तावत् कुत

आहारः कुतश्च शयनम्। हृदयं निर्वृत्तिमायाति एतेषां दरिद्रणां दैन्यस्य दारिद्र्यस्य दूरीकरणेनैव एतेषां नयनेषु तदीयैव लसति निश्छलता।

इत्थं नवभावना भावितमपि भारतपरम्परानुसारं प्रकरणमिदं सुखान्तं विद्यते। नायिकानायकयोः यात्रासु मिलनमाकर्षणं विवाहः पुनर्वियोगः पुनर्मिलनं मध्ये मधुरं व्यङ्ग्यमयं हास्यं च सहृदयहृदये रुचिमुत्पादयति। अस्मिंश्चैकत्र राजपरिवारस्य महार्हा सम्भारा उत्कृष्टा विलासा अन्यत्र च साधनानामभावोल्लेखने कुशलतया वर्णिताः सन्ति। क्षुत्पिपासानुभवहीनाः सम्पनाः क्षुधातुराणां व्याकुलानां नानुभवन्ति किञ्चित् कर्तुं प्रवर्तन्ते इति राजकुमार्या दीनेभ्येऽत्र वितरणेन ज्ञायते।

अन्ये ग्रन्था -

प्रेक्षणकसप्तकम् – १९९७ वर्षे प्रतिभाप्रकाशनतः प्रकाशितम् सप्ताना–मेकाङ्किकानां संग्रहरूपोऽयं ग्रन्थः।

प्रेमपीयूषम् – नाटकमस्ति। १९७१ वर्षे प्रकाशितम् ।

महाकविः कण्टकः – १९७१ वर्षे प्रकाशितः आख्यायिकारूपनिबन्धः।

अस्य विदुषः शोधपत्रिकासु प्रकाशिताः त्रिंशदुत्तरशतसंख्याका निबन्धा सन्ति। एतेषु निबन्धेषु आधुनिकसंस्कृतसाहित्ये कतिचित् नवीनारीतयः समुन्मिषन्ति। यथा –

१. *व्यासरीतिः* – समासाभावः विश्लिष्य कथनं चास्या रीतेर्लक्षणम्।

२. *विडम्बनरीतिः* – आधुनिकसाहित्ये पैराडीति पदेन व्यपदिश्यमाना सोत्प्रासं सोल्लुण्ठं भङ्गीभणितिविशेषैरियं कमपि कौतुकं पुष्णाति। अत्र जुगुप्साजनने एव कविबुद्धिर्विश्रान्तिं लक्ष्यते।

३. *चेतनाप्रवाहरीतिः* – अत्र पदानां नृत्यत्प्रायत्वेन जनितः श्लेषः पृथक्–पदत्वरूपं माधुर्यम् आरोहावरोहक्रमरूपः समाधिः पदसौकुमार्यं चैते गुणाः भवन्ति।

४. *वार्तालापरीतिः* – इयं रीतिः ललितनिबन्धे सम्प्रति उपादीयते।

इत्थं गद्यकाव्यसम्बर्धने महती भूमिका दरीदृश्यते विद्वद्–वरेण्यस्याचार्यत्रिपाठिमहोदस्य। अस्य लेखन्यग्रेऽपि प्रचुरगद्यकाव्यसमृद्धिं प्रति प्रयास्यतीति कामयमानः तस्य प्रचुरां समुन्नतिं समीहे।

****

'चन्द्रहासचरितम्' 'कालाय तस्मै नमः' इति गद्यरचनयोः विहंगवीक्षणम्

पी. वरप्रसादमूर्तिः

अथ सुविदितमेव तत्रभवतां समेषां सहृदयप्रवराणां यत् सुविस्तृत–गद्यकाव्याम्बुधौ नैकविधानि महार्घाणि गद्यकाव्यरत्नानि समुल्लसन्तीति। प्राचीनकाले संस्कृतं यदा भाषितभाषा आसीत् तदा संभाषणप्रतिसंभाषणयोः गद्यमेवाश्रितम्।

वैदिकवाङ्मये वेदमन्त्रार्थविवरणपराणि ब्राह्मणानि गद्यमयानि विराजन्ते। ब्राह्मणशेषभूतम् आरण्यकवाङ्मयं गद्यात्मकं भासते। आरण्यको–त्तरकालिकं वेदान्तापरपर्यायम् उपनिषद्वाङ्मयं च गद्यमयमास्ते।

वैदिकवाङ्मयगतगद्यभागानां परिशीलनेन कोऽपि विकासक्रमः लक्ष्यते। वैदिकं गद्यं तावत् छान्दसप्रयोगबहुलम्। वैदिकवाङ्मये विद्यमानं गद्यं विषयप्रधानं, सरलं च विभाति। सरलात् कठिनम् इति शिक्षाशास्त्रीयः सिद्धान्तः अत्र समन्वितः संदृश्यते।

"भृगुर्वै वारुणिः वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति। तस्मा एतत् प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। स होवाच। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व।" (तैत्तिरीयः)

" स एकया पृष्टो दशभिः प्रत्युवाच। अथैनमुवाच – 'वरुणं राजानम् उपधाव पुत्रे मे जायतां तेन त्वां यजे इति। तथेति।"

"अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः। अग्नावैष्णवं पुरोडाशं निर्वयन्ति। दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद् देवताभ्योऽनन्तरायं निर्वयन्ति।" (ऐतरेयब्राह्मणम्)

आरण्यकगद्योदाहरणम् –

"योऽपां पुष्पं वेद पुष्पवान् प्रजावान् पशुमान् भवति। चन्द्रमा वा अपां पुष्पं, पुष्पवान् पशुमान् भवति। य एवं वेद योऽपामायतनं वेद आयतनवान् भवति। अग्निर्वा अपामायतनम् आयतनवान् भवति। योऽग्नेरायतनं वेद आयतनवान् भवति। आपोऽवा अग्नेरायतनम् आयतनवान् भवति। य एवं वेद"। (कृष्णयजुर्वेदः, प्रथमपादः)

कियद्रमणीयं कमनीयं चास्ति गद्यमेतत्। उपनिषद्गतस्य गद्यस्य सारल्यं माधुर्यं चावलोकयन्तु – "सत्यं वद । धर्मं चर। स्वाध्यायान्मा प्रमदः। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि।"

"यत्र नान्यत् पश्यति, नान्यच्छृणोति, नान्यद्विजानाति तद्भूमा। अथ यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम्। यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्।" (छान्दोग्योपनिषत्)

यास्काचार्येण निरुक्ते गद्यरूपाणि सूत्राणि ग्रथितानि। यास्काचार्यस्य व्याख्यानशैली तु विलक्षणा विलसति।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। (ऋग्वेदः) हिरण्यगर्भः = हिरण्मयो गर्भोऽस्येति हिरण्यम्। कस्मात् ? ह्रियते जनाज्जनम् इति वा हितरमणं भवतीति वा, हर्यतेर्वा। स्यात् प्रेप्साकर्मणः। अग्रे समभवत् भूतस्य जात एक एव जातः, स दाधार पृथिवीं दिवं च। सूर्य एव आकर्षण–द्वारा पृथिवीं धारयति दिवं चेति भावः। (निरुक्तम्)

महाभाष्यगतं गद्यं सुस्पष्टं, मनोहरं च विद्यते–

"अथ गौरित्यत्र कः शब्दः? किं यत् तत् सास्नालाङ्गूलककुदखुर–विषाणण्यर्थरूपं स शब्दः? नेत्याह, द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः? नेत्याह। क्रिया नाम सा। यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः? नेत्याह। गुणो नाम सः। यत्तर्हि तद् भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं स शब्दः? नेत्याह। आकृतिर्नाम सा। कस्तर्हि शब्दः ? येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः।"

पंचतन्त्रहितोपदेशादिकथाग्रन्थेषु प्रयुक्तं गद्यं सुबोधकं सरलं चास्ते। गद्यभेदाः – गद्यकाव्ये तु मुक्तक–वृत्तगन्धि–उत्कालिकाप्राय–चूर्णक–कथा–आख्यायिकासंज्ञकाः भेदाः निर्दिश्यन्ते आलङ्कारिकाविचक्षणैः।

आन्ध्रराज्ये विंशशताब्दे वयोवृद्धाः ज्ञानवृद्धाः संस्कृतगद्यरचना धुरन्धराः अनेके विलसन्ति। आधुनिकयुगे उपशतं ग्रन्थानां कर्ता, उस्मानिया विश्वविद्यालयस्थसंस्कृतविभागस्य भूतपूर्वाध्यक्षः राष्ट्रपतिपुरस्कारभाक् नैकानां व्याकरणालङ्कारशास्त्रग्रन्थानां व्याख्याता आचार्यपुल्लेलश्रीरामचन्द्रुडु–महाशयः, अपरः राष्ट्रपतिपुरस्कारग्रहीता आन्ध्रभागवतानुवादकः, 'आन्ध्रदेशस्य हास्यकथाः', 'आन्ध्रकाव्यकथाः' इत्यादिगद्यरचनानां प्रणेता आचार्यसन्निधान–श्रीसूर्यनारायणशास्त्रिमहाभागः, श्रीतट्टानरसिंहाचार्यः, श्रीओगेटि परीक्षितशर्मा, आचार्यवेम्पटिकुटुम्बशास्त्री, श्रीमरिंगण्टि श्रीरगड़ाचार्यः, श्री ति.तिरुवेङ्कटा–चार्यः, डा. मुल्लपूडिजयसीतारामशास्त्री उल्लेखनीयाः विराजन्ते।

प्रस्तुतपत्रे तत्रभवतः श्रीतट्टानरसिंहाचार्यमहोदयस्य 'चन्द्रहासचरितम्', तत्रभवतः श्रीओगेटिपरीक्षितशर्मामहाशयस्य 'कालाय तस्मै नमः' इत्येतत्गद्य–रचनाद्वयं दिङ्मात्रं परिशील्यते।

तत्रभवतोः पुण्यदम्पत्योः जानकीवेङ्कट–रङ्गरामानुजाचार्यदम्पत्योः पंचविंशत्यधिकनवशतोत्तरैकसहस्रतमे जनवरीमासप्रथमदिनाङ्के लब्धजन्मा तत्रभवान् श्रीतट्टानरसिंहचार्यमहोदयः कलाप्रपूर्णविरुदाङ्कितैः श्रीमद्भिः एस्. टि.जि.वरदाचार्यमहोदयैः आन्ध्रराज्यस्य कृष्णामण्डलान्तर्गते चिट्टिगूडूरू–म्निग्रामे संस्थापितायां श्रीनारसिंहसंस्कृतकलाशालायामभ्यस्तविद्यः व्यराजत। श्रीकोल्लूरि सोमशेखरशास्त्रिणां सकाशात् न्यायालङ्कारशास्त्रे, श्रीकरि–मानुजाचार्य–श्रीतट्टावरदाचार्य–श्रीतट्टारङ्गाचार्यमहोदयानां च सकाशात् व्याकरणशास्त्रं चाधीत्य आन्ध्रविश्वविद्यालयात् साहित्यविद्याप्रवीण–व्याकरण–विद्याप्रवीण–एम.ए.(संस्कृतम्)–इत्यादिलब्धोपाधिः श्रीतट्टानरसिंहाचार्यवर्यः चतुश्चत्वारिंशदधिकनवशतोत्तरैकसहस्रतमवर्षादारभ्य चतुरशीत्यधिकनवशतो–त्तरैकसहस्रतमवर्षं यावत् अर्थात् चत्वारिंशत् वर्षाणि श्रीनारसिंहसंस्कृत–कलाशालायाम् अध्यापनमकार्षीत् श्रीनरसिंहाचार्यः कलाशालायाः सेवा–निवृत्तेरनन्तरं तिरूपतिस्थकेन्द्रीयसंस्कृतविद्यापीठे विशिष्टव्याख्यातृपदं पर्यभूषयत्। आचार्यवर्यस्य रचनाविशेषैः मुग्धः संस्कृतज्ञलोकः 'साहित्यकेसरी' 'साहित्यरत्नम्' रमणीयवाणीविलासः इति विरुदैः सभाजयामास।

चत्वारिंशत्वर्षाणाम् अध्यापनजीवने श्रीतट्टानरसिंहाचार्यस्य लेखनीतः निष्पन्नाः रचनास्तु **काव्यकथामञ्जरी, नाटककथामंजरी, कविकुलचरितम्, चन्द्रहासचरितम्, सांयात्रिकः, सिन्द्बादः, साहित्यसुधालहरी** इत्यादयः प्रसिद्धाः। आचार्यवर्यः कविकुलगुरोः रघुकारस्य कालिदासस्य रघुवंश–महाकाव्यस्य गद्यरूपमपि प्रणिनाय।

चन्द्रहासचरितं भागद्वयोपेतं विद्यते। आदिमे भागे केरलाधिपतिः राज्यक्रमणकारिभिः शतृभिर्घातितः। तदीया राज्ञी स्वयमुपचितायां चितायामा–त्मानं निक्षिप्य पुरन्दरपुरं प्रयाति। स्वप्राणत्यागात् प्राक् राज्ञी एकवर्षदेशीयं बालं पालयितुं पोषयितुं च धात्र्याः हस्तयोः समर्पयति। यथा सपुष्पितस्य वृक्षस्य दूराद् गन्धः प्रसरति दिक्षु तथा आबाल्यान्मञ्जुलमधुरकण्ठरवेण गीयमानाभिः भगवत्स्तुगीतिकाभिः बालस्यास्य प्रभावः कुन्तलराजधान्यां च प्रसरति। सहचरबालैः सह भक्तिगीतानि आलपन् राज्ञा आहूतः स बालः राजभवनं प्रविशति। बालस्य मुग्धमनोहररूपं समुद्वीक्ष्य तत्र विद्यमानः गालवः "बालोऽयं राजलक्ष्मलक्षितः समुल्लसति। दुर्दैववशाद् दुर्दशामनुभवन् भवेत्" इति तर्कयति। बालस्य श्रुतिसुभगस्वरेण, नयनसुभगरूपेण च नितराम् आकृष्टः गालवर्षभः राजानमाह – "नास्ति खलु देवस्य पुत्रसन्ततिः। स्वीकरोतु भवानिमं बालम्। वर्धयत्वपत्यप्रेम्णा, ग्राहयतु सकलाः कलाः या खलु राजकुलाचिताः सप्रयोजनाश्च। कालक्रमेण यदि भवते रोचते, देहि भवत्तनयामस्मै। कुरुष्वैनं भवद्भद्रासनस्योत्तराधिकारिणम्" इति।

अत्रान्तरे कुन्तलराज्यस्यामात्यः धृतनामकः दुर्मतिस्तत्र समायाति। गालवस्य वचनं निशम्य दुरात्मा धृतः चिन्ताक्रान्तस्तिष्ठति। धृतस्य मदनो नाम पुत्रः, विषया नाम्नी पुत्री चास्ताम्। धृतः कपटोपायैः राजानं वशीकृत्य राज्यं पालयति । मदनस्य विवाहः राजकुमार्याः भर्तृदारिकया सह करणीयः येन स्वपुत्रः मदनः राज्यस्यास्य उत्तराधिकारी संपत्स्यते इति धृतस्यालोचना। अतः केनाप्युपायेन बालोऽयं हन्तव्यः इति निश्चित्य तत्कार्यप्रवर्तनाय वधकौ नियुङ्क्ते। वधकौ नगरात् सुदूरे विद्यमानमरण्यं नयतः बालकम्। घने वनान्ते सोऽयं बालः उच्चैः स्वरेण सानन्दं सोल्लासं च नृत्यन् भगवत्स्तुति–गीतानि समालपति। बालकस्य धैर्यं विलोक्य वधकौ विस्मितौ भवतः। तयोरेकतरः बालकं पृछति "किं न विभेति भवान् प्रतिभयेऽस्मिन् कान्तारे"? "किमर्थं मया भेतव्यम्? नास्ति स प्रदेशो यत्र भगवान्नास्ति । यत्र भगवान् अस्ति तत्र भयं नास्ति। अतीव सन्तुष्यामि यातोऽहं निश्शब्दतानिलयमरण्यं नीतोऽस्मि। यत्र अनावश्यकानि कर्माणि अस्माकं समयं न क्षिपन्ति, चेतांसि च न विक्षिपन्ति, भगवद्गीतिकां गातुमवकाशश्चोपलभ्यते" इति बालः प्रत्युत्तरं ददाति। अन्ते वधकौ बालस्य वामपादे विद्यमानषष्ठाङ्गुलिं खण्डयित्वा दुरात्मने मन्त्रिणे प्रदर्शयितुं नयतः।

अथ द्वितीयभागे तु अमात्येन नियुक्तः कुलिन्दनामकः आरण्यका–धिकारी तत्र याति। आरण्यकद्रव्योपार्जनतत्परः स कुलिन्दः अनपत्य आस्ते। भीकरारण्ये सुकुमारं कुमारमालोक्यं तं गृहं नयति। कुलिन्ददम्पती प्रहृष्टान्तरङ्गौ भूत्वा तं पुत्रीकृत्य "चन्द्रहास" नाम्ना आह्वयतः। बालः शुक्लपक्षचन्द्र इव क्रमेण युवा संजातः कर्णाकर्णिकया श्रुतकुलिन्दवृत्तान्तः धृतः तत्र गच्छति। धृतः कपटनाटकं रचयन् चन्द्रहासस्य हस्ते पत्रमेकं दत्वा स्वपुत्राय मदनाय देयमिति समादिशति। अविदितपत्रोक्तविषयः चन्द्रहासः कुन्तलराजधानीं प्रतिष्ठते। कुन्तलराजधीनीसीमानमधिष्ठाय चन्द्रहासः सुरूचिरसरस्तीरे विश्राम्यति। कतिपयक्षणेषु गाढनिद्रामग्नो भवति। अत्रान्तरे धृतस्य तनया विषया तत्र समागच्छति। चन्द्रहासस्य शिरोवेष्टनगतं पत्रं पठित्वा सम्भ्रममाश्चर्यचकिता भवति। पिता धृतः *"विषप्रदानेन सोऽयं युवा हन्तव्यः"* इति मदनमादिशति पत्रेऽस्मिन्। विषया तु तद्वाक्यम् अन्यथयति *"विषयाप्रदानेन सोऽयं युवाऽऽदर्त्तव्यः"* इति। मदनः चन्द्राहासेन समानीतं पत्रं वीक्ष्य विस्मितः आदौ; अनन्तरं स्वपितुः पत्रानुसारम् (विषयया कृतपरिवर्तना–नुसारम्) विषयया सह पाणिग्रहणोत्सवम् अकारयत् चन्द्रहासस्य। पाणिग्रहणोत्सवकार्यनिर्वाहकस्तु नान्यः गालवात्। सम्पन्ने विषयाचन्द्रहासयोः विवाहमहोत्सवे गालवः युवानमधिकृत्य राज्ञे निवेदयति। राजा च चन्द्रासस्य स्वायत्तीकरणमहोत्सवं परिपालयितुं निश्चिनोति।

अत्रान्तरे प्रतिनवृत्तः आमात्यः धृतः स्वगृहे सम्पन्नं महोत्सववृत्तान्तं ज्ञात्वा पुनः मायोपायचिन्तनमग्नः अभवत्। चन्द्रहासं सहासं सानुरागं चाहूय "नूतनवरेण सता भवता एकाकिना देव्यालयः सायंसमये गन्तव्यः" इति वदति। कतिपयनिमेषानन्तरं मदनस्तत्रागत्य सद्यस्तं चन्द्रहासं राजभवनं गन्तुं प्रार्थयते। चन्द्रहासस्य प्रतिनिधीभूय अहं देव्यालयं गच्छेयमिति प्रतिजानीते मदनः। प्रतिज्ञापूरणाय धृतपुत्रः मदनः यदा देव्यालयं प्रविशति तदा वधकौ मदनस्य शिरः छिन्तः। राजभवने च नगर्यां प्रवृत्ता प्रवृत्तिः ज्ञाता यत् मन्त्री धृतः प्रमादवशात् स्वपुत्रं मदनं घातयित्वा स्वयमप्यात्महत्यां कृतवान् इति। कतिपयदिवसानन्तरं कुन्तलाधीशः उद्घोषयति यत् प्राज्यस्य मम राज्यस्य उत्तराधिकारी चन्द्रहास" इति। गच्छति काले चन्द्रहासः केरलराज्यं च स्वबलेन संप्राप्य कुन्तल–केरलराज्ये च सम्यक् परिपालयन् भगवन्तं स्तुतिगीतैस्तोषयति।

चन्द्रासचरिते श्रीतट्टानरसिंहाचार्यस्य हृद्यानवद्यगद्यरचनाधुन्धरत्वं प्रतिवाक्यं गोचरीक्रियते पठितृभिः। आचार्यवर्यः अनुप्रासप्रियः। यथा– 'अन्ते च घातितः क्रूरैरमर्षपरैः परैः', 'राज्ञी च स्वयमुपचितायां चितायां निक्षिप्यात्मानं दग्धवती', 'रमणीयं महारयं हयमारुह्य ...', 'कुलिन्दोऽपि भृशं चिन्ताक्रान्तस्वान्तो बभूव', 'अपिच श्रूयते गणेयागणितगुणगणं कुमारं पुत्रीकृतवानिति'।

श्रीनरसिंहाचार्यः उपमालङ्कारग्रथने कुशलः। तद् यथा –

'सर्व लुप्तमित्युच्चैराक्रोशन् व्याकुलमनाः पिता कुठारछिन्नस्तरुरिव भूमावपतत्', 'वार्तेयं छुरिकेव चिछेद तस्य हृदयम्', 'स प्रतापेन प्रभाकर इव प्रभासमानः परिपालयामास', 'सचिवः स्वलोचनाभ्यां द्रष्टुकामः उन्मत्तः पुरुष इव प्राधावद्देव्यालयद्वारम्',

एवं चन्द्रासचरिताख्यगद्यरचनायां माधुर्यप्रसादगुणाभिव्यजिऊका संघटना समादृता सन्दृश्यते।

इदानीम् श्रीओगेटिपरीक्षित्शर्मा महोदयस्य **"कालाय तस्मै नमः"** इति उपन्यासः परिशील्यते।

विंशतितमे शताब्दे संस्कृते अपूर्वोपन्यासं रचितवान् तत्रभवान् श्री ओगेटिपरीक्षितशर्मा महाशयः। श्री परीक्षित्शर्मा त्रिंशदधिकनवशतोत्तरैक–सहस्रतमे वर्षे अगस्तमासस्य विंशे दिनाङ्के लब्धजन्मा आन्ध्रराज्यस्य गुण्टूरुमण्डलान्तर्गते पोन्नूरुसंज्ञके पत्तने विद्यमानायां श्रीभावनारायणस्वामि–वेदसंस्कृतपाठशालायामादौ स्मार्तमधीत्य, अनन्तरं पश्चिमगोदावरीमण्डला–न्तर्गते कोब्बूरुपत्तने प्रतिष्ठापिते आन्ध्रगीर्वाणविद्यापीठे भाषाप्रवीणोपाधये तेलुगुसंस्कृताध्ययनं चकार। बनारस–हिन्दूविश्वविद्यालयात् बी.ए., मुम्बयी–

विश्वविद्यालयात् एम.ए., संस्कृते प्राकृते च एम्.ए. भाषाविज्ञानोपाधीन् प्राप्नोत्। तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन "वाचस्पति" इत्युपाधिना श्रीकलापूर्णः इति कविसम्राट्विश्वनाथसत्यनारायणशतजयन्तिपुरस्कारेण "यशोधरा"महाकाव्याय कालिदास–सम्मानपुरस्कारेण च सत्कृतः श्री परीक्षित् शर्मामहोदयः। श्री ओगेटिमहोदयस्य कृतिविशेषाः –

१. **यशोधरा** (महाकाव्यम् विंशतिसर्गात्मकम्)
२. **श्रीमत्प्रतापराणायणमहाकाव्यम्**
३. **ललितगीतालहरी**
४. **सौन्दर्यमीमांसा**
५. **कालाय तस्मै नमः**
६. **परीक्षिन्नाटकचक्रम्** (सप्तविंशतिरूपकाणि)

श्रीमान्परीक्षित्शर्ममहोदयः संस्कृतवाङ्मयं त्रिधा विभजते – वैदिकं, लौकिकम्, आधुनिकञ्चेति। विंशतितमे शताब्दे प्रणीते आधुनिकसंस्कृतगद्य–साहित्ये "कालाय तस्मै नमः" इत्युपन्यासोऽनितरसाधारणं स्थानमलंकरोति। उपन्यासेऽस्मिन् तु रचयितुः आत्मकथा रमणीयतया ग्रथिता। संस्कार–सम्पन्नस्य अनुशासनबद्धस्य, कर्तव्यपरायणस्य स्वार्थरहितस्यादर्शपुरुषस्य चरितमत्र सम्यगुपवर्णितम्। श्रावणोऽत्र नायकः। निर्धनपरिवारे लब्धजन्मा स संस्कृतपाठशालायां प्रवेशितः। स्वदारिद्र्यादस्वास्थ्यकारणाच्च बाल्ये महान्तं क्लेशम् अनुबभूव श्रावणः। देवमन्दिरेषु पूजार्थम्, और्ध्वदैहिकसस्कारांश्च संपादयितुमेव संस्कृतमुपयुज्यते इति स मनुते। अवकाशान्तराभावात् श्रावणः संस्कृतमधीतवान्। गच्छति काले श्रावणः संस्कृताध्ययनवैशिष्ट्यमुपादेयतां चाभिज्ञाय भारतीयानां सांस्कृतिकसम्पत् संस्कृते निहिता विराजते इति विजानीते।

सर्वस्य भारतराष्ट्रस्य संस्कृतमेव राष्ट्रभाषा राजभाषा वा भवितुम् अर्हतीति श्रावणस्य द्रढीयान् विश्वासः। प्रत्येकस्य अवश्यं कालः आगन्ता इति स आशास्ते। संस्कृतमेव राष्ट्रभाषा भवेदिति उन्नतं लक्ष्यमधिगन्तुं स सर्वदा सर्वथा च यतमानश्चित्रितः। स संस्कृतेन वदति लिखति च किं बहुना स संस्कृतेन अत्ति पिबति, निद्राति च। स एकदा ब्राह्मे मुहूर्ते स्वप्नमेकमवलोकयति यत्र संस्कृतं राष्ट्रभाषा समभवदिति। स आत्मनि चिन्तयति प्रायेण निशावसाने दृष्टाः स्वप्नाः अवितथफलाः भवन्तीति।

श्रीपरीक्षितशर्मामहोदयस्य शैलीमवलोकयन्तु – "श्रावणस्वभावः शिशुस्वभावः। सः यत्सत्यं, यत्सुन्दरं, यत्कल्मषरहितं तत् प्रस्तौति। श्रावणः अर्चनायां विवाहोपनयनादिपञ्चदशकर्मसु सर्वदा वेदमन्त्रैः, क्वचित् संस्कृत–श्लोकैः केवलमर्चनां करोति न त्वन्यभाषापद्यैः। तस्याशयः अयम् –

संस्कृतभाषा देवभाषा, सा स्वच्छा भाषा, शुद्धभाषा च । तया भाषया अर्चना कर्तव्या। देवाः तस्यां भाषायां संभाषितवन्तः। भगवान् श्रीकृष्णः स्वयं संस्कृतभाषायां गीतोपदेशं चकार अर्जुनाय। भगवान् रामः मर्यादापुरुषोत्तमः, सीता जनकनन्दिनी, तस्याः पुत्रौ कुशीलवौ च महर्षिबाल्मीकिना सार्धं संस्कृतभाषायामभाषन्त। तादृशी अस्मदीयपरम्परा" इति। (**कालाय तस्मै नमः** पृ. ३४५)

"अयि भोः चतुर्वेदिन्! कृषिकर्म जन्मसिद्धं सर्वेषां भूतलवासिनाम्। कृषिकर्म अनादिसिद्धम्। "अन्नं न निन्द्यात्। अन्नं न परिचक्षीत। तद् व्रतम्। अन्नं ब्रह्म। अन्नाद् भूतानि जायन्ते ...।"

भारतीयसंस्कृतिः वृक्षाणां समूहे, स्निग्धच्छायातरुविलसितारण्येषु नदीतीरेषु पर्वतशिखरेषु च संभूय ववृधे। संहिताः, ब्राह्मणाः, आरण्यकानि च भारतीयसंस्कृतेः प्राणाः। सर्वपुराणेषु, इतिहासेषु, काव्येषु, नाटकेषु वृक्षाणां सम्बन्धः सर्वत्र बहुधा लिखिताः सन्ति। सर्वाः कथाः नैमिशारण्यादेव समुत्पन्नाः। इयं मानवजातेरविछिन्नपरम्परा वर्तते। अयि भोः! एतादृश–कृषिकर्मणा पौष्टिकाहारो भवति, शरीरव्यायामो भवति, स्वावलम्बनमपि भवति मानवसमाजस्य" इति बभाण श्रावणः। (**कालाय तस्मै नमः**, पृ० २७४)

उपरिनिर्दिष्टगद्यखण्डैः श्रीपरीक्षित्शर्ममहोदयस्य गद्यरचनावैशारद्यम् अभिव्यज्यते। रचनायां प्रयुक्तया प्रसन्नया पदावल्या सर्वत्र प्रासादिकता गोचरीक्रियते। कर्णरसायनं गद्यं श्रोतॄणां मनः आह्लादयति।

****

आधुनिकसंस्कृतगद्यसाहित्ये बिहारराज्यस्यावदानम्

गङ्गाधरपण्डा

संस्कृतवाङ्मये गद्यकाव्यलेखनपरम्परा वेदकालादेवातीव सुसमृद्धा आसीदिति निश्चप्रचं तत्साहित्यालोडनेन वक्तुं शक्यते। यजुर्वेदाथर्ववेदौ ब्राह्मणारण्यकसाहित्ये च गद्यसाहित्यस्य जयघोषं कुर्वन्ति। यज्ञकार्येषु परस्परसम्भाषणाय गद्यरचना विलोक्यते। तस्याः सततं प्रवहन्ती धारा ब्राह्मणारण्यकोपनिषत्सु प्रवहमाना संदृश्यते। व्याकरणच्छन्दोनिरुक्तादीनि वेदाङ्गान्यापि गद्यात्मकानि विलसन्ति। इयं गद्यमयी परम्परा महाभाष्ये अर्थशास्त्रे शाङ्करभाष्ये च नैकेषु ग्रन्थरत्नेषु विजृम्भते। चरकसंहितायां वराहमिहिरप्रणीते बृहत्संहितायां च मध्ये मध्ये गद्यस्य प्रशस्तिः प्रभूतम् अनुभूयते। एवमेतानि साहित्यानि गद्यस्य काप्यभिनवां ख्यातिमाविष्कुर्वन्ति लौकिकगद्यसाहित्यकाराणामुत्साहं वर्धयन्ति।

लौकिकगद्यसाहित्यस्याद्याभिज्ञानं महाभारतेऽवलोक्यते। भास–कालि–दास–शूद्रक–प्रभृतिभिर्नाट्यकारैः स्वस्वप्रथितनाटकेषु लोकोक्त्यर्थान्तरन्यास–सुभाषितानां संयोजनं कृतं वर्तते। अनेन गद्यकाव्यनिकषेण नाटकानां शोभातिशायित्वं समेधते। अनन्तरं विष्णुशर्मणा राजकुमाराणां शिक्षणार्थं पंचतन्त्राख्यः कश्चनाभूतपूर्वग्रन्थो निरमायि, यः खल्विदानीं सर्वेषामेव शिखरीभूतं ललितकथासाहित्यम्।

सुबन्धोः **वासवदत्ता**, बाणभट्टस्य **कादम्बरी-हर्षचरिते**, दण्डिनो **दशकुमारचरितम्** च तत्कालीनयुगस्यानवद्यकथासाहित्यरूपेणेदानीमपि यौवने राजन्ते। एतेषु दशकुमारचरितं ललितोद्गारद्वाराऽधिकतया वैदर्भीरीति–मनुसरति। उक्तं च –

अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम्।
तत्तु वैदभीरीतिस्थं गद्यं हृद्यतरं भवेत्।।

मध्यकालेऽष्टमशतकादारभ्य सप्तदशशताब्दीं यावन्नैकानि कथा–साहित्यग्रन्थरत्नानि विरचितानि। तेषु सिंहसूरिप्रणीतः **गद्यचिन्तामणिः**, दशमशतके धनपालस्य "**तिलकमंजरी**" एकादशशतके हलायुधस्य "**शुक-शुभोदयः**' भोजदेवस्य **शृङ्गारमंजरीकथा** शिवदासस्य **वेतालपंचविशतिः**, चिन्तामणिकृतः '**शुकसप्ततिः**' विद्यापतिप्रणीता '**पुरुषपरीक्षा**' राजशेखर–सूरिविरचितः '**प्रबन्धकोशः**', पंचमशतके वामनभट्टकृतं '**वेशभूपालचरितम्**', अष्टादशशताब्द्यां विश्वेश्वरपाण्डेयस्य कृतिः '**मन्दारमंजरी**'; शैलदीक्षितेन विरचितं **कावेरीगद्यम्, प्रवासवर्णनम्, श्रीकृष्णाभ्युदयम्** च, शंङ्करभाल–महेश्वरेण विरचितम् **अनुसूयाभ्यूदयम्, भगवतीभाग्योदयम्, चन्द्रप्रभा-**

चरितम्, महेश्वरप्राणप्रिया च, श्रीनिवासाचार्यमहोदयस्य शाङ्र्गकोपाख्यानम्, **श्रीकृष्णलीलायितम्**, परमेश्वरझमहोदयस्य **कुसुमकलिका नाम आख्यायिका** गद्यकाव्यस्य विजयवैजयिन्तीं स्फारयन्ति।

एकोनविंशशताब्दिं यावद् अम्बिकादत्तव्यासस्य शिवराजविजयाख्यं वीररसपूर्णं गद्यकाव्यं विकासस्य चरमसीम्नि राजते। तदनु बंगदेशीयविदुषां श्रीनिवासशास्त्रिणां **चन्द्रमहीपति**र्नाम गद्यप्रसूनं किमपि नूतनं सौरभं वितनोति।

स्वतन्त्रतायाः परमपि निखिले भारतेऽस्या अमरवाण्याः सर्वासु विधासु सारस्वतसाधना कृता वर्तते। यद्यप्यर्वाचीनगद्यसाहित्यसाधकाः पूर्वसूरिधुरं न मलिनीकृतवन्तस्तथापि सरण्यामस्यां बह्वादरो दर्शितो दृश्यते। शोध–निबन्धस्य गौरवभिया अस्मिन् निबन्धे विहारप्रान्तस्य ये गद्यसाहित्यशेमुषी–परायणा आसन् तेषां कृतीरधिकृत्य सूचनात्मकरूपेण किंचिन्निवेद्यते।

महामहोपाध्यायः श्रीकृष्णसिंहठक्कुरः (१८४८–१९१२)

बिहारराज्ये लब्धजन्मा असौ ठक्कुरमहोदय आंग्लशासनकाले महामहोपाध्यायोपाधिं लब्धवान्। पञ्चमजार्जचरितावगाहनपूर्वकम् इतिहास–गर्भकनिबन्धं **पंचमजार्जचरित**नामधेये ग्रन्थे संकलितवान्।

ठक्कुरउदयनारायणसिंहः (१८५४–१९५२)

एते बिहारराज्यस्य मुजफरपुर जनपदे विंशतिशतके जनिं गृहीत्वा संस्कृतमातरंमसेवन्त। **महावाक्यरत्नावली संस्कृतप्रवेशिके**ति गद्यसाहित्यम् अधिकृत्य व्यरचि। संस्कृतवाङ्मयस्य विभिन्नपक्षान् आम्रेड्य बहुविधा आलोचनात्मकनिबन्धा अत्र लिखिताः सन्ति।

पण्डित-अम्बिकादत्तव्यासः (१८५८–१९००)

जन्म एतेषां राजस्थानप्रान्तस्य जयपुररनगरेऽभूत्। अमरकोशादि–ग्रन्थान् कण्ठस्थीकृत्य गुरुवरेभ्यः श्रीकृष्णदत्तेभ्यो लघुकौमुदी, स्वपितृपादेभ्यः श्रीमद्भागवतमधीत्य बाल्यात्यरं यौवनं प्रपेदे। ततः परं काशीमागत्य साहित्यशास्त्रे वैशारदीं प्राप्य स्वप्रतिभया विदुषां हृदयमावर्जयन्तो विशुद्धा–नन्दसरस्वतीमहोदयैः "व्यास" उपाधिना एते भूषिताः।

तदनु स्वजीविकार्थं व्यासमहोदयाः बिहारराज्यस्य मधुवनीप्रान्तम् आगत्य शास्त्राध्यापनं कृतवन्तः। तदनु भागलपुर–छपरामण्डले संसेव्य राजधानीं पटनामागत्य संस्कृतं सिसेव। तत्रैव १९०० तमे वर्षे कृष्णत्रयोदश्यां तिथौ ब्रह्मलोकमगात्। विरचितेषु ग्रंन्थेषु **कथाकुसुम-दुःखद्रुमकुठार-मित्रालाप-शिवराजविजया**दीनि प्रमुखानि सन्ति।

शिवराजविजयस्य महत्त्वं को वा संस्कृतज्ञो न जानाति। अस्य वैशिष्ट्यमस्ति –

नवोऽर्थो जातिरग्राम्या श्लेषोऽश्लिष्टः स्फुटोरसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्।।

एवं च वैरर्भीरीतिमाश्रित्य रूपकादिप्रमुखालङ्कारान् प्रयुज्य बाणभट्टसमकक्षा एते गद्यसाहित्याकाशे जाज्वल्यमाननक्षत्रवद् राराजन्ते। ग्रन्थेऽस्मिन् अन्यदपिवैशिष्ट्यं भवति यत् मुसलमानसंज्ञानां संस्कृती–करणनामानि दत्तानि सन्ति। यद्यपि एते राजस्थाने प्रादुर्बभूवुस्तथापि कर्मणा एते बिहारप्रान्तीया इति वक्तुं शक्यते।

पण्डितरामचन्द्रमिश्रः – (१९११)

विंशशताब्द्यां प्रथमभागे एव मिथिलाप्रान्ते मैथिलीपरिवारे विप्रकुले प्रादुर्बभूव पण्डितरामचन्द्रमिश्रः। गद्यकाव्यधारायामेते कादम्बर्याः उत्तरार्द्धं लिखितवन्त. इति केचन युक्तिभिः साधयन्ति। **'तरुकथा'** इति किमप्यन्यत् कथासाहित्यं भवति।

पण्डितव्रजभूषण मिश्रः – (१९२७)

संस्कृतप्राणभूता एते मिश्रमहोदया आरामण्डले 'संस्कृतपरिषद्'–नामिकां संस्थां संस्थाप्य आरण्यकाख्यां संस्कृतपत्रिकां शोधगर्भिकां सम्पादयन्ति स्म। उपनाम श्रीमताम् 'आक्रान्त' इति आसीत्। दौर्भाग्याद् एते गतवर्षे यशःशरीरा सञ्जाताः।

पुराणनिचयेषु वर्णितं ध्रुवचरितं रामाणयस्य श्रवणकुमारवृत्तम् आधारीकृत्य **ध्रुवचरितम्**, **श्रवणकुमारचरितम्** इति गद्यकाव्यद्वयमेभिर्व्यरचि। **'बालभक्तप्रह्लाद'** इति किमप्यपरं गद्यकाव्यं पुराणकथाविजृम्भितं वैशिष्ट्य–मेतेषां धत्ते।

भाषायां सरलता, निसर्गता भावगम्भीरता एवमेतेषां गद्यस्य जीवितम्। पुराणस्य प्रसिद्धकथावस्तु स्वकाव्यस्रोतरूपेण नीत्वा कल्पनागौरवेण कामप्य–भिनवतां साधितवन्त इति भृशमेते स्मरणीयां।

डॉ रामकरणशर्मा – (१९२७)

अर्वाचीनेष्वन्यतमा एते विहारराज्यसारणमण्डलान्तर्गते शिवपुरे लब्ध–जन्मानः। श्रीकामेश्वरप्रसादशर्मणः सुताः वेदवेदाङ्गषड्दर्शनपारावारपारीणानां श्रीअम्बिकादत्तशर्मणां शिष्याः सन्ति श्रीशर्माणः। पारम्परीणार्वाचीनोभयविद्या–बद्धादराः बाल्यादेव सेवन्ते सुरभारतीम्। एते सम्पूर्णानन्दसंस्कृत–विश्व–

विद्यालयस्य कामेश्वरसिंह–दरभङ्गा–संस्कृतविश्वविद्यालयस्य च कुलपतित्वं सममकार्षुः। प्रथमा कृतिः **'मा भैषीः'** (१९३८–३९) द्वितीया **'तुलसीस्तवः'** १९४३, तृतीया **'मदालसा'** सन्त्येतेषाम्। परवर्तिकाले देहल्यां नागप्रकाशन–द्वारा नैके ग्रन्थाः प्राकाश्यं नीताः। एतेषु शिवशुकीयम्, संध्या, पाथेयशतकम्, वीणा इति चत्वार आसन्। गद्यकाव्यलेखनेऽपि इमे कृतादराः सन्तः **सीमा**–नामकं गद्यकाव्यं १९८७तमे वर्षे प्रकाशयामासुः। स्वानुभवभरिताः कथाः लालित्योद्गारपूर्वकं सरलतरलया रीत्या च सन्निहिताः सन्ति।

एतान् संस्कृतसाहित्यगद्यवाक्यकारान् विहाय सन्ति बहवोऽपि कवयो विहारप्रान्ते। परन्तु साक्षात्तेषां साहित्यं मद्हस्ते न प्राप्तम्। प्राप्तेऽवसरेऽहं तानि संयोज्य विदुषां समवाये उपस्थापयिष्यामीति शम्।

****

संस्कृते गद्यसाहित्यस्य रीतिः गतिश्च

एन्.पी. उन्नी

संस्कृतसाहित्ये गद्यसाहित्यस्य इतराविषयापेक्षया ह्रासो विद्यत इति साहित्यकाराणां मतम्। तन्न युक्तम्। यतोहि शास्त्राण्यपि श्लोकरूपेण उपनिबद्धानि दृश्यन्ते। वस्तुतः वेदकालादारभ्य गद्यरूपेण प्रतिपादनं वर्तत एव। ऋग्वेदे च उदाहरणानि सन्ति। यत्र उर्वशीपुरुरवसोः कथा प्रायेण गद्यात्मिका एव। वेदाङ्गेषु, ब्राह्मणेषु, उपनिषत्सु च यद्यपि विपुलतया गद्यमस्त्येव तथापि सामान्यतः संस्कृतसाहित्ये गद्यस्य विरलता दृश्यते। अत्र किं कारणमिति चिन्तनीयं वर्तते। कविसङ्कल्पस्य, आलंङ्कारिकाणां निर्देशस्य च उदात्ततया गद्यस्य पद्यापेक्षया महनीयता अस्ति। तथा च आलङ्कारिकप्रमुखेन दण्डिना काव्यविभागमधिकृत्य एवमुक्तम् –

गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम्।
पद्यं चतुष्पदि तच्च वृत्तं जातिरिति द्विधा।। इत्युपक्रम्य

"अपादः पदसन्तानो गद्यम्" इति निर्देशः कृतः। गद्यविभागम् अधिकृत्य तेनैव प्रतिपादितम् – "आख्यायिका कथा इति गद्यविभाग इति"। "ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्" इति गद्यस्य जीवातुभूतो गुणश्च प्रतिपादितः। बाणभट्टेन यद्यपि आख्यायिका रूपेण हर्षचरितम् कथारूपेण कादम्बरी च लिखितमस्ति, तथापि गद्यकाव्यस्य क्लेशावग्राह्यत्वमधिकृत्य सूचितमेव। "कथमाख्यायिकाकारा न ते बन्द्याः कवीश्वराः" इति तेन उच्चैस्तरामुद्घुष्टम्।

"नवोऽर्थो रीतिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्।।
किं कवेस्तस्य काव्येन सर्ववृन्तान्तगामिनी।
कथेव भारती यस्य न व्यानोति जगत्रयम्।।"

दशकुमारचरितादिरचयता दण्डिना, कादम्बरीकारेण बाणभट्टेन च समादृतोऽयं गद्यकाव्यविभागः साधारणानाम् अप्राप्यरूपेण महोन्नतस्थाने प्रतिष्ठितो भवति। अत एव पश्चात्कालिकाः प्रायेण गद्यकाव्यरचनायां विमुखा आसन्। हितोपदेश–पंचतन्त्रयोश्च अविष्कृता गद्यशैली सरला सुस्पष्टा समग्रगुणगुम्फिता च। अथापि अर्वाचीनाः वृत्तबन्धोज्झितसाहित्यरचनायां तत्परा न बभूवुः।

स्वातन्त्र्योत्तरकाले सङ्कल्पस्यास्य महती विडम्बना संजाता। ये वृत्तबन्धविषये अगतिका तेषां साहित्यरचना प्रायेण गद्यस्वरूपा दृश्यते।

"नगरार्जवशैलर्तुचन्द्रार्कोदयवर्जनैः" इत्यादिरूपेण दण्डिना प्रस्तुतेषु विषय-जातेषु आधुनिकानां आभिमुख्यं नासन्। वैदिकसाहित्यरूपाणां प्रभावश्च तेषु नूतनं किमपि सङ्कल्पं जनयामास। काव्यनाटकचम्पूप्रभृतिरचनासु प्रायेण आधुनिकानां उत्साहो न दरीदृश्यते।

स्पशकथा टुप्कथा मुक्तककाव्यमित्यादिनूतना साहित्यसरणी वृत्तपत्रेषु त्रैमासिकेषु इतरेषु च माध्यमेषु समादृता बभूव। एवं च आधुनिकानां काव्यसङ्कल्पस्य नूतनं किमपि परिप्रेक्ष्यं संजातम्। अद्यत्वे बहवः साहित्यप्रणयिनः प्रतिदिनं रचनां विदधति। एतत्सर्वं समादरणीयमिति नाहं विश्वसिमि। यतः प्रायेण वृत्तपत्रेषु आकाशवाणी-प्रभृतिसर्वकारमाध्यमेषु च मिश्रभाषारूपेण अशुद्धभाषायाः प्रचारः इदानीं सम्भवत्येव। अतः अत्र गौरवपूर्णा परिगणना आवश्यकी इत्यत्र नास्ति मे सन्देहः।

"पुराणमित्येव न साधु सर्वम्
न चापि काव्यं नवमित्यवद्यम्"

इति सुभाषितानुसारेण त्याज्यग्राह्यविवेकस्य प्रसक्तिरिदानीं वर्तते एव। व्याकरणशास्त्रस्य निरासः भाषाणां अभिवृद्धेय नोपकरोति। किन्तु अत्र सर्वमपि पाणिन्यभिमतमेव स्वीकरणीयमित्यपि वक्तुं नोचितम्। यतः सन्त्यपरेऽपि वैयाकरणाः इन्द्रचान्द्रादिव्याकरणशास्त्रप्रयोक्तारः। अत्र केरलीयेन नारायणभट्टपादेन **"अपाणिनीयप्रामाण्यसाधनम्"** इति ग्रन्थः विमर्शम् अर्हति। तत्र तेनोक्तं "मुरारिभवभूत्यादीन् प्रमाणीकरोति यः" इति अर्थात् न केवलं व्याकरणशास्त्रप्रतिपादकग्रन्थानां परिशीलनं किन्तु प्रामाणिकानां कवीरवराणां वचनान्यपि स्वीकरणीयानि। "विश्रामस्यापशब्दत्वं वृत्युक्तं नाद्रियामहे" इति वदता भट्टपादेन "विश्रामं लभतामिदं च शिथिलज्याबन्धम् अस्मद्धनुः" इति कालिदासप्रयोगस्य साधुत्वं व्यवस्थापितम्। अनेनैव 'दुर्लभ्यम्' इति प्रयोगः स्वकीये नारायणीयनामके स्तोत्ररत्ने प्रस्तुतम् – "एवं दुर्लभ्यवस्तुन्यापि सुलभतया हस्तलब्धे" इति प्रयोगः साधुः। पुनश्च **प्रक्रियासर्वस्वमि**ति महति ग्रन्थे एतादृशानां कविवचनानां साधुत्वं सम्यक् प्रतिपादितं दृश्यते।

आधुनिकैः अनुवादरूपेणापि साहित्यकृतयः विरच्यन्ते। तत्र बहवः प्रश्नाः समृद्धताः। आधुनिककाव्येषु आङ्ग्लेयादिविभिन्नभाषापदानां समावेशः अस्त्येव। एवं प्रादेशिकनामधेयानां संस्कृतीकरणेपि कविषु समानता नास्ति। तथा च श्रीअनन्तपुरमिति वर्तते केरलराजधानी। तच्च 'तिरुवनन्तपुरम्' त्रिवेन्द्रम्, स्थानन्दूरपुरम्' इति भिन्न-भिन्नैः नामधेयैः व्यवहारः दृश्यते। एवं ओथल्लो इति षेकस्पीयरनाम्नः कथानायकस्य 'उद्दालक' इति प्रयोगः समादृतः केरलीयेन कविपुङ्गवेन **उद्दालकचरितमि**ति नाटकग्रन्थे।

आधुनिकानां उपभोगवस्तुनामपि नामधेयपरिकल्पने एतादृशविभिन्नरूपता संभवितुमर्हति। टेलिफोन इत्यस्य दूरश्रवणमिति इदानीं सर्वविदतो वर्तते व्यवहारः। एवं च आधुनिकपदार्थजातानां व्यवहारः अद्यत्वे आवश्यको भवति।

आधुनिकगद्यसाहित्यभाषायाः न केवलं सामान्यनियमाः शैलीभेदाः, रुपसादृश्यमित्यादिकं आविष्करणीयं भवति। अत्र मार्गनिर्देशरूपेण प्रामणिकैः विद्वद्भिः बहुकरणीयं वर्तते। यतः साहित्यशैली वृत्तपत्रशैली च भिन्नरूपतया भवितव्यम्, यतः यद्यद् वृत्तपत्रेषु विवरणादिकं प्रदीयते तत्सर्वं साहित्य-रूपात्मकमिति अङ्गीकर्तुं न शक्यते। स्वच्छा सरला हृद्या, शुद्धा च काचन शैली अद्यत्वे नितरामुपकुर्यादिति मेऽभिप्रायः।।

****

आधुनिकसंस्कृतगद्यसाहित्यस्य प्रयोगधर्मिता

धर्मेन्द्रकुमारसिंहदेवः

सनातनीयं काव्यधारा। काव्यं नाम लोकोत्तरवर्णनानिपुणकवेः कर्म। तच्च काव्यं पद्यं गद्यं मिश्रं चेति सामान्येन त्रिधा। तत्रापि *'अपादः पदसन्तानो गद्यम्'* वृत्तगन्धोज्झितं गद्यं वेति प्रसिद्धं गद्यलक्षणम्। तत्र यद्यपि सहितयोः शब्दार्थयोः यत्र सामञ्जस्यं तत् साहित्यम् इति, तथापि परस्तात् साहित्यशब्दोऽयं पद्यगद्यमये संस्कृतवाङ्मये योगरूढः संवृत्तः। तदेव गद्यसाहित्यम् अत्र विषयत्वेन उपस्थापितम्। तच्च पुनः संस्कृतं गद्यसाहित्यम्। *'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः', 'भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती'* वेति प्रसिद्धा लोकोक्तिः। तत्रापि आधुनिकं संस्कृतगद्यसाहित्यम्। किं नाम आधुनिकम् इत्यापि चिन्त्यम्। परं सामान्यतया समकालीनं साहित्यम् आधुनिकम् इति नाम्ना व्यवह्रियते। तस्माद् *'आधुनिकसंस्कृतगद्यसाहत्यम्'* इत्यस्य प्रयोगधर्मिता इति विषयो विचार्य्यते।

अस्ति साहित्यं समाजस्य दर्पण इत्यपि लोकप्रसिद्धिः। तेन सामाजिकी–राजनैतिकी–सांस्कृतिकी–दशाः तत्र च परीवर्ताः, विसङ्गतयः विप्रतिपत्तयः साहित्येषु प्रतिफलन्ति एव। विशेषतो विंशशतकस्य उत्तरार्धे कवीनां गद्यकाव्यविधासु एतादृशी बलीयसी प्रवृत्तिर्दृश्यते। इदानीमपि एकविंशशतकस्यारम्भे संस्कृतगद्यसाहित्यं निरबाधमग्रेसरति तयैव दिशा। 'निरङ्कुशाः कवयः' इति धिया गद्यप्रपञ्चः क्षणं क्षणं नवतामुपैति।

अस्य प्रयोगधर्मिता विषये प्रायः उद्घाटनसत्रे कुलपतिना राजेन्द्रमिश्रमहोदयेन विशदेन चर्चा विहिता। तेन आधुनिकगद्यसाहित्यस्य जीवितम् अपि पुष्टं जातम्। अत्रापि शोधपत्रमिदं प्रायशः तदेव तथ्यम् अनुकरोति। मन्ये उद्घाटनसत्रे अस्य शोधपत्रस्य शीर्षकानुसारेण विषयजातं पल्लवितम्। यद् वा भवतु सांमान्येन समकालीनं साहित्यं 'यर्थार्थबोधः, परम्पराधुनिकतायाः समन्वयभावः अन्तर्द्वन्द्वश्च, तात्कालिकघटनाः, समाजचेतनाविकासः, राष्ट्रभक्तिभावः विषयाणां व्यङ्ग्यपरता, अनुवादप्रवृत्तिः, प्राचीनविषयाणां नवा चेतना' इत्यादिषु विधासु प्रवृत्तमस्ति इति दृश्यते। अत्र तावद् इमे विषयाः समासेनैव विमृश्यते –

परम्पराधुनिकतायाः समन्वयः पंडितप्रवरस्य नवलकिशोरकांकरमहोदस्य **'यात्राविलासम्'** गद्यखण्डे सुतरां समाहितो वर्तते। मन्ये गद्यमुनित्रयस्य वर्णनकौशलम् कविना आत्मसात् कृतम्। कविः ग्रीष्मस्य कठोरं तापं इन्दिरायाः शासनेन उपमीनोति –

यत्र तत्र हि कर्णातिथितां यातेषु कोकिलकुलकलालापेषु कथाशेषतां गतेषु किसलयित–सकलवनोपवनामोदवासितगन्धवहेषु, परितः परमप्रतप्ति–वितरणायैव साहाय्यमिव कर्तुं परेतभर्तुरभितः प्रसारितकरः *श्रीदेवी–न्दिराराज्यप्रभाव इव* चास्खलितशासनो दुःशासनो जनमनोविशोषणो मुहु–र्मुहुः सर्वतः प्रज्जवलितैरलातैः सर्वान् ... क्रमशो बहुलबाजः श्रीमान् निदाघराजः। (यात्राविलासम्, पृ.३)

अन्तर्द्वन्द्वश्च रामकरणशर्ममहोदयस्य मानसी व्यथेव **सीमा, रयीशः** ... आदिषु गद्यखण्डेषु स्फुटं भवति।

सामाजिकमूल्यबोधविषयाः तात्कालिकविषयास्तावत् केशवदाश–बन–मालिविश्वालादीनां कवीनां गद्यवैभवं प्रभावयन्ति।

व्यङ्ग्यपरकता तु प्रशस्यमित्रशास्त्रि–प्रभुनाथद्विवेदि–प्रभृतीनां काव्यं विभूषयति।

प्राचीनविषयाणां नवा चेतना ... मम मित्रप्रवरस्य नारायणदाशस्य **वह्निवलये** प्रत्यक्षीभवति।

एवमन्यान्यपि कवीनां गद्यकाव्यानि सन्ति, परमत्र समयानुरोधेन स्थालीपुलकन्यायेन उपस्थापितम्।

गद्यलेखनेषु कवीनां तत्–तत्–प्रादेशिकभाषाणां प्रभावः अभिनिवेशो वा क्वचित् संस्कृतस्य लालित्यं पुष्णाति क्वचिच्च तज्जहाति; इति विषये किंचिद् वक्तव्यम् –

प्रशस्यमित्रस्य **'अनाघ्रातं पुष्पं'** सामयिकं संस्कृतकथासंकलनम् इति ग्रन्थे हिन्दीभाषायाः प्रभावः सहजतया परिलक्ष्यते। तत्र मन्ये हिन्दीमेव संस्कृतेन अनूद्य लिखति। यथा –

शुभे ! एनं मिलतु, एष एव डॉ. हिमांशुः वर्तते।

अपि च भाषेतराणां वाक्यरचनायाः अथवा सूक्तीनामपि संस्कृतीकरणं कथासु भूरिशः विद्यते। राजेन्दमिश्र–नारायणदाश–वनमालिविश्वाल–प्रभृतीनां वाक्येषु तानि तानि प्रान्तीयभाषाणाम् / उपभाषाणां पदजातानि नवपदानि वा प्राप्य संस्कृतं इतोऽपि अधिकं पुष्टं जातम्। यथा – दाशनारायणस्य वह्निवलये –

'कुन्ती अद्य अरण्यवह्निवलये तिलं तिलं भूत्वा दग्धा भवति'। एवमन्येऽपि। किं च, नवशब्दनिर्माणकौशलं कवीनां प्रतिभाम् अभिव्यनक्ति। प्रशस्यमित्रस्य काव्ये यथा –

"यद्यपि चलचित्रटिकटप्राप्तौ तत्र महत्काठिन्यमासीत्, किन्तु सेवकस्य माध्यमेन यथाकथंचित् कृष्णक्रयपद्धति(black)द्वारा टिकटमवाप्तम्।"

तत्रास्य काव्ये स्वभाविकहिन्दीभाषाप्रभावः यथा –

मोहल्लानिवासी, तमाखुनलिका, ग्लासपात्रम् ... इत्यादि।

उत्कलभाषायाः स्वाभाविकः प्रभावो उत्कलीय संस्कृतकवीनाम् – 'बाबु रे, धन रे' ... इत्यादयः। वह्निवलये – भीमः वाचालः तस्य कथां न धरिष्यति। एवमन्येऽपि।

संस्कृतलेखने व्याकरणस्य शुद्धता अपरिहार्या दृश्यते। इतरभाषासु तथा व्याकरणप्रतिबन्धः नैव लभ्यते। परमत्र असंस्कार–च्युतसंस्कृति–अपप्रयोगाः कथमपि नैव सहनीयाः। तर्हि संस्कृतस्य कृते व्याकरणमर्यादा किं विडम्बना ???।

यथा – 'कार्यव्यापृत' इति अर्थे 'व्यस्त' इत्यस्य प्रयोगः समकालीने संस्कृतसाहित्ये बहुशः प्राप्यते। परन्तु 'busy' इति अर्थे व्यस्तः कथमपि व्याकरणमर्यादासम्पन्नं पदं नैव भवति।

अपि च – **'अनाघ्रातं पुष्पम्'** इति इत्यत्र 'प्रेमिकायाः रूपवर्णनं *स्मियते स्म* इति प्रयोगो दृश्यते। परमत्र 'स्मर्यते स्म' इति साधु। एवमन्येऽपि।

किं तर्हि भाषामर्यादा लेखकानां समक्षम् अस्वाभाविकम् ???

संस्कृते प्रसिद्धशब्दावलिविद्यमानेऽपि नवं किमपि यथाकथचिंत् शब्दनिर्माणं कविः विदधाति। तत् तु चिन्त्यम्। यथा – गुलाब इत्यस्य कृते पशस्यमित्रशास्त्री– "स्थलपद्मम् (गुलाब) इति प्रयुङ्क्ते। परं 'पाटलम्' इति प्रसिद्धं नाम दृश्यते कोशेषु काव्येषु च।

संस्कृतलेखकः कामपि भाषां रचनात्मकतया प्रयोगपरम्परायाः आस्वादं प्रदातुं शक्नोति। यथा इच्छरामद्विवेदकवेः 'प्रणव'स्य 'निरीक्षणम्' कथायां भट्टवाणस्यापरिसंख्याशैल्या समकालीकविसंगतीनाम् अभिव्यक्तिं सुतरां प्रशंसनीया। **(एकादशी)**

उपसंहारमुखेनेदं वच्मि –

विदुषां समवायेन मानकसंस्कृतशब्दकोशो निर्मापयितव्यः, येन कवीनां नवशब्दप्रयोगे सौकर्यं स्यात्।

कविभिः भाषामर्यादा पालनीया। येन शाश्वती प्रयोगपरम्परा पुष्टं स्यात्। संस्कृतसाहित्यं युगोपयोगि भवेत् – एतदर्थं प्रयतनीयम्। किं बहुना अल्पीयसी मे मतिः, तद्दृष्ट्या किंचिद् अत्र उपस्थापितम्, समालोचनम् अत्र नैव अभीष्टम्। मानसी व्यथा आकलिता। अग्रे कवयः प्रमाणम्। इति शम्।

****

भाषान्तरसाहित्यानां संस्कृतानुवादप्रक्रिया

भागीरथिनन्दः

अनुवादो विविधभाषासाहित्यसंवादाय विशिष्टं स्थानं भजते। भाषा कस्यचन प्रान्तस्यास्तु नाम तया रचितं साहित्यं तु सार्वजनीनं विश्वजनीनं च। तत्साहित्यरसास्वादाय अज्ञाततद्भाषाणां सहृदयानां कृतेऽनुवादस्य कार्यं सुमहद् वर्त्तते। एतेनाप्यपर उपकारो भवति भाषासाहित्यनिधिवर्धने। न च किमपि साहित्यं कस्याप्यस्पृश्यं शिष्यते। अतोऽद्यत्वेऽनुवादः साहित्यसमृद्ध्यै महत्वपूर्णमाह्वानमेव।

विश्वेऽस्मिन् भाषाणां सङ्ख्याऽगणिता। प्रत्येकस्यां भाषायां च विरच्यते साहित्यं तत्तद्युगानुरोधेन। तस्याममरनामानो रचयितारस्तत्कृतयश्च आसन् सन्ति च। ताः कृतयः कैश्चित् समर्थसमीक्षकैः कादाचित्कतया उदाह्रीयन्ते समीक्ष्यन्ते च। सा च तत्कृता समीक्षा सकलसहृदयपाठक-गोचरतां यातीति वक्तुं न शक्यम्। यतो हि कटुसत्यमिदं यत् समीक्षका अल्पीयांसः साहित्यस्य, अल्पतरा अपि साहित्यसमीक्षापाठकाः। आकालात्तु साहित्यरसास्वादकाः सहृदयाः पर्याप्तसङ्ख्याकाः। परन्तु सा सा विरचित-साहित्या भाषा तत्तत्सकलपाठकाज्ञातेति तत्तत्साहित्यं सकलैः पठनादरवद्भिः नैवालोडयितुं शक्यते। किंच साहित्यं न केवलमास्वादानन्दप्रयोजकम्। तस्यालोडनाभावात्तस्य प्रयोजनान्तराणि सहृदयमात्रगम्यानि नैव सङ्गच्छन्ते। यदशेषकल्याणाय विरचितं, तत् केवलं कतिपयमात्रानन्दकरं भूत्वा तिष्ठति। संसारस्य नानाविधसंस्कृतिसंस्कारव्यवहारचरित्रादिज्ञानं नैव सम्भवति सामाजिकानाम्। आधुनिकसाहित्यस्य मुहुर्मुहुः पद्धति-युगबोध-चिन्ताधाराश्च परिवर्तन्ते। इदं निश्चप्रचं वक्तुं शक्यते यदनेकेषु साम्येषु विलोकितेष्वपि परस्परं साहित्येषु, प्रत्येकं कविः स्वरचनावैशिष्ट्यादितरेभ्यो भिद्यत एव। उपादानानां समानतायामपि रचनाचातुरीपार्थक्यात् प्रत्येकं रचनाकारो नवीनमेकं भिन्नमास्वादमुपस्थापयति पुरतः सहृदयानाम्। परन्तु भाषाज्ञाना-भावात् तत्तन्महार्घमपि साहित्यं विदग्धहृदयानन्दकरं न भवति। एतेन, साहित्यानां परस्परं नावीन्य-पार्थक्य-वैशिष्ट्यादिज्ञानाभावेन सामाजिकः सुन्दरतरसाहित्यनिबद्धशिक्षाप्रदोपदेशान्न लभते। विश्वकवेः रवीन्द्रनाथस्य गीताञ्जलिकाव्यस्य, कालिदासस्याभिज्ञानशाकुन्तलस्य च यदि भाषान्तरेष्व-नुवादो नाभविष्यत्तर्हि भारतीयेषु तदितरेषु चानेकेषां तदन्तर्वर्तिनी महार्घता गोचरीभूता नैव समभविष्यत्। एवमपरेऽप्यनेके साहित्यिकाः प्रथितरचनाः सन्ति, येषां विख्याताः कृतयः सार्वजनीनसंवेद्यतायै भाषान्तरतामपेक्षन्ते। अतोऽनुवादः साहित्यव्याप्तिकारक इति नात्र संशीतिलेशः।

अनुवादो मूलाधारेण क्रियमाणोऽपि नैव कोऽपि सरलो व्यापारः। अनुवादकः स्वेच्छयाऽत्र किमपि कर्त्तुं नार्हति। इदं तस्य महत् काठिन्यं यत् तत्पुरस्तात् कस्यचन महतः साहित्यकारस्य कृतिर्वर्तते। साहित्यिको महान् लब्धयशा इति तस्य कृतिरपि महती नैव कदापि मन्तव्यम्, अपितु महत्या रचनाया स विशिष्टः। अतः विशेषतोऽनुवादपरम्परायां कृतिरेवोपास्या, न तु तद्रचयिता। अस्या उक्तेरयमत्राभिप्रायो यत् – रचयितृगौरवेण यदि रचना-नुवादः क्रियेत तर्हि तद्गतो भूयान् प्रभावः स्वतोऽनुवादसाहित्य आपतेत्। तस्मात् कृत्यनुवादस्थाने कृतिकारानुवादोऽनायासेन सम्भवेत् यः खलु नैवानुवादसाहित्यगौरवाय प्रवर्त्तेत। किंच साहित्यकृत्यनुवादकालेऽनुवादके तद्गतरसभावादिप्रभावसद्भावेनाऽनुवादसाहित्यमपि नवीनमिवाभाति। अनुवाद साहित्यस्य रुचिरां पृष्ठभूमिं विरचयताऽऽनन्दवर्धनेन ध्वन्यालोकें व्याहृतम् –

अतो ह्यन्यतमेनापि प्रकारेण विभूषिता।
वाणी नवत्वमायाति प्रकारान्तरवत्यपि।। ध्व. ४–२
दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ।। ध्व. ४–३

अनेनेदं स्पष्टं यत् मूलस्थरसभावादीननुवादको नैव त्यजेत्। तदत्यागेन सुन्दरोऽप्यर्थः सुन्दरतरः सम्पद्यते। अनुवादे तत्कर्त्ता नितरां व्यङ्ग्य–व्यंजकावुभौ सावधानेन प्रयुञ्जीत, येन मूलसाहित्यगता मुख्या रसधारा बाधिता न स्यात्। तत्रैवेदमानन्दवर्धनेनोदाहृतेषु दिङ्मात्रं यथा –

स विभ्रमस्मितोद्भेदा लोलाक्ष्यः प्रस्खलद्गिरः।
नितम्बालसगामिन्यः कामिन्यः कस्य न प्रियाः।।

इत्यस्य नवानुवादो यथा––

स्मितं किंचिन्मुग्धं तरलमधुरो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतानामारम्भः किसलयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः।।

अपि च

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै–
र्निद्रव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।

इत्यस्यानुवादो नवीन एवम् –

निद्राकैतविनः प्रियस्य वदने विन्यस्य वक्त्रं वधू–
बोधत्रासनिरुद्धचुम्बनरसाऽप्याभोगलोलं स्थिता।

वैलक्ष्याद् विमुखीभवेदिति पुनस्तस्याप्यनारम्भिणः
साकाङ्क्षप्रतिपत्ति नाम हृदयं यातं तु परं रतेः।

इतोऽस्माभिर्ज्ञायते यदनुवाद इति न केवलं भाषानुवादप्रदर्शनं, भाषाघटालेपोपस्थानं वा, अपि तु अनुवादो नाम भाषारसभावपरिवेशविषया–भिप्रायाद्यनुवाद एव। अतः यथाऽवधानवान् कविः काव्यरचनायाम्, तथैव सावधानः स्यादनुवादकोऽनुवादे। समर्थोऽनुवादकोऽपि न कदाचिदपि भाषा–नुकर्त्तेति मन्तव्यः केनचित्। यदि अनुवादकर्त्ताऽपरिचितमूलरचनः, न च मूलेनाप्रभावितस्तर्हि तदनुवादोऽपि बलात् क्रियमाणः इव प्रतीयते। यावत् न मूलस्थप्राधान्यावगाहि तावत् तत्कार्यं नैव साफल्यमाप्नोति। अनुवादो नाम भाषान्तरीकरणमात्रेति स्वप्नेऽपि न मन्तव्यम्। केवलं भाषातः साक्षाद्–भाषान्तरीकरणेनोभयोरविकलसाम्यदर्भनेनापि भावगतं पार्थक्यं तथा प्रतीयते यत् कदाचिन्मूले वर्णितो रामचन्द्रोऽनुवादे रावणायते। अतः मूललेखक–सन्निधापितव्यङ्ग्योद्देश्यं सम्यग्विज्ञाय तत्प्रकाशनाय भाषां प्रयुज्येत। शैलीसाम्यसहकृतभावसाम्येन साकं यदि भाषाऽविकलसाम्यं कस्यचनानुवादे सम्भवेत् तर्हि तं वयं मणिकाञ्चनसंयोगं ब्रूमः। किन्तु प्रयासोऽयं न सरलः। येऽस्मिन् प्रयासे दक्षास्त एव निश्चप्रचमनुवादपटवः।

मूलगद्येषु पद्येषु वा सुकविरलङ्कारान् यथासम्भवं प्रयुङ्क्ते। यद्यप्यलङ्काराणां प्रयोगो नानिवार्यः काव्येषु, तथापि तत्रालङ्कारोपस्थितिं नापाकर्त्तुं शक्यते कथचिंदिति प्राचामभिमतम्। पयो रम्यम्, परन्तु सशर्करं पयः कस्य न प्रियतरम्? परन्तु अनुवादकरणे एवं प्रतीयते यत्तेषां तत्र तत्र सन्निवेशितानामलङ्काराणामनुवादकभाषया मूलविषयानुवादेन सह प्रकाशनं न सर्वत्र सुकरम्। तथा कृते सति कतिचित् स्थलेषु प्रवाहगतो मुख्यो विषयोऽपि बाधितो भवति। कुत्रचिदपीदं परिलक्ष्यते यन्मूलानूद्य साहित्ये प्रयुक्तालङ्कारस्यानुवादेऽर्थान्तरता मूलाज्जायते। प्रत्येकं भाषाया मौलिकता नापाकर्त्तुं शक्यते। योऽलङ्कारप्रयोगः कयैकया भाषया रमणीयतामावहति, स इतरभाषयाऽपि तथा स्यादिति न मन्तव्यम्। अतस्तद्भाषया तद्भावमालक्ष्य तद्विषयानुरोधेन बाधाऽनुत्पादकालङ्कारसन्निवेशनेन विषयविन्यासस्यापराहता गतिः सम्भवेत्। अथवा तत्स्थाने तद्वर्गीयं योग्यमलङ्कारं च संयोजयितुं स्वच्छन्दोऽनुवादकः।

मूलरचनाकारो यद्यत्स्वकाव्ये वक्तुमभिप्रैति, तत्तदर्थं तत्तदनुकुल–शब्दानपि तत्र तत्र रचयति। तदीयभाषाया तद्भावं प्रस्तोतुं यावत् सुकरम्, तदस्मद्भाषया तावत् कठिनम्। एवम्भूतेषु स्थलेषु मूलरचनाभिप्रायप्रकाशनं यथा सम्भवेत्, तथा तदीयभाषा ईषत्परिवर्त्तिताऽपि प्रयोक्तव्या। परन्तु मूलस्थवर्णनाप्रवाहलयभङ्गो यथा न स्यात्। तथा सति अनौचित्यदोषो

अप्रासङ्गिकतादोषो वा सम्भवेत्। मुख्यरसप्रवाहनिर्वाहेऽपि तथा। अतो–ऽनुवादकस्य सूक्ष्मविषयावबोधः सम्यग् भवेत्।

प्रत्येकं भाषायाः काऽपि मौलिकता वर्त्तते, याऽनितरोपलभ्यमाना। एकमेवाशयं भाषमाणानां भाषाणां रचनाविन्यासकलेवरमपि पृथक् पृथक् परिलक्ष्यते। किं च एक एवाऽऽशयोऽपि समानया भाषया भिन्नभिन्नरूपेण पर्याया भवन्ति। एकस्यापि वस्तुनः प्रकाशकवाक्यानां रूपाण्यपि परस्परं भिद्यन्ते। कोऽपि जनः कस्याप्यपरिचितस्य परिचयजिज्ञासया – 'कस्त्वम्', 'कं पुनस्त्वामवगच्छामि', 'केन पुण्याभिधानेन विदितस्त्वम्' इत्येवमेवं रूपैरनेकैः पृच्छति। अपरं च, कयापि भाषया स्पष्टीभूतस्य कस्यचनाशयस्य तदितरभाषानुवादकाले प्रकाशनं नैव सरलम्। प्रत्येकं पदस्थं किमपि निर्दिष्टं प्रतिपादनमस्ति। भाषासु परस्परं धात्वर्था अपि भिन्नाः प्रतीयन्ते केचन। प्रान्तीयभाषासु कृत्रिमा अपभ्रंशधातवोऽपि साहित्ये प्रयुक्ता गोचरीभवन्ति। कुत्रचिदेवमपि दृश्यते यत् कस्यचन भाषान्तरप्रयुक्तक्रियापदस्य संस्कृतानु–वादे न तदर्थः स्पष्टीभवति। अपि च कस्यापि भाषान्तरस्थक्रियापदस्थ संस्कृतेऽविकलानुवादेऽपि तदन्तर्निहिताभिप्रायो नैव परिष्कृतो दृश्यते। एवमपि केचन शब्दा दृश्यन्ते, येषां तदनुवादयोग्याः शब्दा एव न लभ्यन्ते। कुत्रचिच्चाविकलशब्दानुवादे मूलस्थो भावप्रवाहोऽपि नैव सरति। एवम्भूतेषु स्थलेषु अनुवादयितुः मूलभावानुवादकरणमेव श्रेयस्तरम्। तदाङ्गिकतया यथासम्भवं शब्दा एव योजनीयाः। इदमपि तत्र सततं ध्येयं यत् कदाचिदपि तैः शब्दैः प्रसङ्गान्तरं न प्रकटीभूयादिति।

अन्त्ये इदं फलितं यदनुवादे भाषाभावशैल्यादिविषयाः प्रमुखतो ध्यातव्याः। भाषा नाम प्रकाशनप्रकारः, भावो व्यङ्ग्यरसवद्विषयाभिप्रायकः। शैली तु तदनुरूपविधिना तदुपस्थापनचातुरी, या च मूलकृतावपि दृश्यते। आङ्गिकतयाऽपराण्युपादानानि सम्मेलयितुमत्र शक्यानि। एवं संस्कृतानुवाद–साहित्यगरिमा वर्धेत। मूलस्य स्पष्टा च्छविरपि प्रकाशेत। मूलान्मूल–सफलानुवादस्याधिकतरप्रीतिभाजनता नासम्भवा मन्तव्या। अद्यत्वे पं. प्रेमनारायणद्विवेदी, प्रो.राधावल्लभत्रिपाठी, डा.जगन्नाथपाठकप्रमुखाः भाषान्तरेभ्यः प्रख्यातसाहित्यानां संस्कृतानुवादं विरचयन्तः प्रथन्ते। भाषान्तर–विरचितानां साहित्यग्रन्थानां संस्कृतानुवादेन संस्कृतस्य लोकप्रियता प्रवर्धेत, अस्माकं विविधभाषासंवादिसाहित्यं च प्रसिद्धिं गच्छेत्।

****

स्पशकथा : गद्यसाहित्यस्य काचिदनन्या प्रतिश्रुतिः

नारायणदाशः

उपक्रमः

'यदि इदानीम्तनेषु भाषासाहित्येषु स्वभाषायाः स्थानं द्रढयितुमिच्छन्ति, तर्हिस्वभाषां सज्जीकृत्य अधिकाधिकजनानां हृदयेषु मनःसु च सुप्रतिष्ठिताः भवन्तु। समस्तविधासु व्यापकतया लेखनीं व्यापारयन्तः समयेन सह चलन्तीभिः रीतिभिः सममितरभाषाप्रचलितानामभिनवप्रयोगानामुपयोगः संस्कृते अत्यावश्यकः' इति मतं वर्तते नवनीत जे. जोशी महोदयस्य[1]। अतः पुनरुज्जीवनाय नित्यनूतनविधानां परीक्षागारं जातं संस्कृतम्। तान्का, हायकू, सिजो, गजलादीनां प्रयोगस्तु संस्कृते बहुदिनेभ्यः भवति। विधावैविध्यं कस्यापि साहित्यस्य विश्वतोमुखत्वमेव प्रतिपादयति। तथापि गद्यं पद्यमिति तस्य मुख्यभेदद्वयं वर्तते। भट्टबाणात् भट्टमथुरानाथं यावत् संस्कृतगद्य–साहित्यस्य या अपूर्वा निरवच्छिन्ना च परम्परा, तत्र बहुः गद्यविधाः परि–स्फुरिताः सन्त्येव। पुरातनसंस्कृतसाहित्यस्य गद्यविधाभिः सहार्वाचीनसंस्कृत–साहित्ये उपन्यासाः, पुस्तकसमीक्षाः, ललितनिबन्धाः, व्यंग्यलेखाः, विनोद–कणिकाः, समाचारसमीक्षाः, पुस्तकसमीक्षाः, रेडियोनाटकानीत्याद्याः सर्वा–स्तास्ता नूतनविधाः प्रणीयमानाः सन्ति याः खलु नूतनभाषाणां साहित्यस्य अङ्गभूता मन्यन्ते। पण्डितक्षमाराव–राजेन्द्रमिश्र–केशवचन्द्रदाशप्रभृतयस्तु विधावैविध्यमनुसरन्तः समाजिकाः, ऐतिहासिकाः मनोवैज्ञानिकाश्च कथाः लिखित्वा यया कयाऽपि भाषया सह स्पर्द्धितुं संस्कृतमलमिति प्रमाणितवन्तः। आधुनिकसमीक्षकाणां देवर्षिकलानाथशास्त्रिणां 'आख्यानवल्लरी' गद्यकथा–संकलने नूतनयुगक्षुण्णाः सकलाः कथाप्रकाराः आलोचिताः सन्ति। तथापि अपराधान्वेषणपराः जासूसीकथाः, अत्यन्तलघ्व्यः कथाः, केवलं पत्रव्यवहारा–त्मिकाः कथाः दैनन्दिनीरूपाः कथाः चेदानीं यावत् संस्कृतसाहित्ये सुसमृद्धाः न सन्ति इति तेषां दुःखम्। परन्तु वस्तुस्थितिः तथा नास्ति। विगतवर्षेषु एताः अपि गद्यविधाः सन्देशभारती, लोकभाषासुश्री, उशतीत्यादिपत्रपत्रिकासु लघुकथा–टुप्कथा–पत्रकथा–स्पशकथानां च काचिदभिनवा परम्परा एव सुसमृद्धा जाता।

परिभाषा

'स्पशकथा' इति पदस्य प्रथमप्रयोगः केन विहितः, न ज्ञायते। परन्तु डॉ.विश्वासस्य सम्पादनेन **संस्कृतसम्भाषणसन्देशस्य** मार्च२०००सचिंका स्पशकथाविशेषाङ्करूपेण प्रकाशितासीत्। तदनुसारेण डॉ. वनमालि–

विश्वालमहोदयैः प्रतिपादितः सन्दर्भः यथा – "So far as the present concept of *Spasakatha* is concerned, I am not sure who is the first user of the term. However, so far as my knowledge goes, Dr. Visvas has published a special issue of **Sambhasanasandesa** on *spaasakatha* (March-2000) during the Sanskrit year celebration. In the editorial of that issue Dr. Visvas has discussed about the etymology of *Spasakatha* which is quite agreeable with the term *Spasa* as derivative from the root *spas* 'to spy'. Thus the meaning of *Spasa* is nothing other than spy and **Viśvakoṣa** says *Spasaḥ praṇidhiyuddhayoḥ*. It is needless to say that **Paspasahnika** of Patanjali has its origin from this root only. Moreover, the terms used in the expression like *'śabdavidyeva no bhāti rājanītirapaspaśa'* and *'Nirākṛte yadubhiriti prakopibhiḥ spase sanairgatavati tatra vidisam'* (Śisupālavadha -17.20) of Magha also speak a volume in this regard. अर्थात् विश्वकोशानुसरेण 'स्पशः प्रणिधि–युद्धयोः'। शिशुपालवधमहाकाव्ये अपि अस्य प्रयोगः दृश्यते। यथा – निराकृते यदुभिरीति प्रकोपिभिः स्पशे शनैर्गतवति तत्र विदिशाम् (१७. २०) एवं रूपेण अधुना अनुसन्धानात्मक–रहस्यमूलक–अपराधान्वेषपराणां कथानां पर्याये **'स्पशकथा'**शब्दस्य प्रयोगो भवति।

उपलब्धिः

सन्देशस्य स्पशकथाविशेषाङ्के काश्चन अत्युत्तमाः अनुदिताः स्पशकथाः एव प्रकाशिताः आसन्। ततः **उशती**(२००२)पत्रिकायाः गद्यविशेषाङ्के एका एव स्पशकथा लब्धा। सन्देशस्य नबम्वर–दिसम्बर–२००२, सचिंकयोः जनार्दनहेगड़े लिखिता **'व्यूहभेदः'** इत्येका स्पशकथा क्रमशः प्रकाशिता। सन्देशस्य जुलै२००३सचिंकायामपि किशोरीलालशास्त्रिणः जनवरी–एप्रिल२००३अङ्केषु **'अपराधिणः दूरभाषा', पूर्वानुमानम्', हत्या-कारिणः चिह्नम्', 'प्रतिरूपम्'** इति चतस्रः स्पशकथाः विलसन्ति। भारती–पत्रिकायाः जनवरी२००३अङ्के 'सत्यमेव जयते' इत्येकास्पशकथा प्रकाशिता। अधुना अत्र संगोष्ठ्यां **'हत्याकारी कः'** इति मदीयः एकादशस्पशकथानां संग्रहोऽपि लोकार्पितः। अत्र भूमिकायां देवर्षिकलानाथशास्त्रि–बनमालि–विश्वालमहोदययोः स्वीयं विचारमपि वर्तते। एतासां कथानां विहगङ्गावलोकनं नूनमपरं स्पशकथासंसारं प्रापयिष्यतीत्यत्र मामकीनः यत्नः।

विशेषता

प्रसिद्धसमीक्षकाणां देवर्षिकलानाथशास्त्रिणां मतेन स्पशकथासु रहस्यकथासु, गुप्तचरकथासु अथवा अपराधान्वेषणकथासु याः खलु पाश्चात्यभाषासाहित्यस्य आधुनिकभारतीयसाहित्यस्य च लोकप्रिया कथाविधा विद्यते, औत्सुक्ययोजना, पर्यन्ते विस्मययोजना, अद्भुतरसयोजना वा

प्रमुखमाधारभूतं वस्तु, आकर्षणस्य प्रथमं केन्द्रम, सारभूतं तत्त्वं भवति। अस्माकं नाट्यशास्त्रे काव्यशास्त्रे चापि औत्सुक्य–विस्मयतत्त्वयोः इत्याख्याय पर्यन्ते विस्मययोजनया पाठकेष्वाश्चर्यापादनं कियद् हृदयावर्जकं भवतीति जानीमः वयम्। स्पशकथासु द्वयोरनयोस्तत्त्वयोरेव प्रमुखभूमिका भवति। ... अपराधान्वेषणकथासु तु शब्दाडम्बरो विस्तरो वाऽपराध एव भवतीति विदन्त्येव सुधियः। आरम्भेऽन्ते च वैविध्योत्पादनाय कुक्कुरध्वनेरुलूकध्वनेर्वा, सूर्योदयसूर्यास्तादिसङ्केतस्य वोल्लेख एतादृशकथानां सामान्याप्रकृतिर्दृश्यते सर्वासु भाषासु। अत्र कथायोजनायां (आद्यन्तमौत्सुक्यस्य निर्वाहोऽत्यावश्कः, तदर्थमेव कथायाः आरम्भः हठात् करणीयः)।

द्रव्यपरीक्षा

इदानीं यावत् प्रकाशितासु कथासु एते गुणाः सन्तिः वा नेति प्रमुखो विचारणीयो विषयः वर्तते। व्यूहभेदकथायाः औत्सुक्ययोजना यथा 'प्रातः षड्वादवने दूरवाणी ध्वनिमकरोत्। रमेशः ध्वनिग्राहकम् उन्नीतवान्। हलो, हलो,...। रमेश....? विकटाट्टहासयुक्तः कश्चन ध्वनिः श्रुतः। ... तत् तु पुनः वदिष्यामि। दूरवाणीस्थापनशब्दः श्रुतः। हलो, हलो... ...। हलो... हलो....। न किमपि उत्तरम्।' एषा बहुदीर्घा षट्पृष्ठपरिमिताकथा। विस्मयादिरसयोजनायां परां काष्ठां न गता। भाषा सरला। चित्राणि सुन्दराणि को हन्ता कथापि दीर्घा, पञ्चपृष्ठात्मिका। चित्रे चलनीये। परन्तु रसयोजना समीचीना। आद्यन्तमौत्सुक्यस्य निर्वाहः। भाषा सरलापि औत्सुक्यपूर्णा – 'सः तत् स्थानं प्राप्य यावत् बहिः पश्यन् आसीत् तावत् कुतश्चित् भुशुण्ड्या प्रयुक्ता गोलिका तस्य यानस्य आसन्दे संलग्ना अभवत्। ... शय्यातः शनैः उत्थाय द्वारस्थेन लघुरन्ध्रेण बहिः दृष्टवान्। तत्रत्यं दृश्यं दृष्टवतः तस्य शरीरं कम्पितमभवत्। तत्र कश्चन धृतप्रावारकः स्थितः आसीत्। तस्य वदनं वस्त्रेण परिवेष्टितम्। केवलं नेत्रे दृश्येते स्म। ... तावता द्वारोद्घाटनस्य शब्दः श्रुतः। सः परिवृत्य यदा अपश्यत् तदा सं एव धृतप्रावारकः भुशुण्ड्या तम् उद्दिश्य गोलिकाप्रहारं कर्त्तुम् उद्युक्तः अभवत्। परन्तु तावता अकस्मात् अज्ञातदिशः आगता काचित् गोलिका तस्य आगन्तुकस्य हस्ते आघातमकरोत्।

सन्देशस्य स्पशकथाविशेषाङ्के प्रकाशिताः कथाः अनुदिताः अपि अत्युत्तमाः आदर्शस्थानीयाः सन्ति।

'क्षणं विरम्य बुक्कति वीथीकुक्कुरः। वृक्षशाखायाम् उलूकस्य विरावो भयङ्करः । घनघोरा निशिथिनी दीर्घायते लीलायाः दीर्घश्वासैः सह। तस्याः मनसि आसीद् बाल्ये पठिता काचित् स्पशकथा धूमनलीं पिबन् मस्तके शिरस्त्राणं धारयन्, घनान्धकारे विचरति ००७ जेम्सबांड, यस्य सिगारे

संयुक्ताग्निः द्प्–द्प्भवति। पार्श्वे सुप्तः पुरुषः स्वीयः पतिः वा न वेति जिज्ञासा तस्याः बलवती। ... क्रमशः दूरदिग्वलये आरक्षियानस्य गमनशब्देन सह पेचकस्य विकरालध्वनिः रात्रेः गभीरतां सूचयति स्म। उशतीपत्रिकायां प्रकाशिता एषा कथा क्षुद्रा, औत्सुक्यपूर्णा, हठात् प्रारब्धा, सरलापि, अन्ते पेचकध्वनिना विकराला च वर्तते।

भारतीपत्रिकायां दृष्टा कथा लघ्व्यपि, चारुशब्दावलीयुता सती आवर्जयति सहृदयानां मनांसि। यथा – 'अशोकप्रमोदोद्यानस्य प्रतीपम्। अम्बिकाचित्रोत्तलनकेन्द्रः। द्वितलप्रासादः। उत्तोलकः अम्बिकादत्तः। व्यवहारे निपुणता। नेत्रयोः सरलता। हस्तयोः कुशलता। सम्पूर्णे केन्द्रे सौन्दर्य्यबोधस्य मादकता। चित्रेषु प्रदर्शनस्य अपूर्वता। रहस्यकुमारस्य परीक्षणे चञ्चलता। कुत्रापि न लब्धा अबैधता। तत्र विज्ञापिका कन्या काचित्सुसज्जिता। सन्देहप्रसरे आरक्षीमण्डलीप्रत्यागता।'

लोकभाषासुश्रीपत्रिकायां प्रकाशिताः चतस्रः अपि कथाः अतिक्षुद्राः, विस्मयादिरसपरिपूर्णाः, सरलभाषालिखिताः, जटिलानुसन्धानप्रक्रियामण्डिताः लेखकस्य साफल्यं निरूपयन्ति। आस्वादयन्तु तावत् अपराधिनः दूरभाषा कथयाः कियदंशम् – "आम्, शृणोतु, रक्तवर्णस्य तन्त्रीं वियोजयतु। शृणोति वा न ? ... किमर्थं न वियोजयति। निमेषद्वयम् अवशिष्यते।" अधुना विचारसकङ्टे पतितः कुमारः। "किमर्थमिदानीं यावत् रक्तवर्णस्य तन्त्रीं न वियोजयति? "नहि श्रीमन् अहं तु तन्त्रीं वियुक्तवानेव । परन्तु रक्तवर्णयस्य नहि, नीलवर्णस्य।" किमर्थं तथा कृतवान्? यतो हि भवतः धृष्टता मया अनुमिता एव आसीत्। अहं रक्तवर्णस्य तन्त्रीं न वियुक्तवान् इति भवता कथं ज्ञातम्? यतो हि त्वया दूरभाषया विस्फोटशब्दः न श्रुतः। ...

श्रीमतां हस्तगतः **हत्याकारी कः** इति मदीयः स्पशकथासंग्रहः न जाने अस्मिन् नव्यप्रस्थाने अद्वितीयः वा न वेति। डॉ.विश्वालस्य मतेन तु – 'I can't say if Dr. Dash is the first person to write detective stories in Sanskrit, but I am sure, this is the first collection in this direction.' अस्य रिक्तताया: पूरणं कर्त्तुं भवादृशाः गद्यकाराः सर्वथाः सन्त्येव। तंतः किचिंदेव समुपस्थापयामि श्रीमतां पुरस्तात्। "अहमेकस्य हननं कृतवान्। परन्तु तत्र किमापि प्रमाणं नास्ति। भवतः कथनं तु वर्तते, यथा चतुरः भवतु नाम हत्याकारी, अवश्यं किमपि कारणं तथ्यं वा त्यजति एव, येन तं निगडितुमपि शक्यते। तर्हि महोदय! कृपया प्रमाणयतु मया हननं कृतमिति। इदं मम आह्वानं स्वीकरोतु"। "परन्तु भवान् कश्चन विचारकः, न्यायपालिकायाश्च रक्षकः। भवतः पूर्णः विश्वासः भवेत् देशस्य न्यायव्यवस्थायाम्। भवता हस्ते न्यायः ग्रहीतव्यः नासीत्। अधुना एनं

निगडयतु सहकर्मी। किं देवीदत्त– महोदयः भवदीयः हननाभियोगः निरस्तः वा न वा ? अपि त्वया ज्ञातः प्रकृतः हत्याकारी कः? मम जीवने अर्जितस्य आदर्शबोधस्य अधुनातनसमाजे स्थानं नास्ति। तस्य मरणं जातम्। तेन सह मम मरणमेव समुचितशणम्। तेन राधास्वामिनः कृष्णस्वामिनः वा बाधा नास्ति। पुत्रस्य कृते मम वृत्तिः मिलिष्यति। मरणोत्तरधनेन च कन्यायाः विवाहः भविष्यति। पुनः जीविष्यामि चेत् पुत्रः वा कन्या वा राधास्वामी वा अवश्यं मां मारिष्यति। ... अधुना चिन्तयन्तु भवन्तः वस्तुतः कः सत्यप्रियस्य हत्याकारी? भवत्सु कोऽपि तं न हतवान्, न वा जीवितुं दत्तवान्। न्यायपालिकायाः वैफल्यमेतत्। समाजे कस्यचन जीवनापेक्षया मरणस्य मूल्यम् अधिकं भवति। तेन जनाः पितरं मातरं वा निस्सङ्कोचं हन्तुमपि पश्चात्पदाः न भवन्ति। अतः जागरुकाः भवन्तु, यथा पुनः सत्यप्रियाणां मरणमेव शरणं मा भवतु।"

मदीयकथासु मदीया टिप्पणी मास्तु इति धिया संग्रहस्य प्रस्तावनायां देवर्षिकलानाथशास्त्रिणां डॉ.बनमालिविश्वालानां मतमेव समुपस्थापयामि। यथा – "एतासु कथासु वर्तमाने युगे, आधुनिकमहानगरेषु, साम्प्रतिकीषु स्थितिषु च क्रियमाणानामपराधानां संवीक्षा, अपराधिनिग्रहश्च कथं महता कौशलेन प्रणिधिभिरारक्षिभिश्च क्रियते इत्यस्य यथार्थवर्णनं संस्कृतसाहित्ये नूतनमायामं प्रतिनिदधाति। मानवहत्याया, अपहरणस्य, प्रवंचनस्य वा कः खल्वपराधी इति औत्सुक्यं प्रथमतया पाठकस्य मानसे सततं संचरित, पर्यन्ते चापराधिनो रहस्योद्घाटने सति विस्मय उदेतीति कथा इमाः पाठकान् आद्योपान्तं प्रभावयन्ति। तदत्रापि परिदृश्यते पाठकैः आधुनिकाभिव्यक्तीनां कृते नूतनपर्यायोद्भावना, साम्प्रतिकस्थितीनां वर्णने याथार्थ्ययोजना, शैल्याः सुबोधता च कथानामासां प्रत्यायकत्वं समेधयन्ति।"

"He has given a very powerful beginning and interesting end to these stories. This sort of effort is really commendable because such trend is new in the field of contemporary Sanskrit literature. Dr. Dash's attempt in this direction in the form the present collection is no doubt, the first of its kind. The language and approach of Dr. Dash in this collection, forces his readers to complete the story in a single sitting, because the suspense is maintained till the end."

उपसंहारः

स्पशकथाः ऐदंप्राथम्येन वर्षत्रयेभ्यः लिख्यन्ते। अस्य नूतनगद्य–प्रस्थानस्य सुमहत् भविष्यं वर्तते। नूतनगद्यविधाप्रयोगैः स्वक्षुरक्षुणैः नव्य–प्रस्थानस्य सर्जकानां कृते इह वर्तते स्वर्णिममामन्त्रणम्, काचिदनन्या

प्रतिश्रुतिश्च। उपसंहारमुखेन अहं पुस्तकस्थं ममाभिलाषमेव पौनः पुन्येन पत्रस्थीकरोमि – "समाजे अनुदिनं बर्धते हनन–लुण्ठन–धर्षण–शोषणादि–व्यभिचरणानां भव्यपरम्परा। एतादृशकथाः श्रावं श्रावं जागरुकानां मानवानाम् अपि गोत्रस्खलनं भवति। अतः एतस्मात् स्पशकथानाम् आद्यसंकलनात् यदि कोपि लाभः भवेत् पाठकानां तर्हि मम श्रमः सार्थकः जात इति चिन्तयिष्यामि" इत्यलं बहुना।

सन्दर्भः -

१. दृक् ७पृ. ६१
२. हत्याकारी कः पृ.५
३. तत्रैव, पृ.६
४. तत्रैव, पृ.६
५. सन्देशः, नभे. २००२,पृ ११
६. सन्देशः, जुलै–०३, पृ.१२
७. उशती– २००२ पृ. ८२
८. भारती, जन ०३, पृ २४–६
९. लोकभाषासुश्रीः, जनवरी–२००३,पृ४
१०. हत्याकारी कः, पृ.६
११. तत्रैव, पृ २३–२६
१२. तत्रैव पृ.३०
१३. तत्रैव, पृ ७
१४. तत्रैव पृ. १०
१५. तत्रैव पृ.११

****

कथात्मकं गद्यकाव्यं त्रिपुरदाहकथा

कुसुम भूरिया

पं.रामस्वरूपशास्त्रिमहोदयेन (भूतपूर्वाध्यक्षः, संस्कृत–हिन्दी–विभागे, अलीगढ़–विश्वविद्यालये) रचिते त्रिपुरदाहकथेति (१९५९ नवपञ्चाशदधिको–नविंशशततमे ख्रीष्टाब्दे विरचिता) गद्यकाव्ये शिवपुराणमयी त्रिपुरदाहस्य कथा सुष्ठु विराजते। कीर्तिकेयेन निहतस्य तारकासुरस्य पुत्रत्रयस्य (तारकाक्ष–विद्युन्माली–कमलाक्षस्य च) महता तपसा सुप्रीतो ब्रह्मा तेभ्यो वरं दातुं विवशो भवति। तेषामभीप्सितानि सर्वसम्पत्समेतानि स्वर्ण–रजत–लौह–मयानि च नगराणि निर्माप्य एकस्थलस्थितानि अभिन्नात्मकतयैकपुरीरूपेण दृश्यानि ददाति। तत्र निवसन्तस्ते शिवार्चनां कुर्वन्ति, शनैः शनैश्च स्वर्गवासिदेवानां प्रति भृशमत्याचारं कुर्वन्ति। तदा देवैः प्रार्थितः सन् शिवः देवमयम् अलौकिकं रथमारुह्य त्रिपुरीं भस्मसात् करोति। येन तेऽपि असुराः तत्रैव दग्धाः भवन्ति।

शिवपुराणे निबद्धायामस्यां कथायां कथाकारेण कविना पंडितवर्येण रामस्वरूपशास्त्रिमहोदयेन किंचित् कुत्रचिच्च परिवर्तनमपि कृतम्। यथा–

१. त्रिपुरासुरस्य यातनाभिः प्रपीडितानां देवानां स्तुतिभिः प्रसन्नः शिवः तैः सह वार्तालापं करोति, तदैव पुत्राभ्यां सह पार्वती तत्र आगच्छति। शिवः स्वपरिवारेण सह प्रीतियुक्तः सन् वनेऽन्तर्हितोऽभवत्। तदा शिवोपासकाः देवाः परस्परं सम्भाषमाणाः चिन्तिताश्च किंकर्तव्यविमूढाः संजाताः। तेषां कलकल–माकर्ण्य शिवसेवकः कुम्भोदरः तेषामुपरि दण्डप्रहारं अकरोत्। अनेन देवगणाः अतीव त्रस्ताः अभवन्। शिवपुराणीया इयं कथा कविना अस्मिन् गद्यकाव्ये परित्यक्ता। यतो हि सर्वैः पूज्यैः देवैः सह शिवसेवकस्य एतादृशः व्यवहारः कदापि नोचितः।

२. द्वितीयं परिवर्तनं एतादृशमस्ति। त्रिपुरनगर्यां विष्णुमायोत्पन्नः मुण्डी स्वशिष्यप्रशिष्यैः सह यदा अधर्मप्रचारं करोति, त्रयोऽपि असुराश्च तस्मिन् दीक्षिताः अधर्मरताश्च भवन्ति। तदैव नारदस्तान् प्रशंसन् कथयति – "यद्यपि सौन्दर्यलावण्यमदमानिन्यो देवदेवानां मत्तकाशिन्यः कामिन्यो बहुलाः विद्यन्ते वो विलासभूमयः। तथापि त्रिलोकीसुन्दरीसौन्दर्यमिदं परिभावयन्ती भवानी नास्ति युष्मदवरोधसाधनी भूतेत्यसामंजस्यकारी अनौचिती दृश्यते। तां विना भवद्विभूतिविलासभवनं रूपवतीरहितमिव प्रतिभाति। तामवाप्तुं सत्वरं

यत्नपरैर्भाव्यं भवद्भिः" इति[1]। नारदेन एवं प्रेरितास्ते स्वसेनानायकं आदिशन् – गच्छ गिरिशं ब्रूहि च तम्। देहि हिमाद्रिजामस्मन्नायकेभ्यः त्रिपुरीनायकेभ्यः चेदिदं तस्मै नारोचिष्यत तर्हि बलात्तामानेष्यः। प्रयुज्यस्व च तस्मिन् दुर्धर्षणानि वचांसि। यत् त्वं जरठः श्मशानवासी चिताभूत्युपलिप्तांगः कापालिकोऽसि किमनया स्वरूपवत्या त्रिभुवनविलासिनीनामग्रगामिन्या हैमवत्या तेऽभिलषितन्नाम"[2]। सेनानायकेन तदविधमेव दुर्व्यहृते सति क्रुद्धः शिवः स्वफूत्कारेण महाभीषणं वीरपुरूषमुद्भावयति, यः तं राक्षसं तत्कालं यमसदनं प्रेषयति युद्धार्थं आगतां सेनां च व्यापादयति। शिवस्य क्रोधाय इदमेव कारणं पर्याप्तमस्ति इति मत्वा कविना अयं प्रसंग रचितः स्वकाव्ये। शिवपुराणे अयं नास्ति।

रसनिष्पत्तौ कवेः कौशलं प्रशस्तं विद्यते। देवासुरयोः युद्धवर्णनं तु अस्याः कथायाः वैशिष्ट्यं वर्तते। स्वसैन्यानुगताः मयसहिताः अत्यन्तप्रचण्डाः त्रयोऽपि असुराः यदा महेशं विजेतुं प्रस्थिताः अभवन्, तदा तेषां भयंकरतां वर्णयन् कवि कथपति "ततो हरः हलिहलाकृष्टकालिन्दीप्रवाहपटलानिव त्वरितत्वरितान्, अनुकृतकालदण्डभुजान्, वायुवेगप्रचलिततमालतरूनिव एकत्रितान्, कालनिशायामसंधानिव, भूप्रकम्पप्रचलितान् कज्जलशिलामयस्तंभ कदम्वानिव, अंधतमसपुंजानिव, परिभ्रमतोऽनेहः परिजनानिव, एकीभूतदुष्कृत–संघातानिव, गतिमता महर्षिजनाऽऽक्रोशसमूहानिव, कलिकालप्रियजनानिव, अरण्यसैरिभयूथानिव, शितिघनराशीनिव, भीमभीमाकृतीन् पलाशिनां अनीकान् सम्परायमुद्घोषयतः पुरस्ताद्ददर्श[3]। वर्णनमिदं किंचित् क्वचित् बाणभट्टस्य शैलीमनुसरति।

बीभत्सरसस्य वर्णनं दृश्यताम् – "क्वचित् सूनेव साकारं बीभत्सरसं धरति। परुषमकरूणं हतानां चतुष्पदादीनामनेकशः संघान् बिभर्ति। केषां चिन्मुण्डाः इतरेषां कबन्धाः धरायामितस्ततो लुठंति। क्षीवाः क्रव्यादयश्चापक्वं पिशितमश्नन्ति। गतासूनां चतुष्पदानामुत्कृत्योत्कृत्य मज्जां भिन्नाभ्यो नाडीभ्यः पृथग्भूतेभ्यो विग्रहप्रदेशेभ्यश्चादन्ति। यतो हिंसारतिस्तदीया न विनाशमिता।"[4]

देवारयः युद्धभूमौ यदा देवैः पराजिताः अभवन्, तदा तैः देवसैन्यं प्रति ये नागाः प्रेषिता, तेषां करालतां वर्णयन् पंडितवर्यः कथयति – "ततस्ते जिह्मगामिनां द्विजिह्वानां बृहतो विपुलाननीकान् आननिःसृतेन गरलानलेन तत्रत्यानि सत्वानि क्षयमापादयितुं कृतोद्योगान् फूत्कारानिलेन च पुञ्जीभूतेन परितापयितृन्, संघसंघेषु पवनपदवीमुद्गच्छतः अरुणसारथिपथमप्यवरोद्धु–

मिच्छतः, दिवसमपि कृष्णकान्त्या निशायितं प्रदर्शयतः व्याप्तान्तरिक्षमध्यान् विसर्जयामासुः।" ५

कविः प्राचीनगद्यकाराणां शैलीमनुसरन् कुत्रचित् दीर्घवाक्यमपि रचयति। तारकपुत्राणां पुरत्रयस्य शोभां समृद्धिं च वर्णयन् पृष्ठात्मकं एकं वाक्यं दृश्यताम् – "तत् पुरत्रयं कल्पद्रुमैः समन्वितं, अनेकगजवाजिसमाकुलं, बहुसुरम्यप्रासादोपेतं, हृतहृदयाभिर्हर्म्यमालाभिः रत्नराशिभिश्चान्वितं, सर्वतो–मुखैः कृतवियन्मानैर्विमानैः समधिगतं, इन्द्रप्रभैमृगांकमणिभिः पद्मरागैश्च सम्पन्नशोभं, प्रतिगेहं रुद्रालयैर्दीपितं, सर्वेश्वरोपास्तिपरैः समस्तशास्त्र–विशारदैः विद्वन्मणिभिः विहितवासं, सुभगैर्वापीकूपतडागैः चतुरस्रपीनैः सूद्या–नैश्च रामणीयकमुपनीतं, नदनदीतीर्थैः विविधमधुररसफलभारविनतै–स्तरुभिश्च भृशं प्रियं, मत्तमातंगयूथैः मनोरमैः प्रजवैस्तुरंगैः विभिन्नविशाला–कारैः स्यन्दनैः हृद्याभिः शिविकाभिश्चालंकृतं, मानसवृत्तिविहरणप्रवणपृथङ्–निर्माणैः क्रीडास्थानैः बहुलाभिः वेदवेदाङ्गाध्ययनशालाभिरभिरामं, मनसा वचसा कर्मणा च पतिव्रत्यव्रताधाननिरताभिः सत्पथप्रकाशं प्रसारयन्तीभि–र्वनिताभिर्विहिताधिवासं, बृहद्भांगधेयैर्दनुजशूरैः कृतश्रौतस्मार्तार्थतत्त्वविवेकैः धर्मधुराधारकैरवगीतपुण्यश्लोकं, वृषस्कन्धैव्यूढोरस्कैः योधैः आयोधनकुशलैः उद्भटसमरविलासैः शिर्वाचनाविविक्तान्तःकरणैः अवगणितरविमारुतमहेन्द्र–शक्तिभिः असदृशवीर्यबलैरमरध्रुग्भिरासेवितमभूत् यत्र वेदादिप्रतिपादिता धर्माः प्रमुखमृडोपासनया सुकृत्याऽनारतं प्रकर्षमादधाना द्योतन्ते स्म"[६] इति।

काव्ये नाम्नः सार्थक्यं वैशिष्ट्यं चापि कविना सिद्धीकृतं विद्यते। यथा कुमारकार्तिकेयस्य नामसार्थक्यविषये स कथयति – "यश्च कौमारोचितं वेदव्रतमनवरतं पालयन् कौमारे तारुण्ये वार्धके च **कुमार** इत्येवाभिज्ञां संज्ञांनिर्भरं भूषयति। असमं योगं युज्यमानो युक्तयोगीत्यभिधामलंकरोति च[७]"। पार्वत्या वैशिष्ट्यं वर्णयन् कथयति सः – "इयं च महेश्वरी तुषार–सानुमदात्मजा, कृतलोकोत्तरतपश्चराणां, नाकिपत्नीशेखरकुसुममालावन्दित–पदपद्माभवानीत्याख्यां प्रेष्ठां श्रेष्ठामादधाति। या च अचिन्त्येन महामहनीयेन मोहनीयभुवनत्रयेण, सकललोकसुन्दरी सौन्दर्यमददमनीयेन रूपेण जगन्मो–हनीति संज्ञां दधाति"[८]। तथा च "जगतां सर्जनावनावसानेषु रजःसत्त्व–तमांसीति गुणान् यथाक्रममादधाति स्वमूर्त्तौ तन्महिमगरिम्णा महाकालप्रियां महाकालीं, सातत्येन सुभृशं उल्लासशालिनीं लक्ष्मीं च प्रबोधप्रवाहप्रसारां सरस्वतीत्याख्यां महाभिख्यां दधाति"[९]। एवं च विश्वस्य पालनकर्ता विष्णुः कथं विश्वम्भरोऽस्तीति कथयन् तस्य सार्थक्यं कविः वर्णयति – "जगतां

स्थितौ पालने च भवानेव प्रवणः सन् विश्वम्भर इत्यभिधां दधाति[१०]। अपि च "ते लोकशंकरं शकरं स्तुतवन्तः", "प्रकम्पमानः प्रकम्पनस्तु यथार्थाख्या–मन्वर्थयन्" [१२] तथा च "आशुतोषाशुतोष्णे" इत्यादि – स्थलेषु नाम्नः सार्थक्यं वर्णयति कविः।

यद्यपि काव्ये अलंकाराः यत्र तत्र विराजन्ते, किन्तु अनुप्रासस्य छटा विशेषरमणीयां अस्ति। यथा – धनपते रूपगतप्रभापुष्पकं[१३] दिगीशाः विदिगीश्च[१४] यस्यांघ्रिसरोरूहाणि प्रणामं प्रणाममदं प्रमद्रं लभन्ते[१५] स एव भवदापद्वारणे सक्षणः क्षणं क्षमः[१६] आयोधनं च भीष्मभीष्मं भूतवत्[१७] समभिनन्दितेश्वरः नन्दिकेश्वरः[१८] प्राविशदमरामोदसारदो नारदः[१९] इत्यादि।

प्रसंगानुसारः नाट्यशास्त्रीयशब्दानामपि उल्लेखः करोति अयं पंडितः एतस्मिन् गद्यकाव्ये। त्रिपुरासुराणां विलासभवनस्य वर्णने नाट्यनृत्तनृत्यानां तथा च नायिकानामलंकाराणां भावानां वा उल्लेखः विद्यते दृश्यताम् – "चतुर्थे च यथासमयमसमयं वा तानि तानि रागविलसितानि नाट्यनृत्तादीनि विधातुं साफल्यन्नीतानि कोष्ठानि तैः स्वस्मिन् दुर्गे। तथा च तत्रैव – एकदा ते चारुचन्द्रिकाचर्चिते धवलितप्रासादतले वारविलासिनीभिः मधुरहासं प्रिय–विलासं नृत्यान्ते निवृत्यानुभूय च तासां लीलाविच्छित्तिविभ्रमकिलकिंचित्–प्रभृतीनां भावानां मधुरिमाणं विश्रमितुमैच्छन्।"[२०] एते नयिकानां स्वभावजाः भावाः भवन्ति।

कैलासे रात्रिवर्णनप्रसंगे कविः नायिकानामवस्थानां स्वाधीनभर्तृका–दीनां मनःस्थितिं वर्णयन् कथयति "सम्पन्नसकलकलः कुमुदिनीनायकः चकास्ति। यस्याह्लादिकाभिरमलाभिर्धवलाभिराकलिता ज्योत्स्ना समुत्कयति मनांसि मनस्विनीनामवियुक्तभर्तृकाणाम्, विकलयति च तृन्दि प्रोषित–पतिकानां कामिनीनां, प्रेयसीविरहमनुभवतां पत्येषुशरलक्ष्यभूतानां प्रवासेविनां नृणां च। चटुलयति च या चंचूपुटान् चकोराणामनुकृतोत्कंठित प्रकाराणाम्।"[२१] अत्र स्वाधीनभर्तृका–प्रोषितपतिका–उत्कंठितादि–नायिकानां उल्लेखः विद्यते।

त्रिपुरासुराणां यातनाभिः त्रस्ताः देवाः यदा स्वरक्षणार्थं शिवं प्रार्थयन्ति, तदा शिवः सारथिसहितस्य दिव्यरथस्य निर्माणार्थं तानादिशति। शीघ्रमेव तैः यः अलौकिकः रथः निर्मितः, तस्य वर्णनं शिवमहिम्नःस्तोत्रस्य निम्नलिखित–पद्यवत् अस्ति –

रथः क्षोणीयन्ताशतधृतिरगेन्द्रोधनुरथो,

रथांगे चन्द्रार्कौ रथचरणपाणिः शर इति।

दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिः

विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः।।[२२]

शिवारूढस्य तस्य देवमयस्यालौकिकरथस्य गौरवस्य तेजसश्च वर्णनं कविः करोति – श्रुतिसंभवाः वाहाः वोढुं तन्न शेकुः। शिरोभिर्धरण्यां पेतुः। धरापि अनन्वर्था संज्ञामभजत्। धराधरा न ध्रियन्ते स्म। तद्भारस्यासोढा शेषः आतुरः सन् सहसा चकम्पे। वृषेन्द्ररूपो भगवान् भूघ्नपोऽस्याधस्तात् स्थित्वा चोत्थायेममुत्थापयितुं येते। सोऽपि जानुभ्यां धरित्रीमगमत्। न सेहे तदारूढमहेश महातेज ओजोगौरवम्।"[२३]

कथायां आध्यात्मिकतत्त्वमपि निहितं विद्यते। अत्र विहितः यः रथः स देहः, शरीराङ्गानि रथावयवाः च सन्ति। त्रीणि च पुराणि कामक्रोधलोभाः रागद्वेषमोहाः वा। मानवशरीरे यथास्थानं विद्यमानाः एते दोषाः एव मानवस्य शत्रवः सन्ति। कामस्य स्थानं हृदयं, क्रोधस्य मस्तकं लोभस्य च मुखम्। एतेषु प्रत्येकः शत्रुः पुरस्थानीयोऽस्ति। यथा नगरे पुने वा असंख्याः पदार्थाः वस्तूनि प्राणिनश्च निवसन्ति, तथैव कामादिषु रागादिषु वा रिपुषु प्रत्येकत्मिन् अनन्ताः भावनाः परस्परं भ्रातृवत् निवसन्ति, मानवं सततं पीडयन्ति च। ब्रह्मज्ञानशिवेन तेषां शत्रूणां विनाशः भवति। ब्रह्मज्ञानान्तरं तु सर्वं आनन्दमयं भवति, ब्रह्ममयं भवति।

अस्मिन् गद्यकाव्ये आदौ मध्ये अन्ते च श्लोकमयी शिवस्तुति– र्विलसति। ओजोगुणयुक्तं समासयुक्तं त्रिपुरदाहकथेति गद्यकाव्यं लघुकलेवरं अस्ति तथापि स्वशैलीनैपुण्यादिवैशिष्ट्येन आधुनिकसंस्कृतगद्यसाहित्ये महत्वपूर्ण स्थानमधिगच्छति।

सन्दर्भाः

१. त्रिपुरदाहकथा पृ. ३४ (अलीगढ़ विश्वविद्यालय प्रकाशन)
२. " पृ. ३५ "
३. " पृ. ३८–३६ "
४. " पृ. ३१ "
५. " पृ. ४० "
६. " पृ. ४ "

७. "	पृ. २४	"
८. "	पृ. २५	"
९. "	पृ. २६	"
१०. "	पृ. ५४	"
११. "	पृ. ०६	"
१२. "	पृ. ३२	"
१३ "	पृ. ०५	"
१४. "	पृ. ०५	"
१५	पृ. २४	"
१६. "	पृ. ०६	"
१७ "	पृ. ३६	"
१८. "	पृ. २५	"
१९. "	पृ. १७	"
२०. "	पृ. ३३	"
२१ "	पृ. २०–२१	"
२२ शिवमहिम्नःस्तोत्रम्–१८		"
२३ त्रिपुरवाहकथा	पृ. ४४	"

****

आधुनिकसंस्कृतगद्यसाहित्ये पं. ब्रजभूषणमिश्रमहोदयस्यावदानम्

आशा सर्वटे

पण्डितब्रजभूषणमिश्रः 'आक्रान्तः' महोदयः संस्कृतप्रसारपरिषदः संस्थापकोऽध्यक्षः आरण्यकस्य प्रधानसम्पादकश्चासीत्। गतवर्षे ३० मार्च २००० दिनांके एतस्य महोदयस्य परलोकगमनं जातमिति कारणेन तस्य बहुविधाः रचनाः प्रकाशनप्रतीक्षायामेव आसन्। जीवनस्य अन्तिमेषु त्रिषु वर्षेषु एष महाभागः हनुमच्चरितम्, प्रह्लादचरितम्, ध्रुवचरितम्, आत्मचरितम्, श्रवणकुमारचरितम्, चिन्तनानि इति षट्गद्यबद्धाः रचनाः रचितवान्। ध्रुवचरितम्, प्रह्लादचरितम्, श्रवणकुमारचरितमिति गद्यनिबद्धानि चरितानि संस्कृतप्रसारपरिषदः आरण्यकारव्ये शोधपत्रे प्रकाशितानि। एतानि गद्यनिबद्धानि चरितानि मम शोधपत्रस्य विषयोऽस्ति।

'ध्रुवचरितम्' इदं भागवतप्रथितस्य भक्तबालकस्य ध्रुवस्य चरित–माश्रित्य विरचितमस्ति। एषः स एव ध्रुवः यः केवलं पञ्चवर्षीयो भूत्वाऽपि कठोरेण तपसा भगवतः विष्णोः साक्षाद्दर्शनं कृतवान् विष्णेराशीर्वादेन सुखेन महीं भुञ्जानः अन्ते सर्वेषु ग्रहेषु सप्तर्षिषु देवेषु चोच्चतमं स्थानं प्राप्तवान्। सप्तर्षयः तस्य परिक्रमां कुर्वन्तः सन्ति। आकाशे उत्तरदिशायामविचलं स्थित्वा इदानीमपि ध्रुवनक्षत्रं ध्यानमग्नो भक्त इव जनमनांसि आकर्षति। आक्रान्तमहोदयस्य ध्रुवचरिते क्वचिन्मूलकथायां परिवर्तनानि दृश्यन्ते। यथा – सप्तर्षीणां मार्गदर्शनेन ध्रुवः मधुवनं गत्वा तन्मयत्वेन 'ओम् नमो भगवते वासुदेवाय' इति मन्त्रस्य जपं कृतवान्। अत्र यदा विष्णुमयो ध्रुवो समाधे–र्विचलिते नाभवत्तद। देवा मायामयीं ध्रुवस्य मातरं सुनीतिं परिकल्प्य ध्यानभङ्गाय प्रेरितवन्तः[१]। मिश्रमहोदयेन सुरुचेः चरितं धवलीकृतम्। मातुः सुरुच्या दुर्व्यहारेण पितुश्चौदासीन्येन ध्रुवः परमाखिन्नो भूत्वा वैराग्यं प्राप्तवान्। ध्रुवस्य वनगमनं श्रुत्वा पश्चत्तापदग्धः तस्य पिता वैराग्यं प्राप्तवान्। उत्तानपादस्य वैराग्यं दृष्ट्वा सुरुचिः मनस्येव संकल्पं कृतवती अहमपि समस्तां सांसारिकीं तृष्णां तिरस्कृत्य शेषजीवनमनासक्तभावेन यापायिष्यामि' इति[२]। आक्रान्तमहोदयेन ध्रुवस्य चरितं वर्णतया तस्य पितुः उत्तानपादस्य, मातुः सुनीतेः, विमातुः सुरुचेः देवर्षेर्नारदस्य, च चरितानि स्फुटीकृतानि। ध्रुवस्याविचलं तपः, विचारे दृढता, ध्येयवादिता च लेखकस्य जीवने महान्तं प्रभावं पातयन्तः सन्ति इति प्रतीयते। भारतीयमनीषिषु न

केवलं वयोवृद्धाः तपस्विनः एव महाजनाः, अपि तु तपोनिष्ठा बालका अपि प्रणम्या इति उत्तमसन्देशस्य संवादकमिदं चरितं न धर्मवृद्धेषु वयः समीक्ष्यते इति सुभाषितं सार्थकं करोति।

बालभक्तः प्रह्लादः' इति द्वितीयं गद्यनिबद्धं चरितमपि श्रीमद्भागवत कथामाश्रित्य रचितमस्ति। श्रीमद्भागवतपुराणस्य सप्तमे स्कन्धे विष्णुभक्त–प्रह्लादस्य कथा वर्तते। विष्णुविरोधिनः क्रुरराक्षसस्य हिरण्यकशिपोः पुत्रः भूत्वाऽपि असौ विष्णुमेव ध्यायन् सर्वाभ्यः विपत्तिभ्यः निवृत्तो जातः। जले पातयित्वा, पर्वतात् क्षिप्त्वा, अग्नौ प्रदाह्य च प्रह्लादं हन्तुं वार वारं यतमानः तस्य पिता हिरण्यकशिपुः असफलो जातः। ततः स स्वयमेव खड्गेन पुत्रं हन्तुमुद्युक्तोऽभवत्। भगवान् विष्णुः सर्वव्यापी आस्ति, अतः पुरतः विद्यमाने स्तम्भेऽपि अस्ति इति प्रह्लादस्य दृढं वचनं न स्वीकुर्वन् क्रुद्धः हिरण्यकशिपुः मुष्टिकया स्तम्भमताडयत्। तदा द्विधा विभक्तात् स्तम्भादेव नरसिंहरूपधारी विष्णुरार्विर्बभूव। आविर्भूतो भगवान् नृसिंहः हिरण्यकशिपुं नखैः विदार्य हतवान्। हिरण्यकशिपोर्भगिन्याः होलिकायाः चरितं लेखकेन धवालितं कृतम्। प्राचीनकथानुसारेण प्रज्वलिताग्नौ होलिका प्रह्लादं क्रोडे निधाय प्राविशत्। प्रज्वलिताग्नौ होलिका दग्धा किन्तु विष्णुभक्तप्रह्लादः विष्णुना रक्षितः। मिश्रमहोदयेन किंचिद् परिवर्तनं कृत्वा होलिकायाः चरित्रचित्रणे किमपि औदार्यं दर्शयति। अस्मिन् प्रह्लादचरिते स्वाग्रजस्याज्ञानुसारेण होलिका प्रह्लादं क्रोडे निधाय शम्भुना दत्तेन शीतलेन चीरेण प्रह्लादस्य स्वस्य च शरीरमाच्छाद्य प्रज्वलितेऽग्नौ प्राविशत्। जाज्वल्यमानेऽग्नौ प्रविश्य होलिका शम्भुना दत्तेन शीतलेन चीरेण प्रह्लाद–माच्छाद्य स्वयं भस्मीभूता जाता। होलिका स्वप्राणविसर्जनं प्रह्लादस्य च रक्षणं कृत्वा प्रातः स्मरणीयाऽभवत्। तस्मादेव कालादद्यावधि होलिका दहनरूपेण फाल्गुनपूर्णिमायां तस्याः पुण्यतिथिरायोज्यते।[३] प्राचीनाख्यानेषु नूतनकल्पनया लेखकः औचित्यं दर्शयति। प्रह्लादचरिते' भक्तप्रह्लादस्य स्तुतिं श्रुत्वा हरिः प्रसन्नो भूत्वा प्रह्लादं कथितवान् – पुत्र प्रह्लाद, कालक्रमेण युवा भूत्वा दैत्यसंस्कृतिं विनाश्य मानवसंस्कृतिं स्थापय। यस्यां संस्कृतौ सर्वे स्वहितेन सह परहितस्यापि ध्यानं रक्षन्तु, परस्परं मिलित्वा इत्यादिस्मरणं कुर्वन्तु, वसुधैव कुटुम्बकम्' अयं भावः सर्वेषां हृदयेषु निवसतु। वर्तमानयुगेऽपि उपर्युक्तं संदेशं प्रासङ्गिकम्। वयं सर्वेऽपि आतंकवादीनां दैत्यसंस्कृतिं विनाश्य मानवसंस्कृतिरक्षणार्थं प्रयत्नशीलाः भवेम।[४]

आक्रान्तमहोदयस्य तृतीयं गद्यकाव्यं – श्रवणकुमारचरितम्' इति रामायणस्यायोध्याकाण्डस्य श्रवणकथामाश्रित्य रचितमस्ति। नवं वयः किन्तु

स्वार्थचिन्तनशून्यता, अर्थाभावः किन्तु सेवया जीवनं सार्थकीकर्तुं सतत–प्रयासः, नेत्रहीनौ पितरौ किन्तु तयोः सेवैव जीवनस्य लक्ष्यम्, वक्षसि बाणः किन्तु तृषितयोः पित्रेः कृते जलं प्रापयितुं राजानं दशरथं प्रति प्रार्थना, यौवने एवं कठोरतीरप्रहारेण प्राणत्यागे विवशता किन्तु नेत्रहीनयोः मातापित्रोः सेवार्थं संरक्षणार्थं च राज्ञः दशरथनिकटे कातरनिवेदनं चेति विलक्षणाः विशिष्टता 'श्रवणकुमारः' इति नाम्नाभिधर्तुं शक्यन्ते। श्रवणकुमारस्य तपोनिष्ठभावना, प्रेरणादायिकाश्च।

'आक्रान्त' महोदयस्य गद्यरचनाशैली नैसार्गिकी प्रवाहमयी च विद्यते। एतेषु चरितेषु भाषासौष्ठवं, वर्णनवैविध्यं, कल्पनावैचित्र्यं, वस्तुविन्यासनैपुण्यं, रसपरिपाकं, पदलालित्यं च काव्यगुणानि विशेषरूपेण मिश्रममहोदयस्य गद्यलेखनैपुण्यं प्रदर्शयन्ति। अस्य गद्यरचनायां सरलता, समासरहितता, प्रासादिकभावगम्भीरता च सर्वत्र विलसन्ति। रसप्रयोगे अलङ्कारविधाने च औचित्यं दृश्यते। ब्राह्मणोपनिषत्सु यादृशी सरला गद्यशैली विद्यते तादृशी गद्यशैली एतेषु चरितेष्वपि दृश्यते। यथा ध्रुवचरिते महर्षिनारदः ध्रुवं पृच्छति – 'बालक, कोऽसित्वं ? कुत्र गच्छसि ? किमर्थं गच्छसि ? किं जपसि ? किञ्च वाञ्छसि' ?[५] इति। क्वाचित् बाणभट्टस्य कादम्बर्यादीनां प्रभावोऽपि स्पष्टं लक्ष्यते। बाणभट्टः शूद्रकस्य शासनस्य वैशिष्ट्यं परिसंख्यालङ्कारेण कृतवान्। 'ध्रुवचरिते' उत्तानपादस्य राज्यवर्णनप्रसङ्गेऽपि परिसंख्या–लङ्कारस्य सौन्दर्यं दृश्यते। यथा –

'तस्य धर्मात्मनो राज्ये जीवानामङ्गुलिषु वैषम्यम्, मानवानां हृत्सु ज्ञानस्य बुभुक्षा, मानवेषु वेदशास्त्रानामर्थस्य कृते लोलुपता, पापात् भीतिः, नारीणां केशपाशेषु कुटिलता, सर्पाणां गतिषु वक्रता, काकानां स्वरेषु कर्कशता, विवाहेषु पाणीग्रहणं, पाषाणखण्डेषु कठोरता, कामक्रोधादिशत्रुभिः सह सङ्घर्षः नान्यत्र।[६] ध्रुवचरिते सानुप्रासं पदलालित्यं प्रशंसनीयम्। यथा "तस्य धर्मात्मनः शासनकाले मठेषु वेदघोषः, मन्दिरेषु घण्टानादः हरिहरकथा च विद्यालयेषु विद्याविनोदः कविगोष्ठीषु तु कवितापाठः।

बालभक्तप्रह्लादचरितेऽपि माधुर्यव्यञ्जिता पदावली सहृदयेषु काव्यानन्दं सञ्चारयति। यथा 'तस्य राज्ये केवलकाननेषु स्वतन्त्रता, गिरिगुहासु शान्तिः, फलवत्सु वृक्षेसु विनम्रता, लतासु लावण्यम्, कुसुमकोरेषु कोमलता, पुष्पेषु सुगन्धिः, फलेषु मधुरता, भ्रमरेषु भक्ति, पवने पवित्रता। इति

प्रह्लादचरिते हिरण्यकशिपोः रूपस्य विकरालवर्णने नूतनोपमायाः प्रयोगः प्रशंसनीयः। अत्र निम्नाङ्किते गद्यांशे मालोपमायाः सौन्दर्यं विद्यते।

यथा – स च हिरण्यकशिपुः जन्मनैव विकराल आसीत्। यथा यथा स यौवनं प्राप्नोत् तथा तथा तस्य विकरालताऽवर्धत। तस्य शरीरं लघुपर्वतकारमभवत्। तस्य शिरसि वनस्पतयः इव नतोन्नताः केशाः आसन्। तस्य ललाटः शिलाखण्डमिव दृश्यते स्म। वक्राकारौ चपलौ भ्रुवौ स्वभङ्गिमया तस्य हृदयस्य कौटिल्यं प्रकाशयतः स्म। अत्युन्नतायाः नासिकायाः छिद्रे मलपूर्णे नगरपालिके इव प्रतीयेते स्म। मुखमण्डले श्मश्रूणि भल्लूकपुच्छमिवाऽस्तव्यस्ततां दधते स्म। स्कन्धौ विकृते गिरिशिखरे इव दृश्येते स्म। उदरं तस्य धान्यपूर्णा विशाला गोणी इव। कटिप्रदेशो विशालवृक्षस्य स्कन्ध इव पादौ गजस्याऽग्रपादावेव प्रतीयेते स्म।[७]

प्रकृतिवर्णने मिश्रमहोदयः वैदर्भीशैलीमनुसरति। यथा ध्रुवचरिते – 'सूर्योदयो नासीत्, किन्तु पूर्वस्य लालिमा राजते स्म। खगा नीडान् परित्यज्यऽऽकाशे डयमानाः कूजन्ति स्म। दुर्वादलेषु वनस्पतिषु च तुषारबिन्दवो राजन्ते स्म। रोचकसंवादैः प्रसादपूर्णपद्यैश्च बालभक्तानां चरितेषु औदार्यनिदर्शने लेखकः सफलः। विमातुरपमानपूर्णवचनेन पितुश्च निरादरेण ध्रुवस्य हृदि वैराग्यं जातम्। मलीनमुखं पुत्रं दुष्ट्वा माता सुनीतिः ध्रुवं अवदत् – त्वं खेदं मा कुरु। ममाशीर्वादेन स्वपुण्यप्रतापेन च तन्महत्पदं प्राप्स्यसि, यत्पदं प्राप्य प्रातःस्मरणीयो भाविष्यति। ध्रुवः – मातः! तत्पदं कथं प्राप्यते? माता – यदा वयस्को भविष्यसि तदा कथयिष्यामि। ध्रुवः – मातः। त्वमेव यदा कदा कथयसि ज्ञानं केवलं वयसा न प्राप्यते, तपसा प्राप्यते। माता तपसा केवलं ज्ञानमेव न, परमात्मापि प्रार्थ्यते। ध्रुवचरिते प्रह्लादचरिते च विष्णुस्तोत्रं नृसिंहचरित्रञ्च लेखकस्य काव्यनैपुण्यं दर्शयति। अत्र भक्तिरसस्य निर्झरिणी मनोहारिणी। भक्तिभावस्य परिमलः चेतः प्रसादयति।

श्रवणकुमारचरितेऽपि लक्ष्मीनारायणस्तोत्रं मधुरमस्ति। मिश्र महोदयः रसप्रयोगे सदैव औचित्यं दर्शयति। 'श्रवणकुमारचरिते करुणरसः प्रार्षेणानुभूयते। यदा दशरथः नेत्रहीनौ श्रवणकुमारस्य पितरौ स्वबाणेनाहतस्य तस्य पुत्रस्य दुःखदं समाचारं न्यवेदयत् तदा पिपासया व्याकुलौ अपि तौ हस्ताभ्यां वक्षस्थलं ताडयन्तौ, आहतस्य पुत्रस्य दूरतः एव आर्तनादं श्रुत्वा अतिविह्वलौ जातौ। आसन्नपुत्रशोकेन संतप्तौ तौ युवराजं दशरथं अशपताम् यत् त्वमपि वार्धक्ये पुत्रशोकेन संतप्तः प्राणान् त्यक्षसि। अत्र श्रवणकुमारस्य पितरौ आलम्बनः, शराहतः व्याकुलपुत्रस्य आर्तनादः उद्दीपनः, श्रवणकुमारस्य पित्रोः शोकः स्थायीभावः, वक्षस्थलताडनं, शापवचनं, अश्रुपातञ्चानुभावाः, दैन्यः ग्लानि इत्यादयः व्यभिचारिभावाः। बालभक्त प्रह्लादस्य चरिते नृसिंहावतारे अद्भुत–भयानक–वीररसस्य च व्यञ्जना रुचिरा। निम्नाङ्किते गद्यांशे अद्भुतरसः प्रकर्षेणानुभूयते।

यदा हिरण्यकशिपुः स्तम्भमताडयत् तदा धराचकम्प। स्तम्भं द्विधा विभक्तं कुर्वन् भगवान् नृसिंहः' यस्य शरीरस्य निम्नाभागः नरस्य निम्नाधभागमुपरि भयानकस्य सिंहस्य रूपमासीत् – साक्षान्नरसिंहरूपेणाऽऽविर्बभूव। आविर्भूतो भगवान् नृसिंहो स्वगर्जनया हिरण्यकाशिपुं संज्ञाशून्यामिव कृतवान्। सर्वे दैत्यबालकाः नृसिंहलीलां पश्यन्तो विस्मयविमुग्धा इव आसन्। स्ताम्भात् प्रकटितं नृसिंहं दृष्ट्वा दैत्यराजो भयभीतरभवदेव भगवतस्तेजो वीक्ष्य हतप्रभोऽपि जातः। अत्र नृसिंहः आलम्बनः, तस्य भयानकरूपं गर्जनं च उद्दीपनः, नृसिंहलीलां दृष्ट्वा दैत्यबालानां विस्मयः स्थायीभावः, हिरण्यकशिपोः हतोत्साहः, हतप्रभता जडता च व्यभिचारीभावाः सन्ति। हिरण्यकशिपोः संहारे वीररसस्य सौन्दर्यं प्रतिभाति। भगवता नृसिंहेन दैत्यराजं धृत्वा कथितम् – त्वमस्मिन् क्षणे नभस्ति नभसि, भूमावपि न, गृहाभ्यन्तरे नासि, सम्प्रति दिवसो नास्ति रात्रिरपि नास्ति। अतोंऽस्मिन् क्षणे तव हनने कोऽपि दोषो नास्ति। ब्रह्मणः प्राप्तवरदानस्यात्र नोपेक्षा इति कथयन् स्वकरकमलयोरद्भुतैस्तुङ्ग– नखैस्तस्य दैत्यस्योदरं हृदयञ्च विदीर्णवान्। तस्य निष्प्राणं शरीरं तत्रैव प्राक्षिपत्। अत्र हिरण्यकशिपो आलम्बनः, नृसिंहस्य हृदयस्य उत्साहः स्थायिभावः अद्भुतनखैः दैत्यस्य उदरस्य विदीर्णं अनुभावः उग्रता अभर्षादयः सञ्चारिभावाः विद्यन्ते।

आक्रान्तमहोदयस्य गद्यरचनासु प्रतीकात्मकं नूतनसंविधानं रोचकता च लसन्ति। एतेषु गद्यकाव्येषु वर्णितानि प्राचीनान्यपि आख्यानकानि मानवीयमूल्यबोधे नितरां शाश्वतानि। सर्वत्र स्वाध्यायसेवातपःभक्तिः इति बहुमूल्यतत्त्वानि वर्णितानि। आधुनिक गद्यसाहित्ये मिश्रमहोदयानामवदानं महत्त्वपूर्णम्। संस्कृतभाषायाः प्रचारप्रसारार्थं तस्य लेखनी समर्था। आरण्यकाख्ये शोधपत्रे 'पुष्प' इति पदवाच्येन एतानि गद्यचरितानि प्रकाशितानि। तेषां सौरभं सर्वत्र सञ्चरेदिति भावेन मया अत्र तासां किंचिद् मूल्यांकनं कृतम्।

सन्दर्भाः -

१. ध्रुवचरितमम्, आरण्यके मार्च २००२,
२. ध्रुवचरितम् " मार्च २००२,
३. प्रह्लादचरितम् " मार्च २००३,
४. प्रह्लादचरितम् " मार्च २००३,
५. ध्रुवचरितम् " मार्च २००२,
६. " " मार्च २००२,
७. प्रह्लादचरितम् " मार्च २००३।

****

अर्वाचीनसंस्कृतसाहित्ये केशवचन्द्रदाशस्य गद्यसाधना

पूर्णचन्द्रउपाध्यायः

आवैदिककालादेव सुरभात्यां संरचितस्य साहित्यस्य यात्रा सुदीर्घा वानितरविशिष्टा वर्तते। तदस्य संस्कृतसाहित्यस्य प्राचीनमर्वाचीनं चेति कोटिद्वयमिति विदुषामभिप्रेतम्। तत्रार्वाचीनं नाम आधुनिकम् इदानीन्तनं समकालिकं वा साहित्यमिति समीक्षकाणामभिधानम्। प्रत्येकं कालावच्छिन्नं साहित्यं संसारस्य परिवर्तनशीलत्वमिति सार्वजनीनत्वमवलम्ब्यैव स्वातन्त्र्यं वैशिष्ट्यं निजीकुरुते। अत्राप्याधुनिककालान्तर्गतं साहित्यं प्राचीनं साहित्य–मनुपेक्ष्यापि तद्व्ययतिरिक्तं प्रतिभाति। तदत्र मानवबोधः, समाजवादः, नारीजागणम्, स्वदेशप्रीतिः, साम्यवादश्चेत्यादीनि तत्त्वान्येवार्वाचीनसाहित्यस्य बीजभूतानि। अपि चाधुनिकपाठकानामभिरुच्यनुसारमेव आधुनिकसाहित्यस्य निर्मितिः।

"श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा"[1] इति निर्वचनानुसारं पद्यगद्यात्मकं चेति श्रव्यकाव्यस्य विधाद्वयम्। तदत्र गद्यस्य किं स्वरूप– मिति विचिकित्सायां *"अपादः पदसन्तानो गद्यमि"*[2]त्याचार्यो दण्डी ब्रूते। तदित्थं छन्दोविहीनः पदसमूहः एव गद्यकाव्यस्य संज्ञामादधातीति सुप्रतीतिः। तदस्य प्राचीनगद्यसाहित्यस्य कथा, आख्यायिका चेति भेदद्वयात्मके स्वरूपे प्रवृत्तिरिति प्राचां काव्याशास्त्रिणां समेषामभिमतम्। परमाधुनिकं गद्यसाहित्यं कथा, उपन्यासश्चेति कोटिद्वयमाश्रित्यैव जीवत्स्वरूपमित्यर्वाचीनानामाचार्यणां प्रतिपाद्यं कोटिद्वियमाश्रित्यैव उपन्यासः आधुनिकसंस्कृतसाहित्यस्य प्राणभूतः। यतोहि मनुष्यः समाजस्य स्वस्य च पूर्णप्रतिबिम्बमत्रानायासेनैव द्रुष्टुं शक्नोति।

तदिदानीं यावदाधुनिकसंस्कृतसाहित्यजगति गद्यकाव्यस्योपन्यास विधायां डॉ.श्रीनिवासशास्त्री, डॉ.श्रीपादहसूरकरः, द्वारकाप्रसादद्विवेदी, देवलीशास्त्री, के. एस. कृष्णमूर्तिः, कृष्णकुमारश्चेत्यादयः काव्यस्रष्टारः प्रामुख्येन परिगण्यन्ते। परन्तु डा. केशवचन्द्रदाशस्य स्थानमेतेषु भास्वरं ज्योतिष्कमिव सुप्रशस्यम्। तत्राधुनिकस्याचार्यस्य डॉ.राधाबल्लभस्य अभिव्यक्तिरपि केशवदासस्स कवित्वं प्रगुणीकरोति। तदत्र त्रिपाठी– राधाबल्लभोऽभिधत्ते यत् "समकालीनसंस्कृतसाहित्यकारेषु कवि– रुपन्यासकारः, कथनिकाकारश्च केशवचन्द्रदाशः प्रतिभायां प्रकृष्टतां प्रत्यग्रतां च सविशेषं प्रकटीकरोति। सर्वत्र चास्य रचनासु पदशय्याया मसृणता। तदीयो विशिष्टो वक्रविन्यासः नूतनार्थसमून्मीलनविचक्षणानां विलक्षणानां शब्दानां वाक्यांशानां पदावलीनां च प्रयोगो दरीदृश्यते।" **(ईशा–१६६१)**।

तदित्थम् "इन्टरनेशनल पोएट ऑफ मेरिट १९६५" इत्याख्य– पुरस्कार–विजेतुरत्याधुनिकस्य कवेरस्य गद्यसाधनायां त्रयोदशाधिका उपन्यासाः, पञ्चाधिकाः बालोपयोगिनः लघुकथासंग्रहाश्च आधुनिक– संस्कृतसाहित्यस्य वैभवं पोषयन्ति। सर्वेषूपन्यासेष्वस्य नवीना पद्धतिः। समासरहितं लघुवाक्यात्मकं गद्यरचनमस्य गद्यस्य मुक्तकविधामनु– करोतीति। अस्य भाषाऽतीवसरला। उपस्थापनापद्धतिश्चास्य सर्वथा– ऽभिनवा। दार्शनिकतत्त्वानामुपस्थापनन्त्वस्योपन्यासस्य प्राणभूतं तत्त्वम्।

तदस्य सर्वेषामुपन्यासानां सामग्रिकञ्च मूल्याङ्कनं सर्वथा असम्भवमिति धियाऽस्माभिरत्र **विसर्ग**स्यैव केवलं समीक्षणं प्रस्तूयते। विसर्गस्यास्य रचनाकारः दाशोपाह्वः केशवचन्द्रः यद्यप्याधुनिकताप्रवाहेण प्रवाहितः, तथापि लीलया नासौ विजहाति प्राचीनं चिन्तनम्। स्थापयत्यसौ प्राचीनार्वाचीनचिन्तनयोर्मध्ये सेतुभूतां स्वकीयां प्रतिभाम्। अन्विष्यति च प्राच्यसंस्कृतिनिबद्धं तत्त्वजातम्। विसर्गस्तु खल्वस्य निसर्ग एव। उपनिषद्सारभूतायाः श्रीमद्भगवद्गीतायाः निष्कामकर्मयोगस्य बीजरूपं विसर्गाख्यं तत्त्वमेवास्योपन्यासस्य प्राणभूतम्। तथ्यमिदं स्वयं कविरेवाचक्षते ग्रन्थस्यान्तःपत्रके श्रीकृष्णस्योक्तिं प्रतिपादयन्। तद्यथा –

"अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।

भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।।[४]" इति।

गीतायास्तत्त्वमिदमवलम्ब्यैव कविरसौ प्रकटयति स्वकं दर्शनमुपन्यासेऽ– स्मिन् प्रसादशैल्या। तदत्र संदर्शनीयानि कवेर्वाक्यानि, "संसारः नाम त्यागक्षेत्रम्। त्यागनिष्ठत्वमस्य धर्मः। यदत्र सम्बन्ध्यते तत् सर्वं त्यज्यते। तेन भोगस्य परिपुष्टिर्भवति। भोगः कर्मणः पृष्ठभूः। त्यागश्च कर्मणः परिपाकता। भोगः त्यागश्च इति मार्गद्वयं संसारस्य। रोगः नियामकः। आरोग्यं कर्मस्वारस्यम्। त्यागो नाम कर्मसिद्धिः।[५]"

तदेवं विसर्गपर्यायवाचिनं त्यागमेव कविः कर्मसिद्धेः कारणं मनुते। यः खलु प्राच्यसंस्कृतेः विशिष्टेषु तत्त्वेष्वन्यतमः। तदेवं विसर्गपर्यायवाचिनं त्यागमेव कविः कर्मसिद्धेः कारणं मनुते। यः खलु प्राच्यसंस्कृतेः विशिष्टेषु तत्त्वेष्वन्यतमः। सोऽयं महनीयस्त्यागो जात्या कुम्भकारः। जन्मन एव दरिद्र्यातिशयविभीषिकया प्रपीडितः सन् नैकवारमात्मघातार्थं निष्फलप्रयासमनुकुर्वाणोऽप्यसौ प्राणान् धारयति परि– वारस्य समाजस्य च परिपोषणार्थम्। वृद्धपितुः कपिलस्याज्ञापालनपूर्वकं चासौ व्यवसायपरिवर्तनेन स्वकीयाभिवृद्धिं तिरस्कुर्वन् निष्कपटकानां ग्राम्यजनानां सेवार्थं कौलिकवृत्तिं घटनिर्माणात्मिकामाजीविकामाजीवनं निजीकुरुते। सरलहृदयस्यास्यान्तःकरणे कालान्तरे साधुत्वमधिगतस्य बाल्यमित्रस्य कलानिधेः कृतेऽसामान्या भक्तिः आसीच्च सुदृढा।

एवमेवोपन्यासस्यास्य नायिकायाश्चरित्रमप्यत्यन्तमुदात्तं सेवाभाव-स्यालौकिकत्यागस्य च मूर्त्तिमत्स्वरूपम्। प्राच्यसंस्कृतिनिष्ठायाः भारतीय-नार्याश्चचरित्रमत्र स्फुटीकरोति कविरविनायाः मानसिकव्यापारेण। तत्र कवेर्भाषायाम्।

"मनसि तस्याः गुणदोषयोः विमर्शः, परिवारदृष्ट्या नकुल इदानीं दोषी। नीतिदृष्ट्या हीनवीर्यः। तथापि सः पतिः। प्राग्वृत्तान्ते स गुणी। परिवारार्थं स निजस्वार्थं परित्यज्य कर्मयोगी। इदानीं स योगी पथभ्रष्टः। अविना ईश्वर इव तस्य गुणान् शिरसि निहितवती। दोषान् च कण्ठे स्थापितवती।

तदेवमविना यथा पतिपरायणात्वेन गुणदर्शिनी महीयसी साध्वी पत्नी तथैव श्वशुरस्य सेवायामादर्शवधुः, स्वसन्ततेः कृते स्नेहमयी, अनुजायाश्च पथप्रदर्शिका जननीतुल्या सहायदात्री ज्येष्ठा भगिनी। सर्वेषां कृते तस्याः कर्त्तव्यं यथेप्सितं समुचितम्।

तदेव विसर्गेऽस्मिन्नुपन्यासे त्यागनिष्ठस्य परिवारस्य समाजस्य चोपवर्णनं भारतीयसंस्कृतेर्गौरवख्यापनमेवोपन्यासकारस्योद्देश्यम्। अन्यत्रापि पाश्चात्यसंस्कृतिमनुकुर्वन्ती ग्राम्यदशां सामाजिकीविसङ्गतिं च दृष्टवाऽसौ कविरन्तर्विलपति। तटस्थो भूत्वा ख्यापयत्यन्तर्व्यथाम्।

"सम्प्रति ग्रामस्तु श्रीहीनः। जीवनधारा अत्र विपर्यस्ता। संस्कृतिश्च नष्टा। परम्परा अन्धिता। अविश्वासो विवर्धितः। शिक्षिताः अत्र तस्कराः। अशिक्षिताः चौराः। भद्राः शोषकाः। सभ्याः सर्वभक्षकाः। भ्रष्टाश्च धर्मरक्षकाः। विपथगामिनो युवकाः। महावृक्षेऽत्र निष्पर्णा सर्वाऽपि शाखा।"[७]

अपि च *"नरः सर्षपमात्राणि परच्छिद्राणि पश्यति"* इत्यभि-जातोक्त्यनुसारं मानवस्य स्वाभाविकीं प्रकृतिमपि सम्यक् जानात्यसौ लोककविः। नकुलस्य संवादपुरष्कृत्यात्र कविः ब्रूते –

"अन्यथा मार्गे जनाः सामान्यमपि वचनं पर्वतीकरिष्यन्ति"[८] इति।

दार्शनिकोऽयमुपन्यासकारः कर्मकर्त्तव्ययोः कर्त्तव्यसम्पादनत्वमेव विशिष्टयति। जीवनयानस्य सन्तुलनन्तु कर्त्तव्यसम्पादनस्योपरि समाश्रितमिति तस्य मतिः। कवेरिदं दर्शनं प्रतिफलति नकुलं प्रति कलानिधेरुपदेशवाक्येषु :

"जीवनं कर्ममयं भवतु नाम। किन्तु कर्त्तव्यविहीनं न भवतु। यं प्रति यत् कर्त्तव्यं तदवश्यं चिन्तनीयं निभालनीयं च। अन्यथा जीवनस्य सन्तुलनं न भवेत्"[९] इति।

उपन्यासेऽस्मिन् डॉ. केशवदासस्य सूक्ष्ममनोवैज्ञानिकं प्रातिभ्यमपि स्फुटति। सदसद्विचारकर्त्री विवेकाख्यां बुद्धिमसौ जीवनयात्रायाः नियामकत्वेन प्रसिद्धयति। तदिदं चिन्तनं बिम्बीभवति नकुलस्य विचाररोमन्थने –

"अत एव मरणमत्र स्वेच्छाकृतं न भवति। बलादेव एतत् सम्भवति। तथापि बलं प्रतिरोद्धुं विवेको नाम अन्तःस्थपुरूषः सदैव प्रतिवादम् उपस्थापयति। मनस्तु न सर्वथा अन्तिमं वस्तु। तदुपरि नूनं कश्चन विद्यते। स एव अस्मान् नियमयति। तस्य निर्देशन अस्मदीया कृतिः परिचालिता भवति। अन्यथा मरणं दृढमभिलषन् कश्चित् कथं तस्मात् निवर्त्तते[१०]इति। तदत्र "बुद्धिं तु सारथिं विद्धि" इत्युपनिषद्गतं तत्त्वं प्रतिफलति।

तदित्थं केशवचन्द्रदाशप्रणीतस्य विसर्गाख्योपन्यासस्य समीक्षणेन निश्चीयते यदाधुनिकसंस्कृतसाहित्ये तस्य गद्यसाधनाऽत्यन्तं सुप्रशस्या। कतिपयमत्याधुनिकः साम्यादिचिन्ताधारायाः समर्थकः। सम्वेदनाऽस्य हृदयस्पन्दिनी। ग्राम्यजीवनपक्षपातित्वमस्य लोककवित्वमावेदयति। सामाजिकदुःखस्थाऽस्य हृदयस्य व्यथा। कर्म अस्य जीवनस्य दर्शनम्। सर्वोपरि कर्त्तव्यसम्पादनमस्य चरमं लक्ष्यमिति शम्।

सन्दर्भसूची –

१. विश्वनाथकविराजयकृतः सा. द. ६/३१३

२. दण्डीकृतः काव्यादर्शः १/२३

३. विश्वनाथकृतः सा. द. ६/३३०–३३१

४. श्रीमद्भगवद्गीता ८/३

५. डॉ. केशवचन्द्रदाशविरचितः, विसर्गः पृ. सं. १४

६. तत्रैव पृ. सं. ८

७. तत्रैव पृ. सं. ५१

८. तत्रैव पृ. सं. ३३

९. तत्रैव पृ. सं. ६५

१०. तत्रैव पृ. सं. ३३

****

आधुनिकसंस्कृतगद्यकाव्यसमीक्षायां

"पाश्चात्यसंस्कृतम्"

आचार्यः सत्यनारायणः

संप्रति आधुनिकसंस्कृतगद्यकाव्यलेखकेषु संप्राप्तराष्ट्रपतिसम्मानाः आचार्यदिगम्बरमहापात्रमहाभागाः अभिनवाभिः रचनाचातुरीभिः पाठकानां दृष्टिपथारूढाः भवन्ति। १९८६ वर्षतः अद्यावधि एतेषां षोडशसंख्यकाः ग्रन्थाः प्रकाशिताः सन्ति। एतेषु ग्रन्थेषु सर्वथा सरलसंस्कृतस्य सुरुचिरा शैली सर्वजनमनांसि रञ्जयति। उत्कलेषु लब्धजन्मान आचार्याः अखिलेऽपि राष्ट्रे सारस्वतसाधकेषु अग्रेसराः प्रतीयन्ते। सुरभारत्याः सेवाप्रसङ्गे उत्तरप्रदेशा–न्तर्गत–गाजियाबादस्थित–महर्षिवेदविज्ञानविद्यापीठपक्षतः १९८९ वर्षतः १९९३ वर्षं यावत् आचार्यरूपेण नियोजितः। तदवसरे हलाण्डदेशं रूषदेशं च गत्वा तत्र संस्कृताध्यापनाय सुयोगं प्राप्तन्तः। विदेशयात्रायां पाश्चात्यभूमौ अनुभूतानां तिक्तमधुराणामनुभवानां भ्रमणवृत्तान्तानां ग्रन्थाकारेण '**पाश्चात्य-संस्कृतम्**' इति नाम्ना सहृदयसमक्षं समुपस्थाप्य ते आधुनिकसंस्कृत गद्यकाव्यभाण्डागारस्य, प्रभूतां, श्रीसमृद्धिं साधितवन्तः इति नैव विस्मर्त्तव्यं भवति। तदेव समुद्घोषितं तैः ग्रन्थस्य पुरोवाक्–पृष्ठासु "अतः सकला भ्रमणानुभूतिः आधारीकृत्य मया पाश्चात्यदेशेषु अध्ययनाध्यापनजनितं वृत्तान्तम् अधिकृत्य रचितमिति हेतोः पाश्चात्यसंस्कृतम् इति पुस्तकस्य नामकरणं विहितमस्ति"। इति (पृ.viii)

अस्य ग्रन्थस्य प्रतिपाद्यविषयः भागद्वयेन विभक्तः। तत्र प्रथमखण्डे ५८ वृत्तान्ताः योजिताः सन्ति। द्वितीयखण्डे च ३६ विषयाः दृश्यन्ते। आधुनिकसंस्कृते भ्रमणवृत्तान्तपरकगद्यकाव्येषु ग्रन्थोऽयं कामपि नूतनातां प्रतिपादयितुं प्रयतते, यद्यपि संस्कृत सम्भाषणसन्देशपत्रिका संपादकेन डॉ. विश्वासमहोदयेन 'अपश्चिमे पश्चिमः' इति आमेरिकादेशभ्रमणवृत्तान्तपरक–संस्कृतगद्यग्रन्थः पूर्वं प्रकाशितः तथापि 'पाश्चात्यसंस्कृतम्' इति ग्रन्थेऽस्मिन् तस्य प्रभावः न लक्ष्यते।

तत्र विदेशं गन्तुं वार्त्ता प्राप्य कविः परिणते वयसि बाल्यस्य मधुरां स्मृतिं स्मरन् उल्लिखति – "अहो क्वनु ते दिवसाः गताः" इति (पृ.–१)। अत्र तु भवभूतेः उत्तररामचरिते प्रयुक्तस्य 'ते किं नो दिवसा गता' इति वचनस्य प्रभावः परिलक्ष्यते। किञ्च भारतीयसंस्कृतेः संस्कृतस्य च माहात्म्यम् अन्ता राष्ट्रीयक्षेत्रेषु प्रचारयितुं समुत्सुकः कविः विदेशगमनस्य सदवसरं करच्युतं

कर्त्तुं नेच्छति। विमानारोहणप्रसङ्गं सः सरसमुल्लिखति। तत्र विमान–निःस्थाने श्वेतकायाः रूपवत्यः विमानपरिचारिकाः स्मेरमुखाः सत्यः स्वागतं व्याहरन्ति इति रसिकं कविं काव्यनिर्माणे प्रेरयति। क्रमशः तस्य हृदि कविकर्म स्फुरति। प्रसङ्गवशतः कविना व्योमयाने रचिता कविता कथं सरला सरसा चेति दिङ्मात्रं मयोदाह्रियते –

"भारतमाता क्व मया त्यक्ता
पृथिवीख्याता हा क्वाहम् ।
मम ग्रामः क्वेदं यातम्
क्वे मे लोकाः कुत्राहम् " इत्यादि (पृ. ५)

'अन्तरीक्षे विमानस्थः कविः गवाक्षाद् वहिः 'क्व गता मम प्रिया पृथिवीति' चिन्ताव्याकुलितः विलोक्यते। क्षणेन पुनः नित्यं गायत्रीमन्त्र–जपसमयस्य सवितृदेवस्य वरेण्यं ज्योतिर्मण्डलं ब्रह्मत्वेनानुभूय चक्षुर्विषयीकृत्य कविः आत्मानं कृतार्थममन्यत। विदेशभूमौ अवतीर्य तत्रत्यः परिवेशः भिन्नः इति कविः स्पष्टमुल्लिखति।

विदेशिनां संस्कृतप्रीतिं प्रत्यक्षीकृत्य कृतकृत्यः कविः तत्रत्य–माश्रमजीवनं भारते क्वचित् स्थितानां ब्रह्मचारिणामाश्रमजीवनापेक्षया न कि–मप्यवरमिति पर्यलक्ष्यत। महर्षिमहेशयोगीमहोदयानां प्रचेष्टया विदेशे भारतीयविद्यायाः समादरः सञ्जातः।

कविः ऋषराजधानीं मस्कोनगरीं प्राप्य तत्रत्यं वैभवं विलोक्य विशेषतः भवनानां निर्माणसमरूपता राष्ट्रस्य साम्यवादं संसूचयति इत्यनुभूतवान्। तत्र द्विचक्रयानं त्रिचक्रयानं मोटरस्कूटरयानं वा नगरे न दृश्यते। राजमार्गे समानरूपैः कारयानैः नागरिकाः यातायातं कुर्वन्ति। लोकवाहकानि वस्यानानि ट्राम्यानानि च विद्युत्सूत्रसाहाय्ये न प्रचलन्ति।

ऋष्देशस्य कीर्त्ति–'रेडस्क्वेर' इति स्थानम् ऐतिहासिकवृत्तान्तेन समं वर्णयति कविः। अस्य प्रसिद्धस्थानस्य प्रभावात् ऋषदेशस्य प्राकृतिकवैभवेन च प्रभावितः कविः **'ऋषियाशतकम्'** इति काव्यमेकं व्यरचयदिति सूचयति। (पृ.२८)

ऋष्देशीयछात्राणां संस्कृतशिक्षायै महान् अग्राहः कविना परिलक्षितः। स्वयं कविरपि ऋषभाषाशिक्षाम् अकरोत्। तत्रत्यसामाजिकजीवनेन सम–मात्मानं नियोज्यस्वविदेशयात्राजीवनं सफलीकृतवान्। तत्र क्रीड़ारङ्गं द्रष्टुं गत्वा अश्वारोहणे आग्रही कविः परिणते वयस्यपि तत्सुखमन्वभवत्।

ऋषदेशस्य नृत्यशाला उपभोग्या। तत्रत्यः राष्ट्रियसंग्रहालयः देशस्य गौरववाहकः। तत्र नौविहारसुखमपि कविना वर्णितम्। तत्रत्या कलाकृतिः अनन्या। नगरे यत्र कुत्रपि कलानैपुण्यं दरीदृश्यते। तत्र देशीयचिकित्सायाः आदरः परिलक्ष्यते। छात्राणां बलवती पिपठिषा कवेः मनसि किमपि भावान्तरं सृजति। तत्रत्या वैवाहिकी परंपरा विचित्रा। सप्तदशवर्षे पुत्रः पुत्र्यश्च निज–निजविवाहप्रसङ्गे स्वतन्त्राः भवन्ति। पुत्रः स्वयं कन्यायाः आदर्शं वरयते। पुत्री च वरस्य आदर्शं वरयते। भारतस्य विवाहपद्धतिं श्रुत्वा वैदेशिकाः विस्मिताः भवन्ति इति कविः लिखति – 'देशे देशे प्रथा पृथक्' इति(पृ–४६)

तत्र निसर्गसुषमा सर्वत्र समाना। तत्रत्यानां वैदिकसंस्कृतौ रुचिः महती, गुरुभक्तिश्च असामान्या। तत्रत्याः छात्राः स्वभावेन स्नेहशीलाः, पाठे अध्यवसायिनश्च भवन्ति। एवं रूपेण मनोहर वर्णनया प्रथमखण्डस्य भ्रमणवृत्तान्तः समाप्तः।

द्वितीयखण्डस्यादौ कविना स्वानुभवः उल्लिखितः। केषाञ्चन छात्राणां श्रद्धाभावना वर्णिता। कैश्चित् छात्रैः सह पत्राचारोऽपि प्रदर्शितः। विदेशे कवेः दिनचर्या, संस्कृतकथा, संग्रहालयपरिदर्शनं चेति वृत्तान्ताः अप्यत्र स्थानिताः। ऋषियाविप्लवस्य घटना च किञ्चित् चर्च्चिता। तत्र संस्कृतभाषणशिक्षणादि–कार्यक्रमाणां साफल्यमपि वर्णितम्, गुरुशिष्ययोः शाश्वतं सम्बन्धं वर्णयन् कविः ग्रन्थवर्णनां समापयति।

स्वदेशे वा विदेशे वा जीवनदर्शनस्य व्यवाहारिकमूल्यबोधः सर्वत्र समानः भवतीति ग्रन्थस्यास्य शेषकथा स्मरणीया।

****

गद्यकारो हृषीकेशः

राधावल्लभः त्रिपाठी

ऊनविंशशतके संस्कृतसाहित्ये दृश्यते कश्चनाभिनव उन्मेषः। नवीना विधा साहित्यसरणिमवतीर्णा। संस्कृतपत्रकारिताया उपक्रमः सञ्जातः। साहित्यकारविहङ्गः पद्यपञ्जरं परित्यज्य गद्यस्य अनन्ते नभसि उन्मुक्तं डयमानः प्रकटीचकार नवीनाः भङ्गीः। प्राचीनसाहित्ये पद्यस्य प्राचुर्यं परिलक्ष्यते, क्वचित् शास्त्रिया अपि रचना कारिकाभिः पद्यैर्वा प्रतन्वानाः आसन् पुरातना मनीषिणो रचनाकाराः। आधुनिकसाहित्यं तु समधिकतरं श्रयते गद्यम्। संस्कृतसाहित्याकाशेऽप्याधुनिकताया समीरो यथा यथा ससार, तथा तथा गद्यं समुन्मीलयामास रचनायाः अदृष्टपूर्वाः सम्भावनाः। आधुनिकसंस्कृतगद्यकारेषु अप्पाशास्त्री, भट्टमथुरानाथ-शास्त्री, महामहोपाध्याय-रामावतारशर्मा वेङ्कटरामराघवश्चेत्यादयः सन्ति वाङ्मयनभसो देदीप्यमानानि नक्षत्राणि, येषां रचनारश्मिभिरद्याप्यालोक-यन्ति स्वपन्थानं नवीनाः साहित्यकाराः। एतेषु एव संस्कृतसाहित्याकाश-नक्षत्रेषु नितरां भास्वरो भास्करवद् प्रखरतरगद्यकिरणावलिभिर्देदीप्यमानो वरीवर्त्यते भट्टाचार्यो हृषीकेशः।

जीवनवृत्तम् -

भट्टाचार्यो हृषीकेशः १९१३तमे क्रैस्तवे वर्षे प्रथितयशसां पण्डितानां कुले बङ्गप्रदेशस्य भाटपाराजनपदे जनिमलभत। सुप्रथितो नैयायिकः श्रीगदाधरभट्टाचार्योऽस्य पूर्वजेषु परिगण्यते। विविधविद्या-वदाताः शिरोमण्युपाधिविभूषिता आनन्दचन्द्रनामानोऽस्य पितामहचरणाः सुरसरस्वत्या उपासकाः बाल्ये एनं व्याकरणशास्त्राध्ययने संस्कृतकाव्य-रचनायां च सम्यक् प्रोत्साहयामासुः। स्वग्रामस्य टोल इति संज्ञप्तायां संस्कृत-पाठशालायां प्रारम्भिकीं शिक्षामयं प्राप्तवान्। प्रथमं व्याकरणं, ततो वर्षचतुष्टयं काव्यालङ्कारछन्दःशास्त्रादिकं, समनन्तरं च नव्यन्यायमसौ पठितुं प्रवृत्तः। आसंश्चास्य न्यायशास्त्रे गुरवो राखालदासन्यायरत्नवर्याः यादवचन्द्रतर्करत्नमहोदयाश्च। सहैव च स्वपितृचरणेभ्यः स्मृतिरत्न-

श्रीमधुसूदनशर्मभ्योऽयं स्मृतिग्रन्थान् अप्यध्यैष्ट। सर्वथा पारम्परिक-संस्कृतशिक्षायां दीक्षितस्यापि हृषीकेशस्य स्वत एव प्रवृत्तिः सञ्जाता आङ्ग्लभाषानुशीलने आङ्ग्लसाहित्याध्ययने च। म्लेच्छभाषाध्ययनं महापातकं मन्यमाना अस्य परिवारजनाः गुरवश्च भृशं प्रायतन्त एनं ततो निवारयितुम्। हृषीकेशस्तु हुगलीकालेज इति संस्थायामधीयानं स्वमित्रं जयगोपालवन्द्योपाध्यायमनुरुध्य रहसि तस्मात् आङ्ग्लीमधीते, तं च विनिमये संस्कृतामध्यापयति। वर्षत्रयणैव स प्राप अनन्यसाधारणं पाटवमाङ्ग्लभाषायाम्। अनन्तरं च प्रकाशितमाङ्ग्लभाषानुशीलन-रहस्यमस्य ग्रामे। कौलीनभीताः कुलीना ब्राह्मणा एनं कलङ्कितं मन्यमाना भृशं सन्तर्जयामासुः। प्रतारणाभिस्तेषां भग्नो हृषीकेशस्य संस्कृताध्ययन-समुद्यमोऽपि। कञ्चित् कालं भग्नमनोरथो विषादग्रस्तोऽसौ स्वग्रामे तस्थौ।

१८७२तमे क्रैस्तवे वर्षेऽसौ गुरुजनेभ्यो अनिवेद्य पञ्चाम्बु-(पञ्जाब)-प्रदेशं प्रस्थितः। तत्रैवासीत् जयगोपालवन्द्योपाध्यायः। स अस्मिन्नतितरां स्निह्यन् स्वव्ययेनैनं प्राज्ञपरीक्षादानाय प्रैषयत् लाहोरनगरम्। तत्र पञ्चनदमहाविद्यालय-प्रबन्धसमितिसदस्यौ बाबूनवीनचन्द्रराय-राधाकृष्णगोस्वामिनौ अस्य संस्कृतवैशारद्यं वैदुषीं च विभाव्य शास्त्रिपरीक्षोत्तरणसमर्थं तं कलयामासतुः। किन्तु तस्मिन् वर्षे शास्त्रि-परीक्षाया आयोजनमेव न समुपकल्पितमिति विशारदपरीक्षा-प्रदानाय हृषीकेशस्ताभ्यां प्रेरितः। अनन्तरं च संस्कृतभाषायां तदीयं रचनापाटवं प्रेक्ष्य **विद्योदय**पत्रिकायाः सम्पादनाय तं तौ नियोजितवन्तौ। १८७३तमे कैस्तवेऽब्दे पञ्जाबप्रान्ते इदम्प्रथमतया शास्त्रिपरीक्षाऽऽयोजिता, हृषीकेशो भट्टाचार्यस्तत्र आसीत् प्रथमः परीक्षार्थी। युगपदेवायं आङ्ग्लभाषायाः प्रवेशिकापरीक्षामपि समुदतरत्, ततश्च विद्योदयं मासिकपत्रं सम्पादयन् लवपुर्याः (लाहोरनगरस्य) प्राच्यविद्यामहाविद्यालये संस्कृतशिक्षकपदे कार्यं निरवहत्। अथ महामहोपाध्यायैः महेशचन्द्र- तर्करत्नभिः साग्रहमनुरुद्धः लाहोरस्थ-महाविद्यालयसेवायाः पदोन्नति- सम्भावनाः अधिकरतरं वेतनं च न्यक्कृत्य पितृचरणानां परिवारजनानां च सेवार्थं कलिकाताराजकीय-संस्कृतपाठशालायां सेवां स्वीचकार समाजगाम च जन्मभूमिम्। विद्योदयं च पूर्ववदेव सम्पाद्य प्रकाशयामास। सेवानिवृत्तोऽपि यावज्जीवमनन्य-सामान्यनिष्ठया विद्योदयमपूपुषत्। १९१३तमे क्रैस्तवे वर्षे चतुःषष्टि-

वर्षीयोऽयं दिवं जगाम। अस्य दिवङ्गमनमनुशोचन् **प्रबन्धमञ्जरी**-सम्पादकः श्रीमत्पद्मसिंहशर्मा व्यलिखत् - "एवमसौ सुरभारत्याः सुपुत्रः संस्कृताम्भोनिधिमन्दरः गुणैर्गरीयान् यशसा महीयान् विद्वन्माला-मध्यमणिः, साधीयान् समर्थकः प्राचीनार्यसंस्कृतेः अवष्टम्भो वर्णाश्रम-व्यवस्थायाः अवलम्बः साधुभावरोलम्बानाम्, उपवनतरुर्लेखनकलालतायाः पुम्भावापन्न-सरस्वती-मधुरझणत्कृतिरणत्कण्ठवर्तिमधुरक्वाणो जन्मान्तरापन्नो बाणः सहसैव न्यलीयत। हा हन्त कष्टम्। ध्वस्तः काव्योरुमेरुः कविविपणिमहारत्नराशिर्विशीर्णः शुष्कः शब्दौघसिन्धुर्विलयमुपगतो वाक्य-माणिक्यकोशः। दिव्योक्तीनां निधानं प्रलयमुपगतं हा हता हन्त वाणी भट्टाचार्य-द्युवाणीप्रणयिनि विधिना शायिते मृत्युशय्याम्"।।

कृतयः

हृषीकेशो भट्टाचार्यो बङ्गीयसंस्कृतविद्वन्मण्डले रघुनन्दन-स्मार्तस्य स्मृतितत्त्वनिबन्धानां बङ्गभाषानुवादेन परां कीर्तिमवाप। संस्कृतभाषायामस्य ग्रन्थाः सन्ति - (१) **सुपद्मव्याकरणटीका**, (२) **कवितावली**, (३) **राजपुत्रागमनम्**, (४) **प्राकृतव्याकरणम्**, (५) **संस्कृतश्रुतबोधः**, (६) **प्रबोधचन्द्रोदयटीका** चेति ग्रन्थाः। हिन्दी-भाषायामस्य पुस्तकानि सन्ति - (७) **छन्दोबोधः**, (८) **अर्थसङ्ग्रहानुवादः**, (९) **दत्तकचन्द्रिकानुवादः** (१०) **तर्कामृतानुवादश्चेति सन्ति। बङ्गभाषायां च** (११) **हिन्दीव्याकरणम्**, (१२) **बाङ्ग्लाव्याकरणम्**, (१३) **मेघदूतपद्यानुवादः**, (१४) **उद्वाहतत्त्वानुवादः**, (१५) **तिथितत्त्वा-नुवादः**, (१६) **प्रायश्चित्ततत्त्वानुवादश्चेति** ग्रन्था अस्य प्रकाशिताः।

कालिकातासंस्कृतमहाविद्यालयपुस्तकालये विद्यमानानां पाण्डु-ग्रन्थानां सूचीपत्रं महता श्रमेण निर्मितं श्रीमता भट्टाचार्येण। तथैव व्याकरणक्षेत्रे मैथिलपण्डितस्य पद्मनाभस्य सुपद्मसम्प्रदायमयं समुद्धार। भट्टाचार्येण स्वोपज्ञटीकया सुपद्मव्याकरणं सम्पादितम्, प्रकाशिताश्च पाणिनीयव्याकरणतुलनायामस्य विशेषाः।।

प्रबन्धमञ्जरी

भट्टाचार्यस्य अक्षय्यायाः कीर्तिवल्लर्या निधानं वर्तते प्रबन्धमञ्जरी। प्रबन्धमञ्जर्याः सम्पादनं प्रकाशनं च हिन्दीसंस्कृतयोः सुप्रसिद्धसाहित्यकारेण ज्वालापुरीयसंस्कृतमहाविद्यालयाध्यापकेन कमलेशो-पाह्वेन श्रीमता पद्मसिंहशर्मणा भट्टाचार्यस्य जीवनकाल एव

ऊरीकृतमासीत्। तेन अस्य महदुद्योगस्य कृते भट्टाचार्यस्य स्वीकृतिः समाशंसा चावाप्ता, अनन्तरं प्रथममुद्रितांशः प्रूफसंज्ञकोऽपि तत्सकाशं प्रेषितः। दैवदुर्योगात् मध्य एव मुद्रणकार्ये समजनि कश्चन प्रत्यूहः। अत्रान्तरे च हृषीकेशभट्टाचार्यो दिवं जगाम। पुनरपि प्रवर्तिते प्रकाशनसमुद्यमे प्रबन्धमञ्जरी बिजनौरजनपदान्तर्वर्तिनायकनगलाग्रामस्थ काव्यकुटीरकार्यालयतः श्रीमता काव्यतीर्थ-काशीनाथशर्मणा १९८६तमे वैक्रमाब्दे (१९२९तमे क्रैस्तवेऽब्दे) प्रकाशिता।

संस्कृतसाहित्ये हृषीकेशभट्टाचार्यस्याजराममरां कीर्तिं स्थापयति प्रबन्धमञ्जरी। यद्यपि मञ्जर्यामस्यामेकादशनिबन्धा एव श्रीमता कमलेशोपोह्वेन पद्मसिंहशर्मणा विद्योदयपत्रिकायाः पुरातनाङ्केभ्यश्चयनं विधाय सङ्कलय्य सम्पाद्य च प्रकाशिताः, विपुलं च निबन्धसाहित्यं हृषीकेशस्य इदानीमपि वर्तते क्षोदक्षमम्, तथापि एतावद्भिरेव निबन्धैः समकालिकसंस्कृतगद्यस्य कापि काष्ठा समुन्मीलति।

प्रबन्धमञ्जर्याः प्रकाशनोपक्रमं श्लाघमानः पण्डितमूर्धन्यो गिरिधर-शर्माचतुर्वेदोऽस्य सङ्ग्रहस्य प्रस्तावनायां लिलेख -

"अस्य सङ्ग्रहस्य कियांश्चिद् भागो मन्त्रयनयोरासेचनतां यातः। विद्योदये सुपठितामपि भट्टाचार्यमहाभागस्य प्रसन्नमधुरां सजीवामिव प्रत्यक्षमुपलभ्यमानां भारतीमद्य नवीभूतामिव पुनरास्वाद्य कोऽपि भावातिशयो हृदयमतिक्रामति। संस्कृतभारत्या यौवनं प्रख्यापयति। पुरातने समये यत्सत्यं विरला एवासन्नीदृशाः प्रबन्धारः, दूरे त्वद्येदृशानां कथा।

"मुद्रयति वदनविवरं मृतभाषावादिनां मुहेराणाम्।
स्मरयति च भट्टबाणं भट्टाचार्यस्य सा वाणी।।"

क्वचिदिदानीन्तनधर्मदुर्दशावर्णने करुणस्रोतोनिर्झरः, क्वचिद् विद्वद्भयः, कर्तव्योपदेशे प्रशान्तमहासागरगाम्भीर्यम्, क्वचित् कौतुकेनैव दर्शनदृष्टार्थविवेचनेऽद्भुतचमत्कारः, क्वचित् स्वार्थसक्त-मानवजाति-निर्घृणतानिदर्शने बीभत्सकल्लोलाः, क्वचित् तिरश्चां वनस्पतिप्रभृतीनां च सभावर्णनमुखेनेदानीन्तन-सभाभिनयपरिहासः, क्वचित् सिंहाद्यप्रस्तुतप्रशंसया दृप्तजन-रौद्रख्यातिः, क्वचित् तिर्यक्षु तत्कल्पेषु च समुचितभयानक-निवेशनमित्येवमादि-सकलरसपरम्परातरङ्गिता इमे प्रबन्धाः सम्यगभिध्याय-माना न केवलं तात्कालिक- प्रमोदमहोत्सवायैव कल्पन्ते अपितु सामयिकं किमपि कर्तव्यमतिरमणीयया पद्धत्या समुपदिशन्तः कान्तासम्मिततयोपदेश-

योगं काव्यस्य परमं प्रयोजनं सम्यङ् निष्पादयन्ति।"

विद्ववरेण्यः काशीनाथशर्मा प्रबन्धमञ्जरीमधिकृत्य विलिखति -

"इयं प्रबन्धमञ्जरी श्रीमद्विबुधवरहृषीकेशस्वान्तसरसीरुह-सरसकिञ्जल्कमञ्जुरीतिर्नानाविधरसभावादिमकरन्दनिर्भरा विकाससौरभ-विसर-वशीकृतविविध-दिगन्तरालवर्तिविबुधमनोमिलिन्दनिवहा विदुषां श्रवण-युगावतंसीकरणार्हा। यस्याः किल मधुरोपदेश-मधुकरविरुतय एव माहात्म्यं ख्यापयन्ति, इति पुनरुक्तिभयविह्वला इव सङ्कुचन्ति अस्माकं वाक्प्रसराः।"

(प्रबन्धमञ्जरीपरिशिष्टे विदुषां सम्मतिषु)

ऊनविंशशतकभवेषु संस्कृतपण्डितेषु गाङ्गेयो नरोत्तमशास्त्री अविस्मरणीयः। सोऽपि प्रबन्धमञ्जर्याः सौरभेन मिलिन्दायमानो गुञ्जति --

भट्टाचार्यरसालादुद्भूता मञ्जुमञ्जरी सुरभिः।
पद्मपरागपरागतमधुपेन विभूषिता भाति।।
साहित्यसिन्धुमथकैः श्रीमद्भिः पद्मसिंहबुधवर्यैः।
तलगतकल्पतरोरिव मञ्जर्येषा समानीता।।
या खलु विषमे ग्रीष्मे तापादनुत्पन्ना मञ्जरी लोके।
हन्त, नितान्तमनेन प्रकाशिताऽसौ वसन्तेन।।
कस्तूरिकाकलितमञ्जुकरेण तेन
सिंहेन शासितमृगेण हृता भवान्यै।
भो भो बुधाः सरससान्द्ररुचिर्भवद्भि-
र्मञ्जर्यसौ मधुकरैरिव सेवनीया।।
उल्लुण्ठ्य कान्तिममलां नु शकुन्तलाया
वाणीनिबन्धदृढताञ्च सभङ्गि नीत्वा।
कादम्बरीवदनसौरभमाशु हृत्वा 'गाङ्गेय'-
गेयपदमेति नु मञ्जरीयम्।।

विद्योदयः

चत्वारिंशद् वर्षाणि भट्टाचार्यो विद्योदयं सम्पाद्य प्रकाशयास। इदमासीत् संस्कृतसाहित्यसेवामहासपर्यायाम् अप्रतिममेव तदीयं बलिदानम्। विद्योदयो भट्टाचार्यस्य कीर्तेरक्षयः स्तम्भः। संस्कृतपत्रकारितायाः कश्चन मानदण्डः। विद्योदये प्रकाशितान् भट्टाचार्यस्य लेखान् न केवलं भारतीया अपितु पाश्चात्त्या अपि

विश्चिदपश्चिमास्तदानीं मुक्तकण्ठं प्रशशंसुः। तेषु मोक्षमूलरोऽपि अस्य लेखनीं श्लाघते स्म। पञ्जाबविश्वविद्यालये कुलसचिवचरः आङ्ग्लशासन-उच्चपदाधिकारी विविधभारतीयभाषासु निष्णातः श्रीमान् जी० डब्ल्यू० लिटनर-महोदयस्तु भट्टाचार्यस्य वैदुष्येण रचनानैपुण्येन च तथा प्रभावितो यदसौ न केवलं सेवाकाले, सेवानिवृत्तः स्वदेशं प्रत्यागतोऽपि प्रतिमासं यावज्जीवं विद्योदयाय पञ्चविंशतिरूप्यकाणि प्रेषयामास।

मित्रगोष्ठीपत्रिकायाः सम्पादकः पण्डितप्रवरो विधुशेखर-भट्टाचार्यः संस्कृतशलाकापुरुषेषु कामप्यभिख्यां गतः। विद्योदय इव अस्या मित्रगोष्ठी अपि अभूत् तदानीमत्यन्तमुत्कृष्टा संस्कृतपत्रिका। सोऽपि विद्योदयस्य संस्कृतपत्रिकारितायामवदानं बहुमन्यमानो विलिखति -

"सम्प्रत्यपि द्वित्राः संस्कृतपत्रिका आयान्त्येव नेत्रगोचरतां विपश्चिदपश्चिमानाम्। दुर्लभैव पुनरासु सा रसधारा या खल्वासादिता सद्भिस्तत्रभवतो हृषीकेशशास्त्रिणो विद्योदये। सर्वथाऽयं विलक्षण एवासीत्। का नाम संस्कृतपत्रिका विनाकृता हृषीकेषेण अप्पाशास्त्रिणा च। ब्रह्मभूयमधिगतवतोस्तयोर्नूनमियमनाथैवेदानीमपि।"

(प्रबन्धमञ्जरीपरिशिष्टे विदुषां सम्मतिषु)

वस्तुतो विद्योदये सर्वा सामग्री भट्टाचार्यस्यैव प्रतिभायाः निष्यन्दभूता विललास। प्रत्यङ्कमस्य लेखन्याश्चमत्कारः पाठकैरन्वभूयत।

गद्यशैली -

भट्टाचार्येण स्वकीया कापि परिमार्जिता प्रौढा प्रकृष्टा च गद्यशैली विनिर्मिता। तदानीन्तना नैके साहित्यधुरीणा अस्य गद्यबन्धं श्लाघमाना बाणभट्टेनैनं तुलामारोपयन्ति स्म। ज्वालापुरसंस्कृतमहाविद्यालयेऽध्यापकः **भारतोदय**सम्पादको यशस्वी पण्डितः पद्मसिंह-शर्मा विद्याविनोदो विद्यावदातामस्य लेखनसरणिं श्लाघमानो विलिखति स्म -

"निबन्धानेतानवलोक्य न केवलं जीवति संस्कृतभाषेति प्रत्ययो भवति, सन्तीदानीमपि बाणसरणिमनुसर्तुं शक्ता लेखकधौरेयाः ये हि स्वप्रतिभाबलेन नवनवान् प्रकारानुद्भाव्य गद्यकाव्यानां ह्रेयपयन्ति निर्जीवा संस्कृतभाषेतिवादिनः, समुल्लासयन्ति साहित्य- चन्द्रचकोरचेतांसि, प्रीणयन्ति विवुधजनमनांसि, प्रकाशयन्ति चात्मनोऽसाधारणं वैदग्ध्यम्,

संस्कृतानुरागञ्चेत्यादि विचारपरम्परा- विचक्षणसहृदयहृदयमधिकुर्वन्ति। आबाल्यादधीयाना वयं विद्योदयं नितरां निर्वृत्तिमाप्नुमो निर्व्याजं कथयामश्च कादम्बरीप्रणेतुर्वर्णनशैली यदि केनाप्यंशेन क्वाप्युपलभ्यते तर्हि विद्योदयसम्पादकनिबन्धेष्वेव इति।"

पण्डितप्रवरौ श्रीहरिदत्त-काशीनाथशर्माणौ भट्टाचार्यस्य गद्य-गुम्फनचातुरीमित्थं विशदयतः।

"आधुनिकानां देववाणीसमुपासकानां विदुषां मध्ये श्रीमान् शास्त्रिमहाशयः यत्सत्यं शेखरायते स्म। अयञ्चोदञ्चन्नैसर्गिक-प्रतिभाप्रभाप्रसरः सुरभारतीचरणकमलमञ्जुमञ्जीर-कलहंसकोऽपूर्व एव लेखनकलायामवर्तिष्ट। तदीयलेखाश्च माधुर्यप्रसादसम्पदा व्यङ्ग्यसम्पुटेन चात्मानन्दनिर्विशेषं विच्छित्तिविशेषं पुष्णन्ति। तद्गद्यबन्धः प्रायशो महाकवि-काव्यरसाल-मञ्जरीसुहृत्पञ्चबाणं बाणमनुसरति, तत्प्रबन्धाः प्रायेण कादम्बरीरसं स्वादयन्ते, स्मारयन्ति श्रीभोजसंसत्सभास्तारान् कविवरान्, चित्रयन्ति नेत्रविषयतामिव आपादयन्ति प्राक्तनकविराज-समाजान्।"

सत्यमेव क्वचित् भट्टाचार्यस्य गन्धबन्धाः बाणभट्टीयं गद्यगुम्फमनुहरन्ति। दिङ्मात्रमुदाह्रियते - "बालातपरक्ताम्बरा पर्यन्त-पर्यस्तान्धकारचिकुरा सर्वतस्तुहिनजलवर्षिणी कृतप्रातःस्नानेव प्रातःसन्ध्या दिवसकरमुपतिष्ठते स्म। रविकरस्पर्शहर्षोत्फुल्लवदनकमला कमलिनी चिरविरहानन्तरं प्राप्तप्रियतम-समागमा कुलकामिनीव नितरां शुशुभे।"

(प्रबन्धमञ्जरी, महारण्यपर्यक्षणम्, पृ०१०९)

संस्कृतगद्यस्याप्रतिमं वैभवम्, भाषायां लावण्यं, शब्दराशे-रानन्त्यम् अभिव्यक्तिप्रकाराणां नानाछटाश्च प्रकटयति भट्टाचार्यस्य गद्यबन्धनैपुणी। बाण इव परिसंख्यालङ्कारेऽनेन किमपि पाटवं प्रकटीकृतम्। अस्य परिसंख्यालङ्कारा श्लेषप्रसाधिता अपि न क्लिष्टा दुरूहा वा। महाकविं चण्डीदासमधिकृत्य विशदः समीक्षात्मको निबन्धोऽनेन ग्रथितः। तत्र असंख्या परिसंख्याः प्रयुञ्जानोऽयं चण्डीदासस्य काव्यमाधुरीं श्लाघते -

"नानाविधच्छन्दोनिबद्धकाव्यनिरुद्धप्रसरा, श्रवणमात्रविषयाऽपि सहृदयहृदयसंवेद्या, विचित्राप्यनेकचित्रालङ्कृता, बहुमानास्पदाऽपि मानिनीमानापनोदनचतुरा, पूर्वरागरञ्जिताऽपि विप्रलम्भावलम्बिनी,

सुगाढप्रेमरसाश्रितापि विरहावेदनकातरा संस्कृतप्रायापि प्राकृत-कलितावयवा, गीतमय्यप्यविगीता, सरलभावापि वक्रोक्तिरचनपरा, निरुपमाप्यनेकोपमशालिनी..." (प्रबन्धमञ्जरी, पृ० ४०)

"ओजःसमासभूयस्त्वमेतद् गद्यस्य जीवितम्" इति प्रायोवादः सर्वथा सङ्गच्छते भट्टाचार्यगद्ये। वामनेन गद्यं त्रिविधमुक्तम् - वृत्तगन्धि, चूर्णमुत्कलिकाप्रायञ्च (काव्यालङ्कारसूत्रम् १।३।२२)। भट्टाचार्य एतेषु चूर्ण उत्कलिकाप्राये च गद्यबन्धप्रपञ्चे कामपि चातुरीं प्रकटयति। परन्त्वस्य अनाविद्धललितपदं चूर्णं सविशेषं मनो हरति। तद्विपरीते आविद्धोद्धतपदबन्धेऽपि निर्बाधैवास्य गतिः।

बिबुधामन्त्रणम् इति निबन्धे चूर्णस्य गद्यस्य प्रयोगो बाणभट्टीयं शुकनासोपदेशं स्मारयति -

"शिष्या गुरून् वञ्चयन्ते - गुरुकृतन्यासान् हरन्ति, समाजेषु तेषामलीकदोषान् ख्यापयन्ति च, तथैव गुरवोऽपि शिष्यधनान्यप- हरन्ति, मोहयन्ति च ताननेकविधकपटाचरणैः, इत्थं सर्वत्रैव सुमहान् विपर्यासो वरीवर्ति। तथाहि - साम्प्रतं न पितरौ सम्मानयन्ति, न गुरूनाद्रियन्ते, न हितवचनान्याकर्णयन्ति, नापि कुलगौरवमपेक्षन्ते, न बिभ्यति परलोकात्, न त्रस्यन्ति कौलीन्यात्, न लज्जन्ते गर्हिताचरणात्, न विरमत्यधर्मात्, नार्चयन्ति महर्षीन्, न तर्पयन्ति पितॄन्, नाप्यनुवर्तन्ते शिष्टान्, न पूजयन्त्यतिथीन्, न वा श्रद्दधत्याप्तवचनेषु....."

बाणभट्टस्य गद्यशैली न नवयुगे सर्वथा उपादेया। अत एव युक्तमेवैतद् यद् भट्टाचार्येण तत्र कश्चन विशेष आविष्कृतः। परिहृतान्यनेन अनेकपृष्ठप्रसृतानि वाक्यानि, दुर्वहशस्त्रधारिणां पदातीनां सैन्यपङ्क्तय इव समस्तपदानां च पङ्क्तयः। सममेव समुन्मिषति भट्टाचार्यस्य गद्यबन्धे आधुनिकी शैली, विजृम्भते च शास्त्रिया वैज्ञानिकी तार्किकी वा प्रतिपादनसरणिः। उद्भिज्जपरिषन्नाम्नि विपुलकाये निबन्धे वटवृक्षस्य प्रवचनं महावाक्यायमानं वर्तते। तत्र इयं शैली सविशेषं प्रकटीभवति। अत्र न लालित्यमपितु कर्कशता। विचाराणां प्रवाहोऽबाधं सरति, न वृथानुप्रासाः उपमानानि वा तं बाधन्ते। क्वचिच्च नूतना शब्दाः नवीना वा वाक्यरचना अपि आयान्ति दृक्पथम्। यथा सिंह उवाच - "अत्रभवतां श्रीमतामावेदनपत्रस्य प्रत्युत्तरदानात् पूर्वं श्रीमद्भिः समवेतैः प्रदर्शिता पशुसमाजादृष्टचरीयं राजभक्तिर्नाम भृशं प्रशंसनीया।"

(प्रबन्धमञ्जरी, महारण्यपर्यक्षणम्, पृ०७९)

आत्मवायोरुद्गारः Autobiography इति नव्यसाहित्य-विधायाः कृते सोल्लुण्ठमनेन शब्दो घटितः। auto नाम आत्मा, bio नाम वायुः, graphy नाम चोद्गार इति कृत्वा विरचितश्च दुर्गानन्दस्वामिनः कस्यचित् पाखण्डस्य द्वात्रिंशत्पृष्ठात्मकः आत्म- वायोरुद्गारः। दिङ्मात्रं दृश्यतामस्योद्गारस्य विच्छित्तिः -

"अथ स्वचरितप्रख्यापने प्रवृत्तस्य मे मनसि प्रथममेव "कथमहं नावतारः?" इत्येव चिन्ता समुदिता। सम्प्रति बहवः खलु पश्यतामेवास्माकमेकदैव पूर्णावताराः संवृत्तास्तदस्ति किम्मे तेभ्यः किञ्चिदपि न्यूनत्वं, येनाहमपि तथा न भवेयमिति विमृशता मया वर्तमानाभिनवावतारभ्य आत्मनस्तत्तद्विषयेष्वाधिक्यमेवानुभूतं, ततश्च अहमपि सम्पूर्णपूर्णावतार इत्यत्र कः सन्देहस्तथाहि विचार्यते। मस्त्य-कूर्म-वराहास्तु मया बहुश उदरसात् कृताः। अहमपि यदा क्रुद्धो भूत्वा गृहे नर्दनं करोमि तदा गृहिणी सस्मितं मां पुरुषसिंहं कथयति। ततो मे नृसिंहत्वे नास्ति कोऽपि संशयः। वामनेन बलिसकाशात् सकृदेवाभ्यर्थना कृता, अहन्तु बलवन्तं वा दुर्बलं वा यं कञ्चित् सभ्यवेषं पश्यामि तमेवायर्थयामि, नास्ति कोऽपि वारनियमः"....(*प्रबन्धमञ्जरी*, पृ० १६२)

'प्राप्तपत्रमि'ति निबन्धे कस्याश्चिदाधुनिकरमण्याः सम्पादकाय पत्रं स्वयमुद्भाव्य हृषीकेशभट्टाचार्येण विरचितम्। तत्र साटोपमुत्प्रासाः प्रास इव परिक्षिप्ताः, व्यङ्ग्यभल्लानां तीक्ष्णश्च प्रहारः कृतः।

"मन्दोऽपि खलु जनः प्रयोजनमनुद्दिश्य न प्रवर्तते कस्मिन्न-प्यनायाससाध्ये कर्मणि। भवांस्तु निष्प्रयोजनमेव बह्वायासेन विद्योदयं सम्पादयन् वृथैव क्षयं नीतवान् दुर्लभं मनुष्यजन्म। यदीमं वन्ध्यपरिश्रमं परिहाय भवानियन्तं कालमुन्नतपदारूढानां महात्मनां चरणतलेषु तैलमर्दनमकरिष्यत् तदा निस्सन्देहं विपुलमैश्वर्यमैहिकसम्मानञ्च अलप्स्यत। परन्त्वत्र किञ्चिद् बुद्धिकौशलमपेक्ष्यते, तत्तु भवतो लेशमात्रमपि नास्ति। नास्ति किं भवतः सम्मार्जनी-प्रयोगकुशला मादृशी सुगृहणी? या सुशिक्षां दत्वा निवर्तयेद् भवन्तमेतस्मादसन्निर्बन्धात् ..." *(प्रबन्धमञ्जरी, प्राप्तं पत्रम्,,पृ० १२२)*

पेरोडीति व्यपदिष्टायाः आधुनिकविधाया विंशशताब्दिके संस्कृतसाहित्येऽग्रदौत्यं व्यदधात् भट्टाचार्यमहाशयः। विदितमेव विज्ञानां यत् अस्यां विधायां या विडम्बनशैली उपादीयते, तत्र सविशेषमुन्मिषति

विचारभङ्गिमा, परिहासप्रवणता विचक्षणता च। उदरदर्शनम् इति एकादशसूत्रमयी वृत्तिसमन्विता भट्टाचार्यस्य एतादृशी एव पेरोडीरचना। अत्र सूत्राणि मीमांसासूत्रं ब्रह्मसूत्रं वा, भाष्यं च शाबरभाष्यं शाङ्करभाष्यं वा अनुहरन्ति। दिङ्मात्रदर्शनाय केवलं सूत्राण्येवोदाह्रियन्ते -

अथातो ब्रह्मजिज्ञासा।१।। उदरं तत्।।२।। व्यापकत्वात्।।३।। अनाद्यनन्तत्वात्।।४।। सान्निध्यमात्रेण च प्रयोजककर्तृत्वात्।।६।। अपरिच्छेद्यत्वात्।।७।। सर्गस्थितिप्रत्यवहारहेतुत्वात्।।८।। सर्वसेव्यत्वात्।।९।। सर्वध्येयत्वात्।।१०।। सदसज्ज्ञानगोचरत्वात्।।११।। *(प्रबन्धमञ्जरी, पृ०१९२- २०३)*

वस्तुतः ललितनिबन्धविधायाः प्रथमावतारं व्यदधात् हृषीकेशभट्टाचार्यस्य लेखनी संस्कृतसाहित्य इति वक्तुं युज्यते। यमं प्रति सम्भाषणम् इति निबन्धः वैयक्तिकभावानां निश्छलं निरर्गल- मभिव्यक्तिं प्रस्तौति। तत्तु ललितनिबन्धस्य रूपम्, प्राचीनसाहित्ये दुर्लभम्।

भट्टाचार्यो संस्कृतसाहित्ये निबन्धविधाया नवावतारं व्यधात्। यद्यपि सन्ति प्राचीनानां शास्त्रियाः निबन्धाः प्रबन्धा वा गद्ये, परन्तु आङ्ग्लभाषायां 'एस्से' इति संज्ञप्तायां विधायां वर्तते ततः कश्चन प्रस्थानभेदः। तद्यथा - एस्से इत्यस्य लक्षणं कुर्वन्नाह कश्चित् समीक्षकः - A loose sally of mind - मनस उन्मुक्त आहिण्डनमिति। भट्टाचार्यो महत्कष्टं साहं साहं ससाहस- माङ्ग्लभाषामाङ्ग्लसाहित्यं चाधीतवान्। अत एवायं जानाति पाश्चात्त्यनिबन्धविधाया अपि स्वारस्यम्। अत एव च तदीयनिबन्धेषु वयं प्राप्नुमः क्वचित् हैज़लिटस्य प्रभविष्णताम्, क्वचित् चार्ल्सलैम्बस्य लालित्यम्, क्वचिद्वा वा 'बैकनी'यां विचारसरणिम्।

आधुनिकीविचारधारा -

यद्यपि भट्टाचार्योऽयं पारम्परिकीं जीवनपद्धतिं बहुमन्यमानः भारतीयपरम्पराणामपितु रूढीनामपि बहुशः समर्थनं कुरुते, "रेखामात्रमपि क्षुण्णादामनोर्वर्मनः परं" नायं व्यत्येति, सर्वथा वर्णाश्रमव्यवस्थायाश्च समर्थनं करोति, परन्तु आङ्ग्लभाषाया योरोपीयसाहित्यस्य विशदमनुशीलनमनेन विहितमासीत्, तेन नवयुगविचारा अपि क्वचित् प्रविशन्ति अस्य साहित्यसंसारम्। 'महारण्यपर्यवेक्षणम्' इति विपुलकाये प्रबन्धेऽनेन ललितनिबन्धपद्धतिमाश्रित्यापि वैदेशिकशासनस्य वर्तमानकालस्य प्रजातान्त्रिक- पद्धतेः समीक्षा विहिता, तत्रैव राजततन्त्रस्य

निरङ्कुशशासनस्यापि प्रत्याख्यानमकारि। तत्र सिंहो वक्ति -

"नास्त्यस्माकं परस्परं कश्चिद्राजप्रजासम्बन्धो, यथा मनुष्याणाम्। नाहं कदापि प्रजाभूतान् युष्मानुत्पीडयन्, यथेच्छं करं सङ्गृह्य स्वविषयतृष्णां चरितार्थयामि। न च कमपि प्रजासु गुरुदण्डभयेन भीषयित्वा अवश्यकर्तव्यस्यापि कर्मणोऽनुष्ठानान्निवारयामि। नापि कस्मादपि स्वाभाविकं सर्वमेव स्वातन्त्र्यमपकृष्य तमात्मनः क्रीडाशालभञ्जिकां निर्माय यथेच्छं नर्तयामि। किं बहुना मानवेषु प्रजानां पृथक् सत्ता नास्त्येव, राजशक्तेरेव तेषु सर्वतोमुखी प्रभुता। तेषां जीवनं राज्ञः प्रसादमात्रम्..." इत्यादि *(प्रबन्धमञ्जरी, पृ ८०-८१)*

यद्यपि महामहोपाध्यायगिरिधरशर्मचतुर्वेद-हरप्रसादशास्त्रि-हरिदत्त-काशीनाथ-पद्मसिंहशर्मकमलेशप्रभृतिभिः सुधीभिः समीक्षकै-र्भट्टाचार्योऽयं भट्टबाणेन बहुधा तुलामारोपितस्तथापि बाणस्य हृषीकेशभट्टाचार्यस्य चास्ति कश्चन विशेष इत्यहं मन्ये। सत्यं बाणभट्टीयगद्यस्य केचन गुणा विलसन्ति भट्टाचार्यस्य गद्येऽपि। परन्तु बाणे भावुकतातिशयः बिम्बविधानचातुरी औदात्त्यम् अतिसूक्ष्म-पर्यवेक्षणजनिता वर्णनानैपुणी यथा चमत्करोति न तथा हृषीकेश-भट्टाचार्यस्य गद्ये। तथैव हृषीकेशभट्टाचार्यस्य गद्ये प्रतीकविधानस्य व्यङ्ग्यस्य विडम्बनशैल्या विरूपीकरणस्य यदप्रतिमं सौन्दर्यं तदपि न बाणे।

वस्तुतो विडम्बनशैल्या आधुनिकसंस्कृतगद्ये नवावतारं व्यधाद् भट्टाचार्यः। सर्व एव निबन्धा अस्य प्राय अस्याः शैल्या वैचित्र्यं विवृणते।

शुक्लं सरस्वतीशुभ्रं पाञ्चजन्यं विनादयन्।
भट्टाचार्यो हृषीकेशो गद्यबन्धे महीयते।

---ooo---

समकालिक-संस्कृत-कथासाहित्यस्य
द्वे अत्याधुनिके प्रवृत्ती - टुप्-कथा स्पर्शकथा च

बनमाली बिश्वालः

इदानीन्तनं संस्कृतसाहित्यं वस्तुदृष्ट्या शिल्पदृष्ट्या च प्राचीनसाहित्यात् सर्वथा भिद्यते। विगत-विंशशतकादारभ्य इदानीन्तनं कालं यावत् आधुनिक-संस्कृतसाहित्य-रचनाक्षेत्रे सर्वथा अस्पृष्टाः अक्षुण्णाश्च काश्चन विधाः समुद्घाटिताः सन्ति। एवं समसामयिकं संस्कृत-साहित्यम् आत्मनः कृते किमपि स्वतन्त्रं स्थानम् अकल्पयत्।

अद्य न केवलं नूतनां विधाम् अपितु नवीनां शैलीं, नूत्नं कथ्यं, नवं शिल्पं च आश्रित्य अनुक्षणं सर्जनात्मकं साहित्यं विलिख्यते। आधुनिक-परिवेशस्य जीवनानुभवमधिकृत्य विरचितम् एतद् विपुलं साहित्यं संस्कृतभाषां जीवितभाषारूपेण आधुनिक-भारतीय-भाषारूपेण वा प्रतिष्ठापयितुं सर्वथा समर्थं वर्तते। वस्तुतः संस्कृतं यावत् पुरातनमस्ति तावत् नवीनमपि वर्तते। साम्प्रतिक-संस्कृतसाहित्यक्षेत्रे पद्यकाव्यस्य यथा समृद्धिर्दृश्यते न तथा गद्यकाव्यस्य। यथा महाकाव्य-स्तोत्रकाव्य-समस्यापूर्ति-चित्रकाव्यादि-प्राचीन-मध्यकालीन-विधाभिः सममेव हाइकू-तान्का-सीजो-प्रतीक-कवितादि-रूपेण नैकाः नवीनाः काव्य-प्रकाराः विरच्यन्ते। तथैव गद्यविधायामप्यद्यत्वे नैसर्गिकं वस्तु शिल्पं च अधिकृत्य पत्रकारिता-उपन्यास-एकाङ्की-लघुकथा-
रेडियो-रूपक-हास्य-व्यंग्य-यात्रावृत्त-ललित-निबन्धादयः काश्चन नवीनाः विधाः प्रवर्तमानाः दृश्यन्ते।

संस्कृतकथासाहित्यं वेदोपनिषत्कालेषु आख्यायिकारूपेण उत्पत्तिं लब्ध्वा पुराणकाले पञ्चतन्त्रकाले च कथारूपेण विकासं प्राप्य इदानीं लघुकथारूपेण उपदेश-मनोरञ्जनादि-धरातलादवतीर्य यथार्थरूप-बन्धुरभूमौ पदं स्थापयदस्ति। साहित्योपरि स्वयुगस्य प्रभावः अनिवार्योऽस्ति। एष एव प्रभावस्तस्य जीवन्ततायाः परिचायको वर्तते। आधुनिक-भाव-बोधेन प्रभावितं संस्कृतसाहित्यमद्य प्रतिक्षेत्रं स्वजीवन्ततायाः परिचयं प्रस्तोतुं समर्थमस्ति।

आधनिक-संस्कृत-साहित्यक्षेत्रे नैके युग-प्रवर्तकाः साहित्यकाराः अभूवन्। भट्टमथुरानाथशास्त्रि-क्षमाराव-गणेशरामशर्मसदृशाः द्वित्राः

संस्कृते आधुनिकरीत्या कथा अपि व्यरचयन्। परवर्तिनः कथाकाराः तां परम्परामग्रे नीतवन्तः। अद्यत्वे नैके कथाकाराः संस्कृतेन लघुकथाः लिखन्ति। स्वसाहित्यबलेन ते पाठक-समाजेऽपि सुपरिचिताः भवन्ति। संस्कृतपत्र-पत्रिकाश्च तेषां कथाकाराणां नवीनतमकथानां प्रकाशन-व्यवस्थां कल्पयन्ति। तत्र प्रकाशितं कथा-साहित्यम् अनुदिनं विकासोन्मुखि वर्तते। संस्कृत-कथा-साहित्यस्य अत्याधुनिकः परिवेशः सहजं शिल्पविधानं च संस्कृत-साहित्यम् अन्यभारतीयभाषासूपलब्धस्य कथासाहित्यस्य समकक्षं स्थापयति। तादृशेषु कथाकारेषु अभिराजराजेन्द्रमिश्रः, देवर्षि कलानाथशास्त्री, राधावल्लभत्रपपाठी, केशवचन्द्रदाशः, बनमालीबिश्वालः, प्रभुनाथ द्विवेदी, प्रशस्यमित्र शास्त्री, प्रमोद भारतीयः, प्रमोद नायकः तथा नारायणदाशादयश्च उल्लेखमर्हन्ति। सामान्य-जनेषु पठनाभिरुचिं वर्धयितुं कथाप्रकारस्य आश्रयणम् एव भवति कालोचितः क्रमः।

लघुकथा

जीवनस्य यथार्थाभिव्यक्त्यै लघुकथा काचित् समर्था विधाऽस्ति। एतदेव कारणमस्ति यदर्थं विसंगति-पूर्णेऽस्मिन् अत्याधुनिके युगे इयं विधा अनुदिनं लोकप्रिया वर्तते। अस्यां विधायां सामान्य-जनानां जीवनं दैनन्दिनघटनाः, समस्याश्च एवं यथार्थरूपेण चित्रिताः भवन्ति येन स्वयं पाठकः एव तत्र आत्मानं चित्रितं प्राप्नोति। संस्कृतस्य लघुकथाकाराः अद्य दैनन्दिन-जीवनस्य विसङ्गतिं, दुर्नीतिं, भ्रष्टाचारं, राजनैतिकं षड्-यन्त्रं, असन्तुलितं पारिवारिकसम्पर्कं च आधृत्य सहजजीवन्तभाषया, स्वाभाविक-शैल्या च लिखन्तः सन्ति यथा अन्यासाम् आधुनिकभाषाणां सर्जकाः लिखन्ति। ते न केवलं लघुकथाः अपितु टुप्-कथाः, स्पशकथाः, व्यङ्ग्यकथाः, हास्यकथाः, विनोदकथाश्च लिखन्तः दृश्यन्ते।

टुप्-कथा

वस्तुतः अद्यतन-युगे लघुकथाविधाऽपि तथा नवीनविधारूपेण न परिगण्यते। यतो हि इदानीं तु सर्वत्र अतिलघुकथानामेव साम्राज्यं वरिवर्ति। अर्धपृष्ठात्मिकाः ताश्च अतिलघुकथाः सीमितशब्दैः साररूपेण लिखिताः भवन्ति। अतीव सरला च तत्रत्या भाषा सामान्यजनानाम् अपि अवगमनसाध्या भवति। एवं तत्रत्या गद्यशैली प्रायः सर्वैः आदृता भवति ।

ताश्च अतिलघुकथाः इदानीं 'टुप्-कथा' इति नाम्ना ख्याताः सन्ति। लघुतमकायाभिः ताः कथाः स्वसंक्षिप्ततावशात् एकतः यत्र

पाठकान् अनावश्यक-विस्तारात् रक्ष्यन्ति अपरतः तत्रत्या वस्तुगता क्षिप्रता कर्हिचित् तासां प्रभावम् अपोषितमपि त्यजन्ति।

वस्तुतः टुप्-कथा अतिलघुकथानां लघुतम-कथानां वा नामान्तरमस्ति। एताश्च कथाः 'पुटकथा'भ्योऽपि लघुतराः भवन्ति। पुटकथास्तु एकपृष्ठात्मिकाः भवन्ति। एतत् सत्यमस्ति यत् 'टुप्'-शब्दः शब्दकल्पद्रुम-वाचस्पत्यसदृशेषु शब्दकोशेषु नोपलभ्यते। परन्तु प्राचीन-संस्कृतवाङ्मये एतस्य 'टुप्'-शब्दस्य उल्लेखः प्राप्यते। श्लोकवार्त्तिक-तन्त्रवार्त्तिकयोः प्रणेता मीमांसाचार्यः कुमारिलभट्टः स्वशाबरभाष्यस्य चतुर्थाध्यायात् द्वादशाध्यायपर्यन्तस्य भागस्य सङ्ग्रहव्याख्यानं 'टुप्-टीका' शब्देन व्यवहरति। वस्तुतः तेन तट्टीकायाः नामकरणं 'टुप्-टीका' इत्यपि कृतम्। संक्षिप्तता एव तस्याः टीकायाः वैशिष्ट्यम्। एतेन सिद्ध्यति यत् टुप्-शब्दः लघ्वर्थवाचकोऽस्ति। एतमेव अर्थं मनसि निधाय एस. जगन्नाथनामा मैसुरनगरीयः कविः सर्वप्रथमं संस्कृतकविताप्रसङ्गे अस्य शब्दस्य प्रयोगं कृतवान्। परिणामतः 'टुप्-कविता' इति नाम्ना काचन कविताविधा समुद्घाटिता। टुप्-कवितां परिभाषयन् सः वदति - "पञ्चषाभिः पङ्क्तिभिः युक्ताः अतिह्रस्वाः स्वलिखिताः कविताः टुप्-कविताः" इति। अतिलघुकथानां कृते न कश्चन योग्यः शब्दः उपलब्धः आसीत्। अत एव तत्कृते सम्भाषण-सन्देशस्य सम्पादकेन विश्वासेन सर्वप्रथमं 'टुप्-कथा' इति शब्दः प्रयुक्तः। सम्भाषण-सन्देशस्य केषुचन अङ्केषु नैकाः टुप्-कथाः प्रकाशिताः सन्ति। श्रीशिवकुमारमिश्र-बनमाली-बिश्वालयोः सम्पादनायां प्रकाशितायाः उशती-पत्रिकायाः गद्यविशेषाङ्के (२००१-०२) अपि विनोदकुमारदीक्षितस्य पतितः (पृ.८९) प्रमोदकुमार-नायकस्य च अस्पृश्यः, भ्रातृप्रेम, मुक्तिदाता (पृ.८६-८८) इत्यादयः टुप्-कथाः प्रकाशिताः अभवन्। सम्भाषण-सन्देशस्य टुप्- कथाख्यः कश्चन विशेषाङ्कोऽपि प्रकाशितः अभवत् (द्र. सम्भाषणसन्देशः, अगस्त 2002)। तत्र षट्-संख्याकाः टुप्-कथाः प्रकाशिताः सन्ति - नीरजाकान्तस्य 'स्नेहः कस्मिन्' (पृ.५), रामकृष्ण वारियर्-महोदयस्य 'चौर्यनाटकम्' (पृ.५), बनमाली बिश्वालस्य 'वंशरक्षा' (पृ.६), दिवाकरशर्मणः 'मम प्रियतमा' (पृ.६), विवेकानन्द उपाध्यायस्य 'अधिकारः' (पृ.७), जाह्नव्याः 'रिपोर्ट्' (बी. एम. नागभूषण-विरचितायाः कन्नडकथायाः अनुवादः पृ.७) च। श्रीनारायणदाश-सम्पादितायां लोकसुश्री-पत्रिकायां प्रमोदकुमारनायकस्य नैकाः टुप्-कथाः

प्रकाशिताः सन्ति याः कथाः अनन्तरं 'कथासप्ततिः' (२००३) इति शीर्षकाङ्किते संग्रहे संगृहीताः अभवन्। मम दृष्टौ स च संग्रहः संस्कृतसाहित्यस्य प्रथमः टुप्-कथा-संग्रहः वर्तते यद्यपि सम्पादकेन लेखकेन तथा न अभिहितो वर्तते। परन्तु अत्रस्यासु कासुचित् कथासु बहूनि पात्राणि सन्ति। वस्तुतः बहुपात्रत्वं नाम टुप्-कथाप्रसङ्गे कश्चन दोष एव भवति।

स्वसंक्षिप्ततावशात् लघुकथाः लोकप्रियाः सन्ति। एड्गार एलान पो-महोदयः लघुकथायाः परिभाषां कुर्वन् लिखति - "A short story is a prose narrative requiring from half an hour to one or two hours in its persual". अपरं च हड्सन् महोदयानां मतानुसारं : "A short story is a story that can be easily read at a single sitting". एतयोः परिभाषयोः आधारेण एतद् वक्तुं शक्यते यत् या कथा एकस्मिन्नेव उपवेशने अर्धहोरातः द्विहोराभ्यन्तरे समापयितुं शक्यते सा लघुकथापदवाच्याऽस्ति। परन्तु एक-विंशशताब्द्याः व्यस्ततमे परिवेशे जनानां पार्श्वे होरां यावत् एकस्मिन्नुपवेशने उपवेष्टुमपि समयो नास्ति। अत एव टुप्-कथानामावश्यकता भवति। मन्ये कदाचित् एवमपि समयः आगमिष्यत् यदा जनाः एकवाक्यात्मिकां कथां पठितुमभिलषेयुः। सम्भाषण-सन्देशस्य टुप्-कथा- विशेषाङ्कस्य सम्पादकीये विश्वासमहोदयः कामपि एकवाक्यात्मिकां कथामुद्धरति। पाठकानां मनो-विनोदाय तामपि कथामहमत्र उद्धरामि - "स्वेन निष्करुणया हतायाः मातुः मस्तकं स्थालिकया गृहीत्वा गच्छतः पुत्रस्य पादः यदा मार्गे अस्खलत् तदा स्थालिकागतं मातुः मस्तकम् अपृच्छत् - वत्स व्रणितोऽसि किम्?" अर्थात् एकदा कश्चन मातृहन्ता पुत्रः मातुः शिरः स्थालिकायां गृहीत्वा गच्छति स्म तदानीं तस्य पादः मार्गे अस्खलत्। ततः स्थालिकागतं मातुः मस्तकं पुत्रं पृच्छति - वत्स ! व्रणितोऽसि किम्। वस्तुतः अत्र कस्यचित् कथावस्तुनः संक्षिप्ततायाः तथा ममतामय्याः मातुः पुत्र-स्नेहस्य च पराकाष्ठा द्रष्टुम् अनुभवितुं च शक्यते।

स्पशकथा

आङ्ग्लभाषायां यत् 'detective story', हिन्दीभाषायां च यत् 'जासूसी कहानी' इति उच्यते तदस्मिन्नालेखे स्पशकथा इति शब्देन व्यवह्रीयते। अस्याः विधायाः कृते 'अपराधसाहित्यम्', 'परिशोधनात्मकं साहित्यम्' इति वा नामकरणं दृश्यते। अयमपि स्पशकथाशब्दः सम्भाषणसन्देशस्य सम्पादकेन विश्वासेन सर्वप्रथमं प्रयुक्तं स्पशकथाविशेषाङ्के।

स्पशकथा-लेखनपरम्परा भारते यूरोपीयसाहित्यस्य प्रभावेन अभवदित्यत्र नास्ति संशितिलेशः। जेम्स बण्ड, जेम्स यंग, जेम्स ह्याडिल चेस इत्यादयः विश्वस्य प्रसिद्धाः स्पशकथा-लेखकाः सन्ति। अस्याः विधायाः लोकप्रियतां दृष्ट्वा भारतीयलेखकाः अपि स्वस्वभाषासु स्पशकथाः लिखितवन्तः। वस्तुतः तेऽस्मिन् प्रसङ्गे वस्तु-शिल्पदृष्ट्या यूरोपीय-साहित्यस्यैवानुकरणं कुर्वन्ति। परन्तु तत्र भारतीयतामानेतुं ते केवलं चरित्र-स्थानादिनां नामानि परिवर्तयन्ति। अनेन प्रमाणितं भवति यत् भारतीयलेखकाः अस्यां दिशि स्वप्रतिभां न उपयुक्तवन्तः। हिन्दीसाहित्यस्य प्रसिद्धः समालोचकः नामवरसिंहः मनुते यद् भारतं न केवलं विज्ञानक्षेत्रे अपि तु बालकथासन्दर्भे, स्पशकथासन्दर्भे च अन्यविकसितदेशेभ्यः पश्चाद् वर्तते (नई कहानी, P.77)। संस्कृते स्पशकथालेखनस्य औचित्यं प्रतिपादयितुं सम्भाषणसन्देशस्य सम्पादकः लिखति - "संस्कृतं व्यवहारपथ-मानेतुम् इच्छुकानाम् अस्माकमाशयः एषः यत् संस्कृते सर्वविधमपि साहित्यं सृष्टं भवतु इति। तदर्थं समुचितां वेदिकां कल्पयितुमेव सन्देशः सर्वदा यत्नरतः भवति। अद्यत्वे तु संस्कृते एतादृशं स्पशसाहित्यं नोपलभ्यते, उपलभ्यते चेदपि अत्यल्पप्रमाणेन केवलमिति वयं जानीमः एव। परम् एतादृशस्य साहित्यस्य वाचनयोग्यता तु अत्यधिका भवति। साधारणानां वाचनाभिरुचिनिर्माणे तत् महान्तमुपकरोति। ... संस्कृतभाषायां तादृशे लेखने इच्छुकानां मार्गदर्शनाय काश्चन कथाः उदाहरणत्वेन दर्शनीया इति धिया एषः अङ्कः स्पशकथा-विशेषाङ्कत्वेन प्रकाशितः अस्ति " (सम्पादकीयम्, सम्भाषणसन्देशः, मार्च 2000)

विंशशतकस्य विगतदशकद्वयात् समकालिकसंस्कृतसाहित्यस्य लेखकाः विश्वसाहित्यस्य सर्वाः अपि विधाः संस्कृतेऽङ्गीकुर्वन्तः दृश्यन्ते। फलतः संस्कृते स्पशकथाः अपि लिख्यन्ते। संस्कृतसाहित्ये स्पशकथा-लेखनपरम्परा अति प्राचीनां नास्ति। संस्कृते स्पशकथायाः कः प्रथमः प्रवर्तकः कश्च अस्य शब्दस्य प्रथमः प्रयोक्ता इति विषये निश्चप्रचं न जानामि। अस्मिन् प्रसङ्गे स्पशकथाशब्दस्य व्युत्पत्तेः विश्लेषणं सार्थकं प्रतिभाति। 'स्पश' इति शब्दः 'स्पश्'-धोतोः निष्पन्नोऽस्ति। स्पश- शब्दस्यार्थः भवति गुप्तचरः। विश्वकोशे "स्पशः प्रणिधि-युद्धयोः" इति तस्य अर्थः निर्दिष्टो वर्तते। अर्थात् यः रहसि करणीये कार्ये नियुक्तो भवति सः स्पशः भवति। कथनस्य आवश्यकता नास्ति यत् पतञ्जलेः पस्पशाह्निकमिति

संज्ञाऽपि 'स्पश्'-धोतोरेव निष्पन्नाऽस्ति। अपरं च, 'शब्दविद्येव नो भाति राजनीतिरपस्पशा' (शिशुपालवधः १. ११२) इत्यत्र प्रयुक्तः 'अपस्पशा' इति शब्दः तथा च 'निराकृते यदुभिरिति प्रकोपिभिः स्पशे शनैर्गतवति तत्र विद्विषाम्' (शिशुपालवधः १७. २०) इत्यत्र प्रयुक्तः 'स्पशे' इति शब्दश्च अस्यां दिशि अस्माकं मार्गदर्शनं कुरुतः।

स्पशकथानां प्रयोगप्रसङ्गे एतद् वक्तव्यमस्ति यत् संस्कृतवर्ष-पालनावसरे सम्भाषणसन्देशस्य कश्चन स्पशकथा-विशेषाङ्कः (मार्च 2000) प्रकाशितः आसीत्। तस्मिन् अङ्के स्पशकथाद्वयं प्रकाशितमभवत् - टी.के.रामाराव महोदयस्य कन्नड-कथायाः 'आवृत्ते घनान्धकारे' (पृ.४) इति शीर्षकेण शान्तलाकृतः संस्कृतानुवादः तथा विजय सासनूरमहोदयस्य 'रहस्यम्' (पृ.१०) इति शीर्षकाङ्किता स्पशकथा च। अनन्तरम् उशतीपत्रिकायाः गद्यविशेषाङ्के (जनवरी 2002) नारायणदाशस्य स्पशकथा 'प्रतिरूपम्' (पृ.८२-८५) प्रकाशिता अभवत्। ततः जयपुरात् प्रकाशितायां भारती-पत्रिकायां (जनवरी 2003) नारायणदाशस्यैव स्पशकथा : 'सत्यमेव जयते' प्रकाशिता अभवत्। ततः पुरीतः प्रकाशितायां लोकसुश्रीपत्रिकायां तस्यैव नारायणदाशस्य काश्चन स्पशकथाः प्रकाशिताः अभवन्। सम्भाषणसन्देशस्य परवर्तिनि अङ्कद्वये जनार्दनहेगडेमहोदयस्य काचन स्पशकथा भागद्वये प्रकाशिता वर्तते। नारायणदाशेन कश्चन स्पशकथासंग्रहः 'हत्याकारी कः' इति शीर्षकेण प्रकाशितः। तस्य संग्रहस्य 'अपहर्ता कः, हत्याकारी कः, मरणस्य मूल्यम्, छद्मवेशी, सत्यमेव जयते, हत्याकारिणः चिह्नम्, विश्वासघातिनी'त्यादयश्च स्पशकथाः गौतम-अधिकारि-निर्मितायाः 'सुराग' इति दूरदर्शनधारावाहिन्याः कथावस्तु आधृत्य लिखिताः वर्तन्ते। काश्चन कथाश्च तस्यैव गौतम अधिकारिणः 'सी.आई.डी.' इति नाम्न्याः अपरस्याः दूरदर्शनधारावाहिन्याः कथावस्तु आधृत्य लिखिताः वर्तन्ते। प्रसिद्धकथाम् उपन्यासं वा आधृत्य दूरदर्शन-धारावाहिन्यः नीर्मीयन्ते स्म। किन्तु नारायणदाशेन दूरदर्शनधारावाहिन्याः कथावस्तु आधृत्य संस्कृते स्पशकथाः व्यलिखत् इति कश्चन विनूतनः पदक्षेपः अस्यां दिशि।

****

विंशशताब्दस्यान्तिमदशकस्थानां संस्कृतलघुकथानां सामाजिक-आयामः

उमेशदत्त भट्टः

समाजः, सामाजिकी अवधारणा तथा सामाजिकी व्यवस्था न हि सामान्या अपितु ईदृग्गूढगभीर-ग्रन्थमयी यस्याः चिन्तनं सततमपेक्ष्यते। साहित्यकारः समाजशास्त्री तु न भवति, न हि समाजाद्भिन्नोऽपि। सोऽस्य विस्तृतधरातलस्य न केवलं जीवत्सदस्यभूतः, अपितु जागरितप्रहरी; यः अहर्निशं समाजव्यवस्थासु परिवर्तितस्वरूपाणां पक्ष-विपक्षयोः स्वविचार-पूर्णक्रान्त्या समग्रसमाजं "वयं राष्ट्रे जागृयाम" इत्येतस्य मूकप्रेरणामपि सम्प्रयच्छति। अत एव तस्य समग्रं चिन्तनं सामाजिकपरिस्थितीनां पर्यायरूपम् इति कथने नात्युक्तिर्भविष्यति।

अनन्तकालाद् यस्मिन् समाजे वयं श्वसिमः, सः पशुसमाजः मानवसमाजः इति रूपेण द्विधा विभक्तः। नहि समाजः समाजापेक्षया न्यूनः व्यापकः। जल-स्थल-नभसि तस्य समाजस्य पृथक् संसार एव सृष्टः। यस्य निरन्तरं समाजेन सह सम्पर्कः अनुवर्तते। विंशशताब्दस्यान्तिम-दशकस्थाः संस्कृतकथाकाराः सृष्टेरस्याः मूकदर्शकत्वमात्रम् अवहन्, यदा तु संरक्षणदृष्ट्या तथा विकासदृष्ट्या समाजस्यास्य पर्याप्तं चिन्तनं सामाजिक-व्यवस्थासु सञ्जातमेव। एतत्कालिकैः संस्कृतकथाकारैः स्वकथासु तादृक्सामर्थ्यं प्रस्तोतुं प्रयत्नः कृतः यादृग्वर्णनं पञ्चतन्त्र-जातककथादिषु विद्यमानम् आसीत्। एतद्व्यवस्थासु कतिपयेषां नकारात्मकपक्षाणां स्पर्शः प्रमोदकुमारनायकस्य हास्य-व्यंग्यकथासंग्रहे पशुपालननीतिः इति कथायां विहितः, यत्र दुष्पक्षस्य आलोडनं कृतं दृश्यते। अन्यत्र क्वचित्कृतमपि चेद् तद् विम्बरूपेण प्रतीकरूपेण वा स्यात्। एतादृश विम्बाः डॉ. राजेन्द्रमिश्रस्य कथासंग्रहे राङ्गडायां तथा प्रमोदकुमारनायकस्य 'उवाच कण्डुकल्याणः' इत्यत्र पर्याप्ततयोपलभ्यते। कथासंग्रहः राङ्गडा कलेवर-पात्र-कथानकदृष्ट्या च लघुकथा संग्रहाद्भिन्नः।

मानवसमाजः - अस्य शतकस्यान्तिमे दशके संस्कृतलघुकथामाध्यमेन मानवसमाजस्य विभिन्न-साम्प्रतिक-यथार्थ-

पक्षाणामुपरि कथाकारैः विचारः कृतः। बाल-नारी-पुरुष-समाजस्योपरि एव न अपि तु किन्नरसमाजस्योपरि अपि। **बालसमाजः** - डॉ. केशवचन्द्रदाशस्य 'एकदा' तथा 'महान्' इति कथासंग्रहौ बालकानां मनोरञ्जनेन सह नैतिकशिक्षा-शौर्य-संस्काराणां तथा स्थूलदृष्ट्या दार्शनिकतत्त्वानां च ज्ञान-विकासयोः प्रेरकरूपां भूमिकां सम्यक् निर्वहतः। दशकेऽस्मिन् बालकथासु बालसमस्यानां यत्स्तरीयः विचारः करणीय आसीत् तथा न विहितः। यथा बालशिक्षासमस्याः। अभिभावक एव बालाश्रमस्यावर्ते शिशूनां नोदनं, सौविध्याभावात् तस्य अध्ययनाद्विरमनम्, अभिभावकानां नाना अक्षमता तथा अनवधानतावशात् बालानां बौद्धिक-विकासस्य अवरुद्धत्वं तथा बाधितत्वमपि इत्येतादृशः पक्षाः कथास्वेतासु सम्प्रत्यपि नैव स्फुरिताः। एतद्विपरीतम् आधुनिक-शिक्षा-पद्धतिकारणात् बालसमाजे लब्धप्रसाराः अपसंस्कृतयः 'उवाच कण्डुकल्याणः' इति संग्रहस्थायां' बाए डाडी बाए' इति कथायां सुचारुतया चित्रिताः। पाश्चात्य-संस्कृत्याधृतायां

प्रचलितशिक्षायां बालकथाकारैः बालकेषु परिदृश्यमानां विकृतिं स्वीयकथासु प्रतिपाद्यविषयतया नैव आदृतमस्ति। तासु ग्रामीणबाल-जीवनाद्भिन्ना एव काश्चन गाथाः ग्रथिताः। एते विषयाः लघुकथासु न तरङ्गायिताः सन्ति।

नारीसमाजः - शतकस्यास्यान्तिमदशकस्य संस्कृकथाकाराः नारीसमाजस्य चाञ्चल्यं प्रति अत्यन्तं सम्वेदनशीलाः भवन्ति। एंकधा डॉ. प्रमोदभारतीयस्य सहपाठिनीगता नारी पाश्चात्यसंस्कृत्या रञ्जिता चेत् अपरधा डॉ. केशवचन्द्रदाशस्य ऊर्मिचूडास्था नारी स्वभारतीयमान्यताः तथा सांस्कृतिकमूल्यान् च परिरक्षन्ती दृश्यते।

डॉ. प्रमोदभारतीयस्य 'सहपाठिन्याः' 'पारितोषिकम्' इति कथानके निशा शैक्षिकसमुन्नतेः परिचारिका भूत्वा तात्कालिकसङ्गिन्या सह सीमितपरिधानेन सखीत्वं निर्वहन्ती स्वस्याः परिणीतरूपं रहस्यम् उद्घाट्य, स्वजीवनमूल्यं परिरक्षति। एवञ्च उपकृतस्य प्रतिदानतया जीवनं पणरूपेण नियोजयितुं स्वायुषः द्विगुणवतः पत्युः महेन्द्रस्य सङ्गमं हित्वा परपुरुषेण सह निर्गता। नारीजीवनस्य सर्वस्वं विनाश्य पुनरायाता च। एतद्दृष्ट्या कामैषणायाः तृप्तिरेव सर्वस्वं भवति। 'मलिनवसनम्' इत्यस्याः कथायाः नारी मधुमिता वेश्याजीवनाद् बहिरागत्य स्मितकमलवत

सम्मानपूर्णं जीवनं यापयितुम् उत्सुका भवति, अन्यत्र तु 'आश्चर्य'मित्यत्र नार्यः एकमेवं स्वरूपम् ईषत् स्फुरितं भवति, या उत्तरणशालासु आगन्तुकानामङ्कशायिनी भूत्वा व्यभिचारलीनाऽस्ति। किशोरस्य अपरिपक्वप्रेम्णः कांश्चन सुखददुःखदाननुभवान् सहन्ती चतुष्कोणः इत्यस्य नारी निराशजनकं जीवनं जीवितुं विवशाऽस्ति। 'अंशकालिकपतिः' इति नामत एव भ्रमो जायते, किन्तु अयमेकः ईदृशः विषमविवाहानां धरापृष्ठः यत्र एका पत्नी स्वपतेः आचार-विचार-व्यवहारेषु असन्तृप्ता भवति। परिणामतः तस्याः दृष्टिः सततं पत्युः अघोषितविकल्पस्य पक्षे भवति। 'सौप्रस्थानिकः' इति कथायामपि द्विगुणितवयोवता सह विवाहे जाते नार्यः पार्श्वे कष्टमयं जीवनं व्यतिरिक्तं न किञ्चिदवशिष्यते। आर्थिकविषमता-वशात् कृतः विवाहः नार्यः किञ्चिद्भिन्नमेव चरित्रं वक्ति। 'चक्रवातः' इत्यस्मिन् दारिद्र्यात् उच्चशिक्षिता कन्या एकेन वस्त्रविक्रेत्रा सह परिणयति। तद्व्यस्ततां परिलक्ष्य तथा भौतिकचाकचक्यकारणाच्च स्वस्मिन् आन्दोलितां कामवासनां चरितार्थयितुमात्मानं कस्यचिद् वाटिका-मधुपस्याङ्के संस्थापयति। असमः तथा बालविवाहस्य चित्रमेकं 'सौप्रस्थानिकम्' इत्यस्मिन् दृश्यते। तत्र निर्धनः पिता बुद्धनः यौतुकदाना-सामर्थ्यात् शान्त्याः विवाहः तदपेक्षया त्रिगुणितवयोवता सुखदेवेन साकं कारयति, यः त्रयाणां पिता विधुरश्चासीत्। विवाहस्य कतिपयदिनात्परमेव सुखदेवः दिवंगतः। तत्सन्तानैः विमातुः शान्त्याः जीवने कष्टमापादितम्। परिणामतः शान्तिः प्रगतिवादिपदं विन्यस्य पुनः स्वयं द्विर्विवाहम् एकेन युवकेन सार्द्धं करोति। अनेन काचिद्विधवा रूढिं विनश्यन्ती दृश्यते। एकविंश-शताब्दस्य देहल्यां स्थितं भारतं यत्र अध्ययनस्य नवीनाध्यायस्यो-द्घाटने संलग्नमस्ति, तत्र सम्प्रत्यपि क्वचिद् बाल्यविवाहस्य प्रथा नारीजीवनं गर्ते नोदितुं तत्परा दृश्यते। 'सहपाठिनी' इति कथायाः केतकी शिक्षितायां सत्यामपि कामभावावेशात् कृतप्रेम्णः परिणामस्वरूपं परिणयस्य विषये नकारात्मकमुत्तरमवाप्य दोलायते। ग्राम्यजीवने नगरजीवने वा भवतु उभयत्र पर्याप्तयौतुकाभावात् स्वस्वस्थित्यनुगुणं यातनाक्रान्ता भवति। डा. बनमाली बिश्वालस्य कथासंग्रहे 'नीरवस्वने' भ्रान्ततारका इत्यस्यां कथायां सरिता काचिद् उदासीना महिलाऽस्ति या प्रेमिणा कारितस्य वज्रपातस्य दग्धावशेषा सती, या सिक्थवर्तिकासमं ज्वलन्ती जीवननिर्वहणे विवशाऽस्ति। एकतः 'अपमृत्योः पुनर्जन्मस्य' च कथायां विवाहं विना

अन्तर्वत्नी नारी परिस्थितिवैषम्यग्रसिता भूत्वा गर्भं पातयति तथा स्वेच्छाचारस्य लाञ्छनं वोढुमुद्यता भवति। अपरतः 'आस्थायाः आस्था' इत्यस्याः कथायाः नायिका आस्था नेत्रव्यापारेण विहस्य तथा जीवनयापने विश्वसिति। वस्तुतः सा पुंश्चलत्वस्यैव वरणे संसारसुखमिति स्वीकरोति। डॉ. बिश्वालस्य प्रतिश्रुतिस्था नारी स्वपतेः देवशर्मणः जीवितदशायाम् अपि परपुरुषरता दृश्यते। एकतः डॉ. केशवचन्द्रदाशस्य 'ऊर्मिचूडायाः' 'शुद्धिः' इति कथायां नारी मनोविज्ञानस्य यथार्थचित्रणं प्रस्तुतम्, अपरतः 'सुखवासी' इति कथायां नार्यः त्यागभूतः आदर्शः परिलक्षितः। 'पथः' इत्यत्र प्रगतिशीलनार्यः वैवश्यं परिदृश्यते। कुमारी सावित्री केनचित् दुष्टचित्तेन अन्तःसत्वा भूत्वा आत्महत्यायै तत्परा भवति। तत्र तस्याः जिजीविषा इतोऽपि प्रबला भवति। कथासंग्रहस्य 'उवाच कण्डुकल्याणः' इत्यस्य 'नेत्रीरूपेण संस्थिता' इत्यस्यां कथायां नारी स्वसमयम् एतादृशव्यस्ततायां यापयति येन तत्पतिः गृहे स्थित्वा चुल्लीफूत्कारायापि विवशो भवति। सा स्वगृहस्थजीवनाद् दूरं गच्छन्ती परिलक्ष्यते। विकासप्रगत्योः लिप्सा तां पाश्चात्यसंस्कृतिं प्रति आकर्षयति। 'उवाच कण्डुकल्याणः' इत्यस्य 'प्रतियोगिता' इति कथायां प्रतियोगिता-माध्यमेन नग्नाङ्गप्रदर्शनप्रतियोगितायामपि भागं ग्रहीतुं गर्वम् अनुभवति। किन्त्वद्यत्वे तादृश्यां प्रतियोगितायां भागं ग्रहीतुं सामान्यानामपि प्रवेशः क्लेशकरः भवति। बहुश्रुतानामाधिपत्यं सर्वत्रेति नास्ति विप्रतिपत्तिः। श्वश्रू-वध्वोः सम्बन्धरूपं नार्याः अन्यदेकं चित्रं जवनिकातः निरीक्षति। विश्वासा-विश्वासयोः परिदृश्ये श्वश्र्वाः जेमादेव्याः उपरि स्वविश्वासयोग्याचरणबलेन विजयं लभते ऊर्मिचूडायाः पुत्रवधूः। सा स्वाचरणैः श्वश्र्वां विद्यमानाः सकलाः नकारात्मकाः मान्यताः दूरीकृत्य एकम् आदर्शीभूतवधूस्थानं लभमाना तस्याः श्वश्र्वाः अवधारणां परिवर्तितवती।

पुरुषसमाजः - पुरुषसमाजस्योपरि अपि कथाकारैः स्वकथामाध्यमेन सम्यक् दृष्टिः प्रदत्ता। तस्य प्रगतेः वृद्धि-ह्रासौ वा, राजनैतिकोन्नतिः अवनतिर्वा वा भवतु असत्याभिनयो वा भवतु एतन्मूले अर्थवत्तायाः दुरवस्थैव एकमात्रं कारणम्, येन नारीप्रपञ्चं स्वपिपासुहस्तेन बहुधा निग्रहितुं प्रयासः कृतः। अयं पुरुषसमाज एव तत्र यौतक-लालसावशात् तन्मर्यादां न्यूनीकृतवान्। तत्पुरतः तत्पुत्री तद्भगिनी च क्वचित्प्रत्यक्षतया क्वचिदप्रत्यक्षतया वा संत्रासजीवनं जीवितुं विवशो

भवति। अस्मिन् प्रगतिवादियुगे शिक्षाद्वाराऽपि एतच्चिन्तनमाधारीकृत्य न कोऽपि प्रभावः आगतः न किमपि परिवर्तनं वा आगतम्। एतदनुदिनं वार्धक्यमवाप्नोति। जयपुरस्थेन डॉ. नन्दकिशोरेण यौतुकहेतोः अभिशप्ताः विविध-सामाजिक-विसंगतयः 'यौतुकवर्तनम्' इति कथासंग्रहे ग्रथिताः। यस्माद्धेतोः यौतुकजन्यसमस्याः घटन्तेः तद्धेतुचयं कथाकारः स्वकथायां क्रोडीचकार। डॉ. प्रमोदभारतीयस्य सहपाठिनी इत्यत्र शिक्षितो युवा यौतक-संशये निपत्य प्रेमिकायाः प्रेम, प्रेमपर्यन्तं सीमितं करोति। एवमेव प्रमोदकुमारनायकस्य 'उवाच कण्डुकल्याणः' कथासंग्रहस्थायां 'क्रन्दति अनुनासिकः' इति कथायां यमोच्छिष्टमिश्रः (प्रसिद्धं नाम उच्छिष्टमिश्रः) यौतकविरोध्यभियानेषु नायकत्वं वहति स्म। किन्तु स्वस्यैव उद्योगवतः पुत्रस्य विवाहे तस्य आनन्दः न्यूनः जातः यतो हि यौतकलिप्सायाः तुलायां वधूपक्षस्य आर्थिकदृढतां स्वमनोवैज्ञानिकविश्लेषणेन तोलयति स्म। एतेन तस्यं उच्छिष्टमिश्रस्य व्यवहारः हस्तिदन्त इव विदितो भवति यः खादितुमन्यः दर्शयितुं च अन्योऽस्ति।

डॉ. बनमाली बिश्वालस्य 'प्रायश्चित्त'मित्यत्र कृषकाणां कथा किञ्चिद्भिन्नरूपेण प्रतिपादिता। अद्यापि भूस्वामिनः स्वकुटिलाचरणैः कस्यापि अपरस्य अभ्युदयं न वाञ्छन्ति। कथानायकः कृषकः सनातनः तद् दुश्चक्रस्यान्तर्गतं गोहत्याप्रायश्चित्ताय विवशो क्रियते। एवं कर्षकसमाजस्य चिन्तनं संस्कृतकथासु अपेक्षाकृतं न्यूनमेव पठितुं मिलति। अस्य साहित्यकारः नगरजीवनेन अतिसन्निहित आसीत्। 'प्रतिश्रुतिः' इति कथायाः नायकः शिष्यरूपेण गुरुमुद्दिश्य पूतनिष्ठायाः निर्वहणं कुर्वन् दृश्यते। यदा सः स्वगुरोः देवशर्मणः कृते प्रतिश्रुतानुसारं रुचिं स्खलनात्परिरक्षति। एतद्विपरीततया 'नीरवस्वनः' इति कथासंग्रहस्था अर्द्धविक्षिप्ता चम्पी पुरुषस्य कामान्धतामेधयित्वा समाजस्य अवगुण्ठित-सत्यमुद्घाटयन्ती सर्वान् आश्चर्यचकितान् करोति।

ग्रामो वा स्यात् पतनं वा स्याद् भारतस्य प्रतिकोणं शतकेभ्यः प्रचलितानां रूढीनाम् अन्धविश्वासानाञ्च प्रक्रमः अद्यापि स्वसत्तां पूर्ववद् द्रढयन्ति। एतस्यां स्थितौ डॉ. बिश्वालस्य कथायाम् 'अशुभमुखः' इत्यस्यां धोईदासः मृत्योः प्राक् मुखमप्याच्छादितवान्। अनेन मरणकालेऽपि सः लोककल्याणं न विस्मृतवान् इति लक्ष्यते। टिन्-टिन्-वृद्धः इति कथा-पात्रादस्माकं समाजः बहुलाभमर्जते परन्तु स्वार्थसिद्धिपर्यन्तमेव

तेषामुत्साहः नाधिकम्। अन्यथा तस्य अन्तिमयात्राकाले तत्परितः कस्य अनुधावनं कथं न दृश्यते ? मनुष्यस्य उद्दामस्वार्थचरित्रमत्र स्फुटमस्ति। पुरुषसमाजस्य एकः वर्गः अद्यापि साधुवेषेण जनान् वञ्चयन् विना श्रमम् अजगरवृत्त्या स्वजीवननिर्वहणं करोति। 'हसुराबाबा' इति कथायाः नायकोऽपि कश्चित् साधुछद्मधारी नान्यः।

समस्यावेष्टितैः मनुष्यैः भगवत्स्वरूपतया परिगणनीयः अतिथिः अद्य ग्रामेषु नगरेषु सर्वत्र संकटस्य अपरपर्यायरूपेण परिगण्यते। डॉ. बिश्वालस्य अतिथिः इति कथा ईदृशमेव सत्यमुद्घाटयन्ती लक्ष्यते। डॉ० बिश्वालः अतिजागरुकः कथाकारः सफलसमाजस्य अध्येताऽपि। तस्य दृष्टिः, कथाकारस्य सूक्ष्मकौशलमपि सार्वजनीनकरणे न्यूनं स्थानं नाधिरोहति। कौशलमेतत् एतत्कथाकारादतिरिक्तम् अन्यः ज्ञातुं न पारयति। निरुदिद्दष्टहृदयम् इति कथा तु ईदृशस्य सत्यस्य उन्मोचः।

प्रतिभायाः निर्दलनं नाद्यतनी वार्ता अपि तु प्राक्तना। आविष्कारस्य आत्महत्या इति कथानकस्य कुशलः प्रसिद्धश्च वैज्ञानिकः प्रायः एवमेव दुश्चक्रस्यान्तः आगत्य मुख्यमन्त्रिणः कुटिलनीतिवशात् आत्मघाताय विवशोऽभवत्। कदाचित् विद्वान् स्वाहङ्कारकारणतः उन्मत्तोऽपि भवति। सः यदा निर्गताहंकारी भूत्वा स्वस्थितिमवाप्नोति तदा न किञ्चिदवशिष्यते। डॉ. बनमाली बिश्वालस्य 'अगणिः'इत्यस्याः कथायाः नायकः दैवज्ञः अगणिः अस्यैव निदर्शनम्।

महानगरेषु वर्धितजनसंख्या-भारस्य तथा प्रदूषणस्य चित्रनिर्यासः नापितमुण्डे इत्यत्र प्रस्फुटमस्ति। एतन्महानगरीयाः आवास-समस्याः पुरस्कृत्य समाजे भिन्नाः विसंगतयः विस्तारतां प्राप्नुवन्ति। डॉ. बिश्वालस्य 'भाटकगृहम्' तथा 'पद्याराज्ञी' इति कथाद्वयं पूर्वोक्तविषयस्य विम्बरूपेण तिष्ठति। पद्याराज्ञी इति कथायां रुचिः स्वमद्यपपतेः पुरतः एव कामपिपासुभिः धर्षिता दिवंगता च।

पाश्चात्यसभ्यतायाः परिणतिस्वररूपम् उद्बुद्धेन एड्स्-रोगेण आक्रान्तः रोगी हेमन्तः स्वव्याधिकारणात् दुःखी नासीत् परं तस्य स्वास्थ्यविषये पित्रोः चिन्तां विलोक्य दुःखी आसीत्।

राजनैतिकप्रदूषणकारणात् समाजे व्याप्तासु विभिन्नविषमतासु प्रमोदनायकस्य 'उवाच कण्डुकल्याणः' इति कथायां व्यंग्यस्य उत्कृष्टता साक्षाद्भवति। मन्त्रिणाम् अज्ञानताविषये 'हासयोगाणकार्यक्रमः' इत्यत्र,

व्यर्थाश्वासनानां प्राचुर्यताविषये 'इस्पातशिल्पम्' इत्यत्र, स्वप्रतिश्रुतीः स्वपार्श्वे संस्थाप्य राजनेतृणां विषये 'तृतीयनयनम्' इत्यत्र चित्रणं दृश्यते। ग्राम्यविकास-प्रक्रियासु बाधकानां बहूनां क्षुद्रसंघानां तथा संगठनानां भूमिका प्रगतिपथं पूर्णतया अवरुद्धवती। अस्यां कथायां देशस्य विकासाय निर्मितं प्रस्तावपत्रं तथा तस्य पक्षविपक्षयोः आगतानां तर्काणां न्यूनता स्पष्टमुपलभ्यते। परमाणुशक्तेः विकासे जाते विध्वंसकारिस्वरूपस्य समक्षं राष्ट्राणाम् अपेक्षितविवशतारूपः 'डंकि-प्रस्तावः' इत्यस्यां कथायां व्यंग्यरूपेण स्फुटः वर्तते। प्रमोदकुमारनायकस्यैव कथायाम् 'अथ च कृषकः' इत्यस्याम् देशद्वयमध्ये जटिलसन्धिकारणात् क्षुद्रातिक्षुद्रसमस्या अत्यन्तसरलशैल्या सम्प्रसारिताः भवन्ति, न तु तासां समाधानम्। बहुदलीयमन्त्रिमण्डलैः संगठितस्य सर्वकारस्य हेतोः कथं जनैः यातनाः सम्मुखीक्रियन्ते तथा कथं वैकासिकप्रक्रियाः अपि बाधिताः भवन्ति - इत्येते विषयाः 'मिलितमन्त्रिमण्डिलम्' इति कथायां वर्णितमस्ति। सत्ताद्वारा भाषा राजनीतेः प्रतिनिधित्वं कुर्वन्ती दृश्यते। 'वनभाषा' इति कथा उपाधीनां निरर्थकताविषये व्यंग्यचिन्तनं प्रस्तूयते। 'उपाधि' इत्यत्र प्रौढशिक्षाकेन्द्रेषु कथं जलवत् अपव्ययः भवति। धनं च नष्टं भवति तद्विषये गतस्य शैक्षिकस्तरस्य 'प्रौढशिक्षाकेन्द्रम्' इति कथायां सम्यक् लोकार्पणीकृतम्।

अद्यत्वे मुक्तकच्छन्दसामर्थ्यवत्तायां तथा तत्सर्जकाणामुपरि कवितापाठोत्सवस्य तीक्ष्णः प्रहारः दृश्यते। 'कवितापाठोत्सवः' इति कथायां न गद्यरूपेण नापि पद्यरूपेण अपितु उभयमिश्रणरूपेण पठिताः कविताः जनानामवबोधः न भवति। अद्यत्वे यद् भक्तिगीतेन चलच्चित्ररागेण तथा भक्तिनृत्याणि पाश्चात्याङ्गविक्षेपशैल्या अनुकरणप्रथा चलिता। श्रीकृष्णस्य दुर्मतिः इति कथायां कृष्णस्य मन्दिरात् दुःखी भूत्वा स्थानान्तरणस्य चित्रं चित्रयता कथाकारेण सम्यक् प्रत्यपादि। कादम्बरी-निरोधिनीसमितिः इत्यस्याः सञ्चालनेन स्वलक्ष्यप्राप्तये कियत्साफल्यम् अवाप्तमिति शंकास्पदमेव। यत्र एतावत्यः विषमताः तत्र शान्तेः अन्वेषणं तथा आत्मज्ञानचिन्तायाः उद्रेकः स्वाभाविकः यदि कश्चिद् व्यक्तिः पारलौकिकसुखानुभूतेः पक्षे आकर्षितो भवति चेत्। एवं चिन्तनं डॉ. केशवचन्द्रदाशस्य रचनायां परिपूर्णमस्ति। तस्य शून्यनाभिः पाठकान् दार्शनिकधरापृष्ठेऽवतार्य तेषां शान्तिपथं प्रशस्तं कुर्वत् दृश्यते। साम्प्रतिकाः संस्कृतकथाकाराः सामाजिकसंघटनान् समालोड्य तत्कारणबीजपरिज्ञानाय प्रयत्नशीलाः दृश्यन्ते।

मानवीयकरुणैव बनमाली विश्वालस्य कथानां मूलस्वरः

सुश्री अर्चना तिवारी

प्रस्तुते आलेखे आधुनिक-संस्कृत-कथासाहित्यजगतः रेखाङ्कित-हस्ताक्षरस्य डॉ. बनमालीबिश्वालस्य द्वौ कथासंग्रहौ मया परिशीलितौ - उत्तरप्रदेश-संस्कृतसंस्थानस्य बाणभट्ट-पुरस्कारेण पुरस्कृतः 'नीरवस्वनः' (१९९८) दिल्ली-संस्कृतअकादम्याः अखिलभारतीय-कथासाहित्य-प्रथम-पुरस्कारेण पुरस्कृतः 'बुभुक्षा।' (२००१) च। वस्तुतः एतौ संग्रहौ आधुनिक-लघुकथा-विधायाः अत्यावश्यकैः वैशिष्ट्यैर्युक्तौ स्तः इति संग्रह-द्वयस्याध्ययनात् स्पष्टीभवति। उपर्युक्तयोः कथासंग्रहयोः समावेशितासु समस्तलघुकथासु प्रतिपदम् आधुनिकभावबोधः व्याप्तोऽस्तीति मया अनुभूतम्। अत्र न केवलं वस्तुनि अपितु शिल्पे, शैल्यां, भाषा-संयोजनायां, भावविन्यासे च सर्वत्र काचित् आधुनिकताऽनुस्यूता दृश्यते। समुचित-भावोत्कर्षैः समृद्धानाम् एतासां कथानां प्रायः करुणे एव पर्यवसानं भवति। संक्षिप्तं कलेवरं, समर्थं वस्तुविधानं, सामान्यजनानां सामाजिक- जीवनैः सम्बद्धं कथावस्तु, समाजे प्रवृत्तानां प्रतिनिधीभूतानां समस्यानां यथार्थं मार्मिकं च चित्रणं, कुशलं कथागुम्फनं, सहज- सम्प्रेषण-सामर्थ्यं, व्यावहारिक-शब्दसंयोजनमित्यादिकं प्रायः लघु- कथोचितं सर्वमपि वैशिष्ट्यं द्रष्टुं शक्यते बिश्वालमहोदयस्य कथासु।

बिश्वालस्य कथाविच्छित्तिः समीक्षकानां दृष्टिश्च

'नीरवस्वनः'-'बुभुक्षा'-इत्याख्ययोः डॉ. बिश्वालस्य कथा- संग्रहयोः लोकप्रियताविषये एतयोः सन्दर्भे प्रकाशिताः विविधविदुषां समीक्षाः विलोक्य अनुमातुं शक्यते। एताः समीक्षाः संस्कृतसाहित्यक्षेत्रे

प्रतिष्ठितासु विभिन्नासु साहित्यिक-पत्रिकासु समीक्षा-पत्रिकासु च प्रकाशिताः सन्ति। आधुनिक संस्कृत-साहित्यस्य मूधर्न्याः समीक्षकाः प्रो० राधावल्लभत्रिपाठिनः लेखकस्य लघुकथाकलां, शिल्पं, वस्तु, शैलीं च विचारयन् लिखन्ति --

"तत्कृताः कथाः सर्वथा आधुनिक-साहित्ये प्रचलिताया लघु-कथाया मानदण्डमङ्गीकृत्य प्रवर्तिताः। लक्ष्यते चात्र नूतनः कश्चनार्थप्ररोहः....वस्तुवैविध्यमासां कथानां सर्वथा श्लाघनीयम्। बिश्वालो विशदयतीह विस्तारं वर्ण्यविषयाणां, निरूपयति च निरुपमं कथा-संसारम्।....कथावस्तु सर्वत्र प्राञ्जलं प्रासादिकं प्रकृष्टं गद्यं हृद्यं निरवद्यं च लसति। कथाकथनभङ्गी वलादाकृष्य चेतः कथाजगति नयति। मनोभावानां शीलने बिश्वालस्य लेखनी प्रकटयति कामपि पटुताम् विच्छित्तिः च वर्णनीयाः।'

संस्कृतसाहित्यजगतः लब्धप्रतिष्ठाः कवयः प्रो. जगन्नाथपाठक-महोदयाः बिश्वालस्य लघुकथासु वर्णितानां पात्राणां तासां देशकालोपरि च दृष्टिम् उपन्यस्य कथयति - 'विश्वालस्य प्रायः सर्वासु कथास्वस्माकं सुपरिचितान्येव पात्राणि चित्रितानि लभ्यन्ते। बिश्वालनाम्ना दर्पणेनैकेन मन्ये ग्रामेषु नगरेषु वा भ्रमता स्वकथाविषया आत्मसात्कृताः.... मन्ये प्रायः संग्रहगताः सर्वा अपि लघुकथाः प्रवर्तमानस्य जगतो, जीवनस्य च जागरुकतयाऽऽकलने समर्थस्य लेखकस्य लेखनीतो निर्गताः सन्तीति। संस्कृतस्य लघुकथाकारत्वेन सर्वथा नवीनोऽपि श्रीबनमाली बिश्वालः स्वीयाभिराभिर्लघुकथाभिः स्वीयं विशिष्टस्थानं परिचयं चार्जयितुं क्षमो भवेत्। ...(पुरोवाक् -निरवस्वनः)

डॉ. बिश्वालस्य कथानां रम्यतां, भावगम्यतां, लोकप्रियतां, लघुकायतां च समुल्लिखन् प्रसिद्धः समीक्षकः गोविन्दझा लिखति - 'डॉ. बिश्वाल की कथायें शरत्कालीन नदी की तरह शान्त संयत धारा में बहती है। लेखक को चौंकाने वाले मोडदार तकनीक का जादू चलाना नापसन्द है। भाषिक चमत्कार भी कदाचित् ही मिलेगा। पर मिलेगी हार्दिकता, स्वाभाविकता, यथार्थता और सरलता।..... कहानियाँ नपे तुले शब्दों में साररूप में लिखी गयी हैं। इसलिये

स्वभावतः लघुकाय हैं। इनकी संक्षिप्तता पाठकों को अनावश्यक विस्तार की ऊब से बचाती है।" (दृक्-२, पृ० ९१-९२)

आधुनिक संस्कृतसाहित्यक्षेत्रे प्रतिष्ठितः डॉ० जगदीश्वर- प्रसादः डॉ. बिश्वालस्य कथानां भावपरकं परिवेशपरकं च समीक्षणं प्रस्तौति - 'बिश्वाल के व्यथाचित्रण की विशेषता यह है कि यह साक्षात् रूप में व्यक्त नहीं होती, इसकी सांकेतिक अभिव्यक्ति होती है, अतः हृदय पर

इसका स्थायी प्रभाव पडता है। यह पीडा प्रायः हास्य-मिश्रित होने के कारण अत्यन्त मार्मिक बन जाती है। . . . बिश्वाल की कहानियां घूमते आईने के समान समाज के प्रत्येक वर्ग के चित्र अंकित करती, उनकी व्यथा अथवा असाधारणता को आत्मसात् करती और कथा रूप में व्यक्त करती है। ये पात्र किसी आदर्श की सृष्टि नहीं करते, परिस्थितियों से संघर्ष नहीं करते, विशेष प्रकारकी परिस्थितियों में विशेष प्रकार की प्रतिक्रियायें करते हैं, जिससे उनकी असाधारणता उजागत होती है' (दृक्-२, पृ० ४४-४९)।

डॉ० सुनील कुमार प्रधानः बुभुक्षा'लघुकथा-संग्रहस्य कथानां विषयवैविध्यं रेखांकयन् वदति - 'एतासु कथासु ग्रामीण-नगरीययोः स्वच्छं दूषितञ्च जीवनं निरूपितमस्त्येव। मानव-समाजे व्याप्ताः कुरीतयः, समस्याः, जीवनमूल्यस्य अपघटनादयोऽपि सहजतया चित्रिताः सन्ति। एवं वक्तुं शक्नुमो वयं यत् कथासंग्रहोऽयं विविध-वर्णरञ्जिता कुशल-चित्रकारस्यैका चित्रशाला वर्तते। (आरण्यकम्)

देवर्षि कलानाथ शास्त्री च डा० बिश्वालस्य भाषायोजनविषये स्वमतमुपस्थापयन् वदति - '.....आधुनिक परिवेश के अनुरूप नई अभिव्यक्तियाँ और नये शिल्प का वहन करने वाले शब्दों में रची-बसी है। .....डॉ० बिश्वाल ने अर्थाधारित नव-शब्द निर्माण का मार्ग अपनाया है, न कि ध्वनिसाम्य पर नये शब्द गढने का, न ही सीधे मूल शब्दों को विभक्ति लगा कर लिखने का। . . . कथाकार की वर्ण्यवस्तु जिस प्रकार खरे यथार्थ का चित्र प्रस्तुत करती है, उसी के

अनुरूप सहज और सम्प्रेषक' कथोपकथन है, सुबोध भाषा है, सुगढ शैली है। कहानी का मोड और घटनाचक्र पाठकों को बाँधे रखता है।

कथा-शीर्षकम्

कथायाः शीर्षकं सर्वप्रथमं तत्त्वं भवति यत् अनायासं पाठक-दृष्टिम् आकर्षयति। शीर्षकाणां श्रेष्ठत्वं मूलभूतं च प्राणतत्त्वं तेषां संक्षिप्ततायां, कुतूहलोत्पादकतायां कथ्याभिव्यक्ति-परिप्रकाशे च निहित-मस्ति। उपर्युक्तयोः डॉ० बिश्वालस्य लघुकथा-संग्रहयोः समावेशितानां लघुकथानां शीर्षकाणि कथावस्त्वनुरूपाणि सन्ति। याः कथाः चरित्रप्रधानाः सन्ति तासां शीर्षकाणि प्रमुखपात्राणां नामसु आधृतानि भवन्ति। यासु

कथासु सामाजिकीनां परिस्थितीनां चित्रणं भवति तासां कथानां शीर्षकाणि कथाविषयीकृतानां समस्याग्रस्तानां वर्गविशेषाणां प्रतिनिधित्वं कुर्वन्ति। यासु कथासु घटनावैचित्र्यं वैचारिकद्वन्द्वं च रूपायितं भवति तासां कथानां शीर्षकाणि सर्वथा कुतूहलमुत्पादयन्ति। एवमेव प्रस्तुतकथाकारस्य शीर्षकाणि सार्थकानि श्लाघ्यानि च सन्ति। 'बुभुक्षा'-शीर्षकाङ्कितस्य कथासंग्रहस्य नामकरणं संग्रहस्थायाः कस्याश्चित् कथायाः शीर्षकानुसारि कृतमस्ति।

अस्य संग्रहस्य कथानामध्ययनोपरान्तं मया एवम् अनुभूयते यत् अत्रत्यासु प्रायः सर्वासु कथासु क्वचित् साक्षात् क्वचित् संकेतरूपेण च बुभुक्षायाः चरमपरिणतिः द्रष्टुं शक्यते। कुत्रचित् बुभुक्षा-पीडितस्य अधर्माचरणं कुत्रचित् बुभुक्षापीडितस्य मुमूर्षोः स्वाभिमानोऽपि चित्रितो वर्तते। वस्तुतः सर्वासां सामाजिकसमस्यानां मूले बुभुक्षा एव भवति। अतः अत्यन्तमन्वर्थं शीर्षकं स्वीकृतमस्ति कथाकारेण।

नीरवस्वनस्य कथाः अपि पाठकस्य दृष्टिं विविध-समस्यानां चरमबिन्दुपर्यन्तम् आकर्षयन्ति। समाजस्य उपेक्षितानां पीडितानां शोषितानां च चरित्राणां मूकपीडा पाठकानां मानसपटलं संस्पृश्य मुखरिताः भवन्ति। अकथनीय-व्यथानां, विवशचरित्राणां मूकस्वरः

सहृदयानाम् अन्तःकरणेषु गुञ्जायमानो भूत्वा किञ्चित् प्रभावि रूपं धारयितुं प्रयतते। नीरवस्वनः इति शीर्षके समाजस्य संवेदनशीलताः प्रभावोत्पादकताश्च समाहिताः सन्ति याः उपेक्षितानां चरित्राणां मौन-समर्पणभावेषु तेषां विवशाश्रुषु तथा नियतेः स्वररहिते न्यायविधाने च द्रष्टुं शक्यन्ते। अस्यापि संग्रहस्य नामकरणं कथाकारेण नीरवस्वनाख्यकथायाः शीर्षकानुसारं कृतमस्ति यत् संगृहीतानां समस्तकथानां प्रातिनिध्यमपि कर्तुं समर्थं प्रतिभाति।

उपर्युक्तयोः संग्रहयोः कथानामारम्भः कुतूहलवर्धकवाक्यैरेव भवति। प्रारम्भिकवाक्येषु कथावस्तुनः बीजं समाहितं दृश्यते। कथागतघटनानामनावश्यकं विस्तारम् अनावश्यकं वर्णनं च कथाकारेण न कृतम्। श्रेष्ठवैशिष्ट्यैर्युक्तं संक्षिप्तं शीर्षकं संग्रहस्य समस्तकथानां प्रातिनिध्यं कुर्वन्ति। कथाकारस्य इयमेव विशेषता कथारसं पुष्णाति येन आन्तं पाठकानां पठनैकाग्र्यमक्षुण्णं तिष्ठति।

कथानक-वैशिष्ट्यम्

जीवनस्य गहनतमाः समस्याः, जटिलविसंगतिश्च आधृताः एताः कथाः साम्प्रतिकसमाजस्य परिवेशस्य च यथार्थत्तत्वानि पाठकानां समक्षं प्रस्तोतुं समर्थाः वर्तन्ते। समाजं परितः यत्र तत्र विकीर्णानां जीवनदृश्यानां जीवनानुरूपं यथार्थं स्वाभाविकं च चित्रणं प्रस्तुवन्ति एताः कथाः। एतासु रुचिकरासु संवेदनशीलासु मर्मस्पर्शीषु च कथासु घटनानाम् अविच्छिन्नत्वम्, अवान्तरकथानामभावः आडम्बरविहीनः यथार्थबोधश्च दरीदृश्यते। वर्तमानपरिस्थित्यनु- रूपाभिः स्वाभाविकसम्प्रेषणीयताभिः सम्पृक्ताः एताः कथाः नवशिल्पाधृताः कथासाहित्यस्य प्रतिनिधिभूताः दृदश्यन्ते। डॉ.बिश्वालमहोदयस्य कथाः अत्याधुनिकजीवनस्य वास्तविकं चित्रं समर्थं सव्यङ्ग्यं सकरूणं च अभिव्यञ्जयन्ति। दलितानां शोषितानां पीडितानाञ्च अन्तःस्थलेषु समाहितासु मूकव्यथासु गभीरमवतीर्य तेषां पीडाश्च .सामग्र्येण साक्षात्कृत्य ताः भावोन्मेषिण्या सुगमया भाषया च स्पष्टीकर्तुम् अद्भुता शक्तिरस्ति कथाकारेऽस्मिन्। इयमेव शक्तिः तस्मै साहित्यक्षेत्रे सुदृढाभूमिं प्रददातीत्यत्र नास्ति सन्देहस्यावकाशः।

भवभूतेः प्रसङ्गे उद्घोषिता "एको रसः करुण एव" इति प्रसिद्धा उक्तिः प्रस्तुतकथाकारस्यापि प्रेरणास्रोतः प्रतिभाति। इमाः कथाः बहुविधसामाजिकात्याचारैः सन्त्रस्तं जीवनं जीवताम् उपेक्षितानां मूकपीडितानां पीडाभ्यः किञ्चित् मर्मस्पशी सांकेतिकं च स्वरं प्रददति। असमानवर्गेषु विभक्ताः वर्तमानसमाजस्य जटिल- विसङ्गतयः प्रस्तुतकथा-कारस्य कथानां धरातलमस्ति। प्रस्तुत कथाकारस्य सम्वेदनशीलं हृदयं मानवमात्रस्य पीडाभिः व्यथाभिश्च भृशं द्रवितं भवति। व्यथैवास्य लेखकस्य कथानाम् आत्माऽस्ति। विवशपात्राणां शारीरिकाणां, मानसिकानां, सामाजिकानां च व्यथानां यथार्थाभिव्यक्तौ विविधकाल्पनिक-परिस्थितीनां सृजनं करोति अयं कथाकारः। मानवतायाः नव्यविचारैर्युक्तानां कथानां सम्प्रेषणीयताऽपि प्रशस्याऽस्ति। पाठकः न केवलं कथासु वर्णितानि घटनानि, चरित्राणि परिवेशान् वा आत्मसात्करोति किन्तु कथासु निहितान् सन्देशानपि ग्रहीतुं नितरां समर्थो भवति।

आसु कथासु समस्यापरकाणां परिस्थितीनां सहजवर्णनं, घटनानां मनोवैज्ञानिकप्रभावेण समं पारस्परिकव्यवहाराणां सुसूक्ष्मदृश्याण्यपि सन्निहितानि सन्ति। जीवनसम्बद्धानां विभिन्नानां मर्मस्पर्शिपरिस्थितीनां

सृजनेन, कथाकलायाः सौन्दर्यविकासमाध्यमेन च कथाकारेण एतासु कथासु विविधगुणाः संयोजिताः। यद्यपि प्रस्तुतासु कथासु क्वचित् पीडायाः स्पष्टाभिव्यक्तिः, क्वचिद् व्यथायाः संकेतः, क्वचित् मार्मिकं व्यंग्यं, क्वचिच्च स्वाभाविकः हासः दृग्गोचरीभवति तथापि प्रायः सर्वासु कथासु करुणभावः अवश्यम् अभिलक्ष्यते। सामाजिकहितभावनया प्रेरिता च इयं करूणा क्रमशः पुष्टं रूपं धारयति। कथामाध्यमेन आसां कथानां मूले लोकमंगल- भावनाऽपि संलक्षिता भवति। वस्तुतः एताः कथाः यथार्थरूप-विन्यासपुरःसरं स्वाभाविकता-सहजता-सदृशैः वैशिष्ट्यैः युक्ताः सत्यः चमत्कारं कुतूहलं च उत्पादयितुं नितरां समर्थाः भवन्ति। अधोलिखितपृष्ठेषु उपरि चर्चितयोः संग्रहयोः कासाञ्चित् लघुकथानां विवेचनं प्रस्तूयते -

चम्पी - कस्याश्चित् युवत्याः विक्षिप्तताजन्यदुर्दशायाः मार्मिकं चित्रणं कुर्वन्ती नीरवस्वनाख्य-संग्रहस्य प्रथमा लघुकथा चम्पी सहृदयानां पाठकानां चेतः सम्वेदयति। अस्यां कथायाम् उन्मत्तायाः कथानायिकायाः चम्प्याः यौनशोषणम् अस्माकं समाजस्य विकृतिग्रस्तमानसिकतां स्पष्टम् अभिव्यनक्ति। कथायाम् एतस्यां सभ्यमानवसमाजस्य असभ्यः कश्चन अमानवीयः पक्षः जागृतो भवति।

अशुभमुखः - प्रस्तुतलघुकथायां समाजे प्रचलितानां तथाकथितानाम् अन्धविश्वासानां दंशं सहमानस्य दारिद्रस्य कस्यचित् श्रमिक-युवकस्य व्यथाकथा चित्रिताऽस्ति। सामाजिकविषमतायाः यथार्थबोधः अभिव्यञ्जितो भवति अनेन कथामाध्यमेन। अत्याधुनिकस्यास्य प्रगतिशीलमानवसमाजस्य कश्चन वर्गः ईदृशोऽपि वर्तते यस्य मनःस्थितिः अन्धविश्वासाग्नौ सर्वात्मना दग्धीभूता दृश्यते। मानसिकोत्पीडनं साहं साहं धोइआनाम्नः कथानायकस्य स्वभावः प्रस्तरीभूतोस्ति। जनदृष्टौ अशुभमुखः परोपकारी सः जनहितम् अग्रे कृत्वा स्वदेहत्यागसमयेऽपि स्वमुखं पट्टकेन आवृत्य शरीरं त्यजति।

टिन्टिन् बृद्धः - हास्यात्मकेन आरम्भेण व्यंग्यात्मकेन मध्येन अवसादात्मकेन च अन्तेन युक्तायां टिन्-टिन्-वृद्धः इति शीर्षका-ङ्कितायामस्यां लघुकथायाम् आत्मविश्वासविरहितस्य कथानायकस्य चरित्रस्य सांकेतिकी अभिव्यक्तिः दृश्यते। ग्रामीणमानसिकतायाः सुष्ठु चित्रणं द्रष्टुं शक्यते अस्यां कथायाम्। परन्तु अस्याः कथायाः इयमेव बिडम्बना वर्तते यत् टिन्-टिन्-वृद्धस्य जीवनकाले तस्य इच्छाविरुद्धेऽपि

बालानां वयस्कानां च संमर्दः तं परितः भ्रामं भ्रामं तस्य परिहासं कृत्वा तं तुदन्नासीत्। किन्तु तस्य अन्तिमयात्रायां सः नितान्तम् एकाकी एव आसीत्। तस्य उत्पीडनस्य पराकाष्ठा पाठकानां करूणावारिधिं सृजन्ति। मनोरञ्जनाय कस्यचित् सामान्यमनुष्यस्य असामान्यरीत्या हननम् अस्माकं समाजस्य नितान्तं घृण्यं पतितं निन्दनीयं च पक्षं प्रकटयति।

अभीप्सा - अस्यां लघुकथायां कस्याश्चित् निर्धनायाः विधवायाः यातनासिद्धस्य जीवनसंघर्षस्य चित्रणं कृतमस्ति। अनेकेषाम् अपमान-तिरस्कारादि-व्यंग्यवाणैः आहता काचिद् दुःखिनी विधवा स्वपुत्रं समाजे प्रतिष्ठापयितुं सततम् उत्थानपतनानि सम्मुखीकृत्य अन्ततोगत्वा यथा तथा स्वप्रयासे सफलीभवति, किन्तु पुत्रस्य लक्ष्यप्राप्तेः किञ्चित् पूर्वमेव सा दिवं गत्वा पुत्रस्य मनसि कञ्चन अपूरणीयमवशोषं चिराय परित्यजति।

पितृप्राणः - दिल्ली-संस्कृत-अकादम्या पुरस्कृतायामस्यां कथायां कस्यचित् पितृहीनस्य वामनस्य व्यथामयी आत्मकथा वर्णितास्ति। दुःखे स्थित्वाऽपि सः अन्यान् हासयितुं सर्कसक्रीडायाम् अकारणं हसति। तस्य पारिवारिकपरिस्थित्या पीडितस्य तस्य अन्तर्मनः किन्तु सततं दौर्भाग्येन द्रवितं सत् करुणरसाय पर्याप्तमवसरं ददाति। स्वकीयामनिर्वचनीयां व्यथामन्तःकरणे संगोप्य मातृप्राणात् पितृप्राणे परिवर्तितः हास्यरसप्रवीणः वामनः यद्यपि सर्कससमये स्वयं दःखी भूत्वापि दर्शकैः सह हसति तथापि स्वजीवने नितान्तम् एकाकी एव अस्ति।

श्रान्ततारका इति कथायां सरितानाम्न्याः कस्याश्चित् युवत्याः प्रेमप्रसङ्गे प्रेमिणः विश्वासघातात् समुत्पन्नायाः व्यथायाः जीवन्तं चित्रणमस्ति। अत्र प्रेम्णि विफलकामायाः कस्याश्चन युवत्याः आचरणानां व्यवहाराणां च मनोवैज्ञानिकं वर्णनं कृतमस्ति कथाकारेण।

हसुराबाबा - हसुराबाबा इति यत् चरित्रं वर्तते तत् स्वनाम्नः सार्थकतायै सदैव सुखेषु दुःखेषु च समानरूपेण हसति। वस्तुतः सः कस्यचिद् भिन्नरूपस्य व्यक्तित्वस्य अधिकारी वर्तते। आध्यात्मिक- ज्ञानाभावे धार्मिकाभिरुचिविरुद्धेऽपि परिस्थितिवशात् संन्यासवेशं धृतवतः कथा-नायकस्य सांसारिक-सुखदुःखाभ्यां सह न कश्चन सम्पर्कः। सः तु गांजाधूमेन प्रमत्तो भूत्वा अत्यन्तं सहजभावेन स्वानुभूताः गोपनीयाः कथाः सोत्साहं श्रावयति। सः कश्चन कुशलः कथावाचकः इव कदाचित् काल्पनिकीं कथामपि स्वानुभूतामिव वर्णयति। अतः बालाः वृद्धाः युवानः

सर्वे तस्य कथावाचन-प्रतिभया चमत्कृताः सन्तः मन्त्रगुम्धा इव तस्य कथाः शृण्वन्ति। एतस्मिन् क्रमे एकदा सः ईदृशीमेकां कथां श्रावयति यया तस्य आध्यात्मिकी साधना केवलम् आडम्बरपूर्णा इति प्रकटिता भवति। संयम-विवेक-दृढसङ्कल्पादीनाम् अभावे तस्य यौनसुलभदुर्बलतायाः परिप्रकाशः भवति। एतस्मिन् संदर्भे संन्यासिनो युवामनसश्च अर्द्धन्द्वस्य स्वाभाविकं चित्रणं सूक्ष्मं मनोवैज्ञानिकं विश्लेषणं च कृतं कथाकारेण।

अपूर्वं पारिश्रमिकम् - कथायामस्यां सामाजिकवैषम्याद् समुत्पन्नानां विचारगतानां कर्मगतानां च विसंगतीनां मार्मिकं चित्रणं द्रष्टुं शक्यते। स्वस्य स्वपरिवारस्य च भरणपोषणाय पादत्राणकूर्चनाय बाध्यः किशोरः पपुना कथायाः केन्द्रबिन्दुरस्ति। एकतः उच्चवर्गियाणां यूनां विलासमयं जीवनम् अपरतश्च पपुना-सदृशानां निम्नवर्गियाणां स्वजीविकायै, जीवनाय च विपन्नताग्रस्तः संघर्षः। एकतः धनस्य महान् दुरुपयोगः अपरतः जीवनस्य न्यूनतमा- वश्यकतानां पूर्तये स्वप्नमात्रम्। एकतः वातनियन्त्रितकक्षे अश्लीलं चलचित्रं पश्यन्तः मद्यपायिनो नवयुवानः अपरतः तस्मिन्नेव कक्षे निर्धनिनः पपुनस्य एकस्मिन् क्षणे निर्मितः परस्मिन् क्षणे विखण्डितः अपरस्मिंश्च क्षणे विकीर्णः दिवास्वप्नः। एकतः विलासमयजीवनशैल्या पथभ्रष्टाः नैतिकतासदाचारादर्शमूल्यैः सर्वथा अपरिचिताः धनिक- युवानः अपरतः आजीविकायै संघर्षरतः मानवीयमूल्यैर्युक्तः पारिवारिकदायित्वानां पूर्त्यै स्वप्नं पश्यन् कश्चन निर्धनः बालकः। बालकत्वात् यूनां विरोधाचरणे असमर्थस्य कस्यचन बालश्रमिकस्य शोषणं कथायां करुणरसं सृजति।

तमसाच्छन्ना दीपावली - अस्मिन् शीर्षकेऽपि व्यथा एव कथायाः मूलस्वरः। दीपावली दीपानां प्रकाशोत्सवरूपेण प्रसिद्धाऽस्ति। एतस्मिन् पर्वणि कस्यचित् जीवनम् अन्धकाराच्छन्नं भवति चेत् कारुण्यं स्वतः प्रसृतं भवति। बाल्यकाले घटितायाः कस्याश्चिद् दुःखदघटनायाः स्मृतौ व्यथितस्य नायकस्य हृदये पीडायाः विस्तारः, ततश्च कथासूत्रस्य प्रसारः। दीपावल्यामेव जगुमहाजनस्य पुत्रः दिनेशस्य पितरौ मारितवान्। दिनेशस्य पिता अर्थाभावात् दीपावल्युत्सवे स्वसन्तानानां कृते केषाञ्चिदावश्यक-वस्तूनां क्रयणे असमर्थः अगत्या जगुमहाजनस्य गृहपरिसरात् स्वरक्तं स्वेदं कृत्वा उत्पादितस्य धान्यस्य स्यूतद्वयं चोरयति। एतस्य लघुनः चौर्यकार्यस्य प्रायश्चित्तं किन्तु तस्य जीवनविनिमयेन भवति। निर्दयेन

धनिकवर्गेण कस्यचित् सरलकृषकस्य हननं स्मारं स्मारं प्रतिवर्षं दीपावल्यवसरे नायकस्य उत्साहः प्रसन्नता च स्वतः म्रियेते। मित्रस्य पित्रोः हत्याजन्या स्मृतिः अपि तस्य कृते मृत्युतुल्यं कष्टकारकं भवति। सामाजिकोत्पीडनाधृता इयं कथा समाजस्य तत्कालीनपुञ्जीवादस्य मर्मभेदि चित्रणम् उपस्थापयति।

दुश्चरित्रा - प्रस्तुतकथासंग्रहस्य लघुकथासु कथाकारेण समाजस्य विविधचरित्राणां सूक्ष्मं निरीक्षणं प्रस्तुतम्। सः कानिचन विशिष्ट- चरित्राणि एव सुन्दरवस्तुविधानेन कथारूपं प्रदाय स्वकथासंसारं पाठकानां समक्षं प्रसारयति। दुश्चरित्राभिधायाम् एतस्यां कथायां नायिकायाः सौदामिन्याः चरित्रं यथार्थरूपेण वर्णितं सत् पाठकानां चेतः आकर्षयति। वस्तुतः चरित्राणाम् आकलने मनुष्यस्य आचारः एव आधारः भवति। तत्र न कोऽपि निश्चितो मानदण्डो भवति।

अस्माकं स्वार्जिताभिः पूर्वधारणाभिः अनुभवैश्च वयं मनुष्यस्य साधुत्वासाधुत्वयोः स्वदृष्ट्या विचारं कुर्मः। मानवमस्तिकष्कवत् मानवचरित्रमपि जटिलतापूर्णमस्ति। कदाचित् भिन्नचरितैः सम्बद्धाः प्रभाविताश्च सन्तः वयं मिथ्याविचाराणाः वशीभूताः भवेमः। सौदामिनी नाम स्वसौन्दर्यं प्रति जागरुका काचित् आधुनिका नारी अस्ति। सा उन्मुक्तविचाराणामाधिकारिणी, बुद्धिमती च वर्तते। सा सर्वैः सह प्रेमपूर्वकं व्यवहरति। तस्याः स्नेहपूर्णव्यवहारेण भ्रान्ताः जनाः स्वमनोविकारवशात् स्वप्रसङ्गे एव तस्याः अनुरागं मन्यमानाः प्रसन्नाः भवन्ति। सौदामिनी स्वव्यवहारेण अपरिचितानपि शीघ्रमेव आत्मीयान् करोति। आधुनिकतायाः मिथ्यावरणेन आवृतः प्राचीनताशृंखलायां च आबद्धः समाजः कस्याश्चित् नार्याः स्वस्थं, सहजं, स्वच्छन्दं च आचरणम् अन्यथा गृह्णाति। तस्याः एतादृश उन्मुक्तो व्यवहारः तस्याः विशिष्टः स्वभाव एवास्ति न तु चरित्रहीनता तत्र कारणं वर्तते। सा तु काचित् सुशीला पतिव्रता नारी वर्तते। लेखकः समाजस्य एतादृग्-धारणासम्बद्धानि कारणान्यपि अन्वेष्टुं यतते - "मन्ये यदि संसारे सर्वाः स्त्रियः सौदामिन्याः तुल्याः सुशीलाः स्युस्तर्हि तासां पतयः कामपि सौदामिनीं दुश्चरित्रां कर्तुं नोत्सहिष्यन्ते"। कथायां विद्यमानः स्वाभाविकः प्रवाहः कौतूहलं च पाठकान् आद्यन्तं बध्नाति।

वासुदेवस्य जन्मदिनम् - बिश्वालमहोदयस्य कथासु पीडितानां शोषितानां च व्यथा मुखरिता भवतीति पूर्वमुक्तम्। इयमपि कथा स्वजनेन शोषितायाः अबलायाः कथाऽस्ति। एषाऽपि कथा नारी- उत्पीडनस्य अक्षुण्णं सङ्केतं पाठकानां चेतस्सु मुञ्चति। शाङ्करी काचिदेतादृशी दुर्भाग्यशीला नारी अस्ति या दशवर्षाणि सश्रमं कारावासम् उपभुनक्ति। तया सः अपराधः अपराधभावनया न कृतः। अपितु स्वसतीत्वरक्षणाय आचरितः। अन्धमहत्वाकाङ्क्षया वशीभूतः शंकर्याः पतिः स्वपदोन्नतये स्वकीयां धर्मपत्नीं स्वस्याधिकारिणः समक्षं प्रेषयति। स्वसतीत्वरक्षायै असहाया सा मदिराकूपीं भङ्क्त्वा पत्युः अधिकारिणः उदरे प्रवेशयति। येन दुराचारी अधिकारी तत्क्षणमेव प्राणान् त्यजति। ततः शंकरी कारावासं प्राप्तवती। पत्या प्रदत्तं दुःखं यावत् समाप्तं नाभवत् तावत् अपरं दुखमपि आगतम्। तस्याः पुत्रः वासुदेवः कारावासनियमस्यानुपालने तस्याः दूरं गच्छति। कथाकारः अत्र द्वापरयुगीनेन भगवता श्रीकृष्णेन शंकरीपुत्रस्य वासुदेवस्य तुलनां प्रस्तौति। यतो हि तयोः उभयोः जन्म कारागारे एव अभवत्। अतएव तस्य नाम अपि मात्रा वासुदेव इति कृतम्। परन्तु उभयोः प्रसंगे महान् भेदोऽपि परिलक्ष्यते। द्वापरयुगे यद्यपि कृष्णस्योपरि कंसस्य भयं तथा कारारक्षकाणां भयंकरी दृष्टिः च आसीत् तथापि पितुः वसुदेवस्य स्नेहमयी सहयोगपूर्णा च उपस्थितिः अपि तत्र आसीत्। परन्तु अत्र पितुः पुण्डरीकस्य दुष्कर्मणां परिणामरूपेणैव वासुदेवस्य जन्म कारागारे अभवत्। कारावासीय-नियमानुसारं षड्वर्षेभ्यः पश्चात् न कोऽपि शिशुः कारावासे वसेत् एतदर्थम् अनुमतिः न दीयते। समाजस्य मनुष्यस्य च हितदृष्ट्या काराधीक्षकैः नियमाः निर्मिताः भवन्ति। अतः भावनानां तत्र मनागपि स्थानं न भवति। ममतामयी माता पुत्रवियोगस्य कल्पनायां भूयो भूयः रोदिति। अस्मिन् अवसरे कथाकारः मातु व्यथायाः, पुत्रस्य अबोधाचरणस्य, सहकारावासिनीनां सहयोगपूर्णव्यवहारस्य च स्वाभाविकं वर्णनं प्रस्तौति। कथायाः व्यवस्थितः क्रमः, सहजः प्रवाहः घटनासंयोजनं च हृद्यं प्रशस्यतरं चास्ति।

दीपशिखायाः संस्कृतशिक्षा - सहजाकाङ्क्षाणां पूर्तये सरल-व्यवहारादुत्पन्नां विभिन्नां स्वाभाविकीं परिस्थितिमाधृत्य कस्मिंश्चित् सामान्यपृष्ठभूमौ एव अस्याः कथायाः विकासोऽभवत्। दीपशिखायाः हृदये संस्कृताध्ययनस्याभिलाषः एव कथायाः बीजमस्ति। क्रमशः दीपशिखायाम्

अध्ययनस्य अध्यापके च अध्यापनस्याभ्यासावृत्याः विकासः कथायाः आरोहोऽस्ति। कथावस्तु तंदैव चरमोत्कर्षं प्राप्नोति यदा दीपशिखायाः गृहे अध्यापयन् अध्यापकः समयमेव विस्मरति। ततः मद्यपानान्तरं दीपशिखायाः पतिः कार्यालयमागत्य पृच्छति - "भवानद्य अत्र किमर्थम्?" ततः भग्नहृदयः अध्यापकः कथयति - "कदाचिद् भवतः एतदीयं स्वरूपं द्रष्टुम्"। ततः परम् अध्ययने विरामः, दीपशिखायाश्च क्षमायाचना - एतादृशः कथायाः वृतान्ते- ऽवरोहोऽस्ति। लेखकस्य पुनः अध्यापनाय अस्वीकृतिरेव कथायाः निष्कर्षोऽस्ति। कथायां परिस्थितिजन्यमनोभावस्य स्पष्टं चित्रणं दृश्यते। कथाविषयः वर्तमानकालस्य विचारधारां व्यक्तीकर्तुं समर्थः प्रतिभाति।

अभिशप्तो देवदासः - समाजस्य अन्तहीनोपेक्षाभिः निष्पीडितस्य देवदासस्य करुणजीवनगाथा प्रस्तुतकथायाः वस्तुविधानम्। समाजे प्रचलितेभ्यः अन्धविश्वासेभ्यः समुत्पन्नाः परिस्थितयः संयोगवशात् अविवाहितस्य पुत्रहीनस्य च देवदासस्य जीवनम् अभिशप्तं करोति। अन्धविश्वासस्य वशवर्तिनं देवदासं समाजः अशुभम् अमङ्गलकरं च मनुते। अतस्तस्य जीवनम् उपेक्षायाः व्यथायाः पीडायाश्च कथा अभवत्। तस्य हृदयम् अतीव पावनं निर्मलं च वर्तते। सः कायेन, मनसा, वाचा यथाशक्ति सर्वेषां निःस्वार्थसहायताम् आचरति। वस्तुतः सः निष्कामः कर्मयोगीव वर्तते। सः स्वदौर्भाग्यस्य कृते कदापि अभियोगं न करोति। स्थितप्रज्ञः इव सः सुखदुःखे जयाजयौ च सहते। समाजस्य उपेक्षाभावम् उपहासं वा, शरीरस्य आरोग्यम् अनारोग्यं वा सः सहर्षं स्वीकरोति। बालानां कृते देवदासस्य मनसि वात्सल्यभावः अत्यधिकोऽस्ति। निःस्वार्थ-सेवा कर्त्तव्यपरायणता उदारचेतना परोपकारीस्वभावः निर्दोषव्यक्तित्वम् इत्यादयो मानवगुणाः देवदासमाध्यमेन कथायाम् उपस्थापिताः सन्ति। देवदासं प्रति जनानां निष्ठुरताभावः निर्ममभावश्च अस्यां कथायां व्यथां सृजति। ग्रामीणविचाराणां ततः समुत्पन्नानां परिस्थितीनां च चित्रणं प्रस्तुतकथायाः वैशिष्ट्यमस्ति। अन्धविश्वासवशात् कस्यचित निर्मलचित्तस्य मनुष्यस्य मार्मिकमन्तं दृष्ट्वा पाठकानां हृदये करुणभावानाम् उद्दीपनं विधाय कथा पूर्णरूपेण सफलत्वमाप्नोति।

बुभुक्षा - प्रस्तुतकथामाध्यमेन लेखकस्य सूक्ष्मेक्षिका संवेदनशीला दृष्टिः च पाठकानां समक्षम् उद्घाटिता भवति। मन्दिरपरसिरे भिक्षां याचमानानां

भिक्षुकानां मध्ये कश्चन पङ्गुः भिक्षुः कस्याश्चित् अन्धबालिकायाः भिक्षां चोरयति। लेखकः यदा तस्य अपराध- सम्बन्धिनीं विवशतां जानाति तदा सः आश्चर्यचकितो भवति। धनीभूतेन कारूण्येन तस्य मनः मूढं भवति तथा व्यथया च वाणी मूकीभवति। पङ्गुयुवकेन तत् असामाजिकं कार्यं क्षुत्पीडितान् स्वपरिवारजनान् भोजयितुं विवशो भूत्वा अकरोत्। एवम् अस्माकं समाजस्य कश्चन दयनीयः पक्षः कारुण्येन सह प्रस्तुतकथामाध्यमेन प्रकटितोऽभूत् पाठकानां समक्षम्।

बुभुक्षा-नीरवस्वनयोः संगृहीतानां कथानां सम्पूर्णानि भाव- तत्त्वानि अत्र स्थानाभावात् विचारयितुं न शक्यन्ते। एतासु कथासु सामाजिक-वैविध्यानि चित्रितानि सन्ति। उभौ संग्रहौ मानवस्य कोमलसंवेदनां स्वरं प्रदातुं समर्थौ स्तः। हृदयस्य भावभूमेः नवोन्मेषः मानसपटले नवचिन्तन-धारां प्रवाहयितुं समर्थोऽस्ति। लेखकस्य कथासु हास्यव्यंग्यादीनामपि प्रर्याप्तं स्थानम् अस्ति। आसां कथानां कथायोजनकौशलं प्रशस्यमस्ति। अत्र हास्येऽपि उपेक्षितवर्गाणां करुणपीडायाः मर्मभेदकाः व्यंग्यबाणाः पाठकस्य भावभूम्यै विस्तारं दातुं समर्थाः सन्ति। कदा आगमिष्यति दूरभाषः राजधानीयानेन राजधानीयात्रा, विद्युत्स्पर्शसिद्धिः, शिष्यादिच्छेत् पराजयम्, प्रभाते मुखदर्शनम्, निर्यासः नापितमुण्डे, प्रियतमा दैनिन्दिनी तथा मे श्रीमती, उदरनिमित्तम् इत्यादिषु कथासु चित्रितं हास्यं हृद्यं संवेद्यं च वर्तते। चर्चितः कथाकारः जीवनस्य विसंगतिः विविधसमस्याश्च हास्यरसव्याजेन प्रस्तौति।

अध्यापकस्य करूणकथा, वासुदेवस्य जन्मदिनम् परधर्मो भयावहः, प्रायश्चित्तम्, अविष्कारस्य आत्महत्या-प्रभृतिषु कथासु जीवनस्य विडम्बनानां सहजं प्रकाशनमस्ति। लेखकः सामाजिक- शोषणस्य विरोधे स्वरमुत्तोलयितुं पाठकान् विवशीकरोति। एवं सः प्रत्येकं वर्गस्य व्यथाम् आत्मसात्कृत्य स्वकीयायै लेखन्यै विस्तृतं धरातलं प्रददाति। तस्य लेखनी एतादृशानि पात्राणि सृजति ये न केवलम् आदर्शं प्रतिष्ठापयन्ति किन्तु परिस्थितिभिः सघर्षमपि कुर्वन्ति।

रेलयात्रा तथा मे सहयात्री, प्रतिश्रुतिः, स्वर्गे मम प्रथमः परिचितः, निरुद्दिष्टं हृदयम्, अतिथिः इत्येतासु कथासु प्रस्तुतानि व्यंग्यानि हास्यरसमाध्यमेन मानवस्वभावं समाजिकीं समस्यां प्रति च संकेतयन्ति। भाटकगृहम् इति कथा महानगरेषु आवाससमस्यायाः रेखाङ्कनं करोति।

अपमृत्योः पुनर्जन्म इत्याख्या कथा प्रेमप्रसङ्गे असफलतायाः कस्याश्चिद् युवत्याः विवाहं विषयीकरोति। चक्रव्यूहः इति कथायां विवाहेतरसम्बन्धाद् उत्पन्ना पारिवारिकोत्तेजना वर्णिताऽस्ति। किन्नरः इति कथायां उपेक्षायाः दंशम् अनुभवतां किन्नराणां व्यथा वर्णिताऽस्ति। बलिदानम् इति कथायां भगिन्याः सम्मानरक्षार्थं भ्रातुः कारागारगमनं वर्णितं वर्तते। तमसाच्छन्ना दीपावली इति कथायां भूस्वामिनां गृहेषु बंधकसेवकानां कीदृशी दुर्दशा भवति इति विषये चित्रणं द्रष्टुं शक्यते।

एवं प्रकारेण इमाः कथाः स्वपाठकान् पीडायाः नव्यधरातलेन परिचितान् कुर्वन्ति। प्रतिप्रसङ्गं जीवन्तपात्राणां सृष्टिः लेखकस्य सूक्ष्मदृष्ट्याः परिचायकोऽस्ति। एताश्च कथाः कथाकाराय महत्वपूर्णं स्थानं प्रदातुं समर्थाः प्रतीयन्ते। वस्तुतः चर्चितयोः उभयोरपि संग्रहयोः सर्वाः कथाः प्रभावशालिन्यः महत्वपूर्णाश्च सन्ति।

पात्राणां वैशिष्टयम् - यद्यपि लघुकथानां सीमितेऽवसरे पात्राणां चारित्रिकविशेषतानां विस्ताराय पर्याप्तः अवसरः न भवितुमर्हति तथापि कथाकारः अत्रत्यासु कथासु अनेकजीवन्तचरित्राणां मनोवैज्ञानिकं वैचारिकं च अन्तर्द्वन्द्वं प्रकटयन् भावविचारजन्य-सहजक्रिया-प्रतिक्रियादिव्यवहार-माध्यमेन आधुनिकसंस्कृतलघुकथा- क्षेत्रे अप्रतिमं स्थानमधिकरोति। आसु नैकाः कथाः मूलतः कमपि चरित्रविशेषं केन्द्रीकृत्य विरचिताः। क्वचित् ग्रामेषु नगरचत्वरेषु अटन्ती यौनशोषणपीडिता उन्मादिनी चम्पी, क्वचित् अन्धविश्वासेन व्यथितः सरलहृदयः अशुभमुखः, क्वचित् सर्वेषां परिहासस्य उपहासस्य च पात्रतां गतः व्यथितः टिन्-टिन्-वृद्धः क्वचिद् वामनत्वा-दुपेक्षितस्य उपहासितस्य पितृप्राणस्य मार्मिकी व्यथा, क्वचित् सुखदुःखैः असम्पृक्तः सांसारिकवृत्तिषु लिप्तोऽपि निर्लिप्तः सन्यासी हसुराबाबा, क्वचित् जीविकायै महानगरमागत्य असमाजिकतत्वैः व्यिथितः जगमोहनः, कुत्र च पद्यायां स्वबालकैः सह जीवनयापनाय विवशा तारा, क्वचित् पत्युः प्राणत्यागात् परं पुत्रं समाजे प्रतिष्ठापयितुं प्राणान्तके संघर्षे जीवन्ती विधवा स्त्री, क्वचित् विश्वासघातेकन स्वप्रेमिणा व्यथिता स्त्री (भ्रान्ततारका), क्वचित् स्वच्छन्दप्रकृतिवशात् सच्चरित्रायाः नार्याः जनदृष्टौ दुश्चरित्रता, क्वचित् कृपणदम्पत्योः कृपणतायाः चरमोत्कर्षः, क्वचित् प्राचीन-संस्कारैर्युक्ताऽपि यशसा तथा च सर्वाभिः आधुनिकमहत्वाकाङ्क्षा- भिर्युक्तस्य आधुनिकाचार्यस्य चारित्रिकं विश्लेषणम्, कुत्रचित् अभिशप्तस्यापि

अवहेलितस्य देवदासस्य चारित्रिकी उत्कृष्टता दर्शनीया वर्तते। एवं प्रायः सर्वासु कथासु पात्राणां चारित्रिकं सूक्ष्मातिसूक्ष्मं वैशिष्ट्यं द्रष्टुं शक्यते। कथाकारः विभिन्नघटना- संयोजनेन तानि वैशिष्ट्यानि स्पष्टीकरोति।

यथार्थ-संवादयोजना -

डॉ.बिश्वालस्य कथासु संवादाः सरलैः व्यावहारिकैः प्रभावशालिभिः लघुकायैर्वाक्यैः अभिव्यक्ताः दृश्यन्ते। आसु कथासु संवादानाम् अतिप्रमुखं वैशिष्ट्यमस्ति। तासां सार्थकत्वम् उद्देश्यपरकत्वं च। अपूर्वं पारिश्रमिकम् इति कथायां पारिश्रमिकस्य स्थाने पपुनं प्रताडयन्तः मद्यपायिनो युवकाः कथयन्ति - "अपि एतत् पर्याप्तम् उत इतोऽप्यधिकं खादिष्यसि पास्यसि च।" ततः " नहि नहि महाशयाः" आकण्ठं भुक्तं पीतं च मया। बहु उपकृतं भवद्भिः। महती भवतां सुजनता। ईश्वरः भवतां मङ्गलं विदधातु" इति भयपूर्णम् उत्तरं पपुनस्य। कथायाः अयम् अंशः द्वयोः भिन्नयोः वर्गयोः संस्कृतिं मनोदशां च स्पष्टं चित्रयति। कुत्रचिद् विश्वालमहोदयस्य संवादाः हासं सृजन्ति। यथा राजधानीयानेन राजधानीयात्रा इति कथायां शम्भूनाथ-भोलानाथयोः अज्ञानतापूर्णो व्यवहारः। रेलयात्रा तथा मे सहयात्रीति कथायाः सम्पूर्णः कलेवरः संवादाश्रितः अस्ति। कुत्रचित् संवादः व्यंग्यप्रधानो वर्तते। तद्यथा दीपशिखायाः संस्कृतशिक्षा इति कथायां दासगुप्तामहोदयः सव्यंग्यं पृच्छति - अद्य भवान् किमर्थम् इति। तदानीं मनसि उत्थितमुत्कटं विचारप्रवाहं रुद्ध्वा अध्यापकस्य संयतम् उत्तरं तस्य धैर्यशक्तिं गाम्भीर्यं विवेकं च प्रकाशयितुं शक्तमस्ति। कदाचिद् भवतः एतदीयं स्वरूपं द्रष्टुम्। कासुचित् कथासु संवादाः एव कथानां प्राणतत्त्वरूपाः सन्ति। यथा अभिशप्तो देवदासः इति कथायां संवादानाम् अतीव महत्वपूर्णं स्थानम् अस्ति। अस्यां कथायां लेखकस्य स्वधर्मपत्न्या सह वार्तालापः देवदासं प्रति समाजस्य धारणां द्योतयति। कथाकार- देवदासयोर्मध्ये प्रवर्तितेन वार्तालापेन देवदासस्य उदात्तविचाराणां तस्य चारित्रिकोत्कर्षस्य च ज्ञानं भवति। वस्तुतः उपर्युक्तानाम् एतासां कथानाम् अध्ययनेन सर्वप्रथमम् इदमेव ज्ञानं भवति यत् मूकभावः मुखरतापेक्षया बहुतरं प्रभावशालि भवति। यद्यपि डॉ.बिश्वालस्य कथायां संवादाः अत्यल्पमात्रायाम् आयन्ति तथापि ते संवादाः कथानाम् उद्देश्यानि स्पष्टीकर्तुं सर्वथा सहायकाः सिद्ध्यन्ति। कथागत-चरित्राणां कथोपकथनेषु अवसरानुकूलभावप्रवणताभिः सह सारगर्भिता, सम्प्रेषणीयता संक्षिप्तता, व्यञ्जकता च उपलभ्यन्ते।

देशः कालश्च -

ग्रामीणसभ्यतां परितः विचरन्तीषु आसु कथासु कुत्रचित् नागरसभ्यतामधिकृत्य आक्षेपोऽपि वर्तते। एतासां कथानां पृष्ठभूमिः सामाजिकी अस्ति। विविधवर्गीयपात्राणि क्षेत्रीयपरिवेशे आञ्चलिक-संस्कृत्यां यथार्थतायाः प्रकाशे च प्रस्तुतानि सन्ति। लेखकस्य कथासु लोकजीवनस्य विविधरागाणाम् अवतरणं संस्कृत-साहित्ये नवीन-परम्परायाः सूत्रपातं करोति। प्रायः सर्वाः कथाः समसामयिक-सामाजिक-समस्यासु केन्द्रिताः सन्ति। किन्तु कुत्रचित् अतीतवार्ताऽपि दृश्यते। अस्मिन्नवसरे उदाहरणार्थं "कदा आगमिष्यति दूरभाषः" इति कथा द्रष्टव्याऽस्ति। वस्तुतः साम्प्रतिके युगे दूरभाषः अत्याधुनिककालस्य अत्यावश्यकोपादानं वर्तते। एषस्तु इदानीम् अस्माकं दैनिकदिनचर्यायाः अभिन्नाङ्गः वर्तते। एकविंशशताब्देः प्रथमदशके एतद् वस्तु पुरातनं वर्तते। सनाथोऽपि अनाथः इति कथायामपि कुष्ठरोगस्य प्रसङ्गोऽपि पुरातनः प्रतिभाति। अस्य रोगस्य सफलचिकित्सायाः उद्भावनात्परं सत्स्वपि महत्सु प्रचार- प्रसारेषु किं समाजे कोऽपि इदानीमपि अनेन तथ्येन अपरिचितो- ऽस्ति। अपरं च सूक्ष्मनिरीक्षणोपरान्तं ज्ञायते यत् अद्यापि विश्वे नैके कुष्ठरूग्णाः सन्ति एव।

भाषा -

डा. बिश्वालस्य भाषा सर्वग्राह्या वर्तते। यतो हि तत्प्रयुक्तायां भाषायां सहजः प्रवाहः दृश्यते। अपरं च तत्र उत्कृष्टभावोत्कर्षिणी योग्यताऽप्यस्ति। अपरं च तत्र उत्तमः सरलतमः शब्दविन्यासो वर्तते। चर्चितकथाकारस्य शैली आडम्बरविहीना कृत्रिमविरहिता, जटिलता-विमुक्ता च वर्तते। अतः एताः कथाः पाठकेषु प्रियम् आदरणीयं च स्थानं प्राप्तुं सर्वथा समर्थाः सन्ति। साहित्यस्य भावगम्यतायां लोकप्रियता निहिताऽस्ति। कथासु श्रेष्ठसम्प्रेषणीयतायाः आधारः भावानुवर्तिनी भाषाऽस्ति। लेखकस्य भाषा व्याकरणभारेण अलसगतिका न भवति। स्वसारल्यतावशात् डॉ० बिश्वालस्य भाषा तीव्रभावानुगामिनी च वर्तते। कुत्रचित् लोकोक्तिभिः युक्ता भाषा रुचिकरम् आकर्षकं च स्वरूपं धारयित्वा पाठकानां मानसपटले चिरस्थायिनं प्रभावं त्यजति। क्लिष्टताविहीना अलङ्काररहिता, क्लिष्टसन्धिसमासविमुक्ता च लेखकस्य भाषा वस्तुतः लोकव्यवहाराय अनकूला भाषा प्रतीयते। एतादृश्याः सरलभाषायाः प्रयोगे

प्रमुखं कारणमिदमेव भवेत् यदद्यतने काले साहित्ये सरलतमायाः सहजबोधगम्यायाः प्रवाहयुक्तायाः च भाषायाः प्रयोगार्थं प्रश्रयो दीयते। वस्तुतः यस्य कस्यापि साहित्यकारस्य भाषा तस्य परिवेशस्य देशस्य कालस्य च महत्वपूर्णः अङ्गः अस्ति।

डॉ० बिश्वालस्य कथासु निर्धनः बुद्धिजीवी वर्गः अभावेन सामाजिकविषमतया च विखण्डितः सन् चित्रितो वर्तते। चर्चितासु कथासु विसंगतीनां समस्यानां विविधपरिस्थितीनां मनोवैज्ञानिक- प्रभावानां परस्परव्यवहाराणां च सूक्ष्मानि मार्मिकाणि दृश्याणि सन्ति। डॉ. बिश्वालस्य कथा-संग्रहद्वये प्रकाशिता सर्वाः कथाः स्वलक्ष्यानि प्राप्तुं पूर्णरूपेण सफलाः सिद्ध्यन्ति।

****

राधाकृष्णनचरितचम्पूः

(सर्वपल्लिराधाकृष्णनस्य जीवनं दर्शनं च)*

राधावल्लभः

आलोककरं नृणां दुरितं दूरीकरोति यत् सकलम्।
राधाकृष्णनचरितं वक्ष्ये स्वात्मसुखलाभकरम्।।

सितम्बरे मासस्य पञ्चमदिवसे १८८८ क्रैस्तवाब्दे चेन्नइनगर्याः तिरपतनिग्रामे राधाकृष्णनो जनिमलभत। तस्य पूर्वजाः अष्टादशतमे शतके सर्वपल्लीति ग्रामात् इह समाजग्मुः। अतस्ते सर्वपल्लीति उपनाम धारयन्ति स्म।

सर्वं विश्वं पल्ली समजनि चैका यतश्च तस्य पुरः।
अन्वर्था संज्ञाऽभूत् श्रीसर्वपल्लिरिति प्रथिता।।

पिता तस्य वीरस्वामी माता च सीताम्मा। राधाकृष्णनमहाशयो न सितम्बरमासस्य पञ्चमं दिनं मम जन्मदिनमपितु विंशतितममिति विश्वसिति स्म। तथैव न वीरस्वामी वस्तुतो मम पिता इत्यपि शङ्कैव तदीये मनसि अभूत्। शङ्काया आधारभूतम् आसीत् तस्मिन् तिरुपतनिग्रामे तस्य मातरं सीताम्मामधिकृत्य प्रसृतं कौलीनम्। सा स्वभ्रातुररनुरोधेन परिवारस्य सङ्कटनिवारणाय ग्रामाधिकृता संसर्गं कृतवतीति जना ऊचुः। राधाकृष्णनस्य चतुर्णामपि भ्रातॄणां भगिन्याश्च वर्णेन आकृत्या वा भेदः कौलीनगतां किवदन्तीं प्रगुणीचकार। अतश्च राधाकृष्णनः मातरि सदा सन्दिहानः पितरि वीरस्वामिनि च श्रद्दधानोऽभूत्। तथापि जारजोऽहमिति मत्वा न कदापि हीनभावना कुण्ठा वा काऽपि तदीये चेतसि पदमकरोत्,

---

*अस्मिन् प्रबन्धे सङ्कलितानि सर्वपल्लिश्रीराधाकृष्णनस्य जीवनविषयकाणि तथ्यानि **"राधाकृष्णन् ए बायोग्राफी"** (आक्सफोर्ड युनिवर्सिटी प्रेस, १९७२) इति सर्वपल्लिगोपालस्य पुस्तकाद् गृहीतानि। व्यञ्जनान्तस्य स्वरान्तत्वम्, दीर्घस्वरान्त-पुल्लिङ्गस्य ह्रस्वत्वं इति अभिवनसंस्कृतव्याकरणनियमोऽनुसृतः राधाकृष्णन्-नेहरू-नन्दादिशब्दानां संस्कृतीकरणे।

न च पितुर्भ्रातॄणां भगिन्या वा भरणपोषणादिभ्यः कदाप्यसौ विरक्तः। स्वजन्मविषयकं प्रवादं तथ्यं वा न्यक्कृत्य प्रमाणीचकार आत्मनः निरुपमतां प्रतिभया ज्ञानेन अध्यवसायेन च। युक्तमेवेतद्, यतो हि

जन्मना जायते जन्तुः पावनो नैव जातुचित्।
शुचितां प्राप्नुते स्वस्य चरित्रेणाथ कर्मणा।।
मातृकुक्षौ यथा यस्य सम्पर्काद् बीजमागतम्।
सन्ततेः श्रेष्ठतायास्तन्न जातु ज्ञापकं भवेत्।।
मातुश्चरित्रदोषेण हीयते नैव सन्ततिः।
महाभारतकारोऽपि व्यासो जातो न किं तथा।।

पिता वीरस्वामी ग्रामस्य भूमिपतेः कनिष्ठः शुल्काधिकारी बभूव। स्वल्पं वेतनम्, तेन कुटुम्बपालने काठिन्यम्। चतुर्वर्षीयो राधाकृष्णनः ग्रामस्य प्राथमिकपाठशालायां प्रवेशितः। तत्रासौ चतुर्वर्षाणि आङ्ग्लीं, तेलुगुभाषां गणितमितिहासं चाध्यैष्ट। अनन्तरं १८९६तमे क्रैस्तवाब्दे शर्मण्यदेशीयैः मिशनरिभिश्चालिते विद्यालये स प्रवेशं गमितः। तत्र बाइबिलस्याध्ययनं कर्तव्यमभूत्। पितरौ सनातनधर्मे आस्थाशीलौ । तेन स्वधर्मनिष्ठाया संस्कारस्तदीये चेतसि क्वचित् रूढः। विद्यालये च विहितः क्रैस्तवीयधर्मस्य वैशिष्ट्यावगमः परस्तादुभयोः धर्मयोः तुलनात्मकं तारतम्यं ज्ञातुं तं प्रैरयत्। तथापि मेधाविनोऽप्यस्य न किमपि वैलक्षण्यं प्रतिभाप्रकर्षो वा बाल्ये छात्रावस्थायां वा दृश्यते एतदीये चरिते। परीक्षायां तु सदैव उत्तमाङ्कानर्जयति स्मासौ। तेन छात्रवृत्तिमपि लेभे। विद्यालयेऽनुपस्थितोऽसौ क्वचिद् ग्रामाद् ग्रामं पर्यटति, छात्रवृत्तिराशिं च आहाराय व्ययीकरोति। एतादृशीमित्वरतां विज्ञाय पिता चतुर्वर्षानन्तरमिमं अपसार्य तस्मात् विद्यालयात् वेल्लोरनगरस्थे विद्यालये प्रवेशयति स्म। तत्र राधाकृष्णनस्यैव पितृव्यः शिक्षकः। इह समेत्य जजागार तदीया अध्ययनवृत्तिः। वर्षद्वयानन्तरमसौ मैट्रिकुलेशनपरीक्षां समुत्तीर्णः विश्वविद्यालयीयाध्ययनाय छात्रवृत्तिं प्राप। बाइबिलस्य भूयानंशः अस्य कण्ठगत इति शास्त्रप्रावीण्यार्थमयं विशिष्टं प्रमाणपत्रं लेभे। परन्तु विवेकानन्दस्य व्याख्यानैर्वीरसावरकरस्य भारतीयस्वतन्त्रतासङ्ग्रामविषयकेन पुस्तकेन स समधिकतरमासीत् प्रभावितः। शनैः शनैर्ववृधे तदीया ज्ञानतृष्णा, आत्मोन्मुखी चिन्तनप्रवृत्तिश्च। विद्यार्थिजीवने अत्यन्तं निःस्पृहः, सर्वथा निरामिषभोजी। मद्यं न कदापि अस्पृशत्; न वा व्यदधात् जात्वपि कुत्रचिद्

धूमपानम्। छात्रवृत्या प्राप्तं धनराशिं पुस्तकानां क्रयाय अतिसात्त्विकाहाराय विद्यालयशुल्कदाने च विनियुज्य ततोऽवशिष्टं सर्वं द्रव्यं दरिद्रेभ्यः सहाध्यायिभ्यो ददौ। अतः सहाध्यायिषु स अतीव लोकप्रियोऽभूत्।

१९०३तमस्य क्रैस्तवाब्दस्य मई मासे षोडशवर्षीयोऽयं दशवर्शदेशीयया दूरसम्बन्धेन भागिनेयाया शिवकामु इत्यभिधेयया कन्यया विवाहितः। वर्षत्रयानन्तरं शिवकामुः पत्युर्गृहमागता। सुखमयमासीत् राधाकृष्णनस्य दाम्पत्यम्। शिवकामुः भक्तिमती पत्नी। राधाकृष्णनश्च अलङ्कारप्रियां तां परिलक्ष्य ऋणमपि स्वीकृत्य तस्याः कृते अलङ्कारानानिनाय। परस्परमवर्धत तयोः प्रीतिः। १९०८तमे क्रैस्तवाब्दे तयोरेका कन्या जाता। अनन्तरं च षट् अपत्यानि। यद्यपि परस्तात् राधाकृष्णनो विद्याव्यासङ्गे शैक्षणिककार्येषु देशसेवायां च नितरां व्यापृतो न भार्यायाः कृते समयं तथा प्राप। परन्तु शिवकामुः सदैव सन्तुष्टा भर्तारमेव सर्वथा सर्वस्वममन्यत। निर्व्यूढश्च तयाऽऽजीवनं पतिप्राणाया पतिदेवताया भारतीयगृहिण्या आदर्शः।

१९०४तमे क्रैस्तवाब्दे राधाकृष्णनेन गणितं मनोविज्ञानं इतिहासं चेति विषयानादाय कलास्नातकप्रथमवर्षपरीक्षोत्तीर्णा, क्रिश्चियन-महाविद्यास्य छात्रवृत्तिश्चावाप्ता। कश्चन भ्रातृव्यः दर्शनविषयं स्वीकृत्य स्नातकपरीक्षायां सद्य उत्तीर्णो दर्शनस्य पुस्तकान्यस्मै दातुमियेषेति स पुस्तकानां क्रयार्थं व्ययो मा भूदिति दर्शनविषयमेव स्वीकृतवान्। पश्चाच्च स्वयमेव न केवलं दर्शनशास्त्रनदीष्णोऽपितु दार्शनिक ऋषिर्वेति सर्वत्र सुपूजितोऽयं काचन शक्तिरेव दर्शनशास्त्रानुशीलनाय प्रेरणां दत्वा तदनुकूलं सर्वं व्यवस्थापितवती मम जीवन इति मुहुर्मुहुः प्रत्येति स्म।

१९०६तमे क्रैस्तवाब्दे मानदं स्नातकोपाधिमयं प्रथमश्रेण्यां प्राप। दर्शनविषयेऽयं सर्वोत्तमश्छात्रो घोषितः। अनन्तरं विधिविषयं पठितुकामः पितुः साधनहीनतामनुभूय पञ्चविंशतिरूप्यकाणि प्रतिमासं छात्रवृत्तिं लभमानो दर्शनशास्त्रविषय एव स्नातकोत्तरकक्षायां प्रवेशं जग्राह, परिवारस्य भरणाय नैजीं शिक्षणवृत्तिमपि च चकार। क्रिश्चियन-महाविद्यालये प्राध्यापकानां भारतीयदर्शनं श्रीमद्भगवद्- गीतादिग्रन्थां-श्चाधिकृत्य विहिता अनर्गला वृथाऽऽक्षेपा एनं प्रतिक्रियास्वरूपं भारतीयदर्शनस्य शास्त्राणां च गहनानुशीलनाय प्रेरयामासुः। तदानीं पाठ्यक्रमे भारतीयं दर्शनं न कुत्रापि निर्धारितम्, तथापि

स्नातकोत्तरकक्षायां लघुशोधप्रबन्धायायं साग्रहं सानुबन्धं वेदान्तदर्शनस्य जीवनादर्शमाश्रित्य लघुशोधप्रबन्धं पूरयामास। यद्यपि शोधप्रबन्धेनानेनास्य प्राध्यापका अतितरामावर्जितास्तथापि पाश्चात्त्यदर्शनं विहाय भारतीय-दर्शनेऽस्य निर्बन्धो नारोचत सर्वेभ्यः क्रिश्चियनमहाविद्यालयाधिकारिभ्यः, अत एव असाधारणशेमुषीसम्पन्नः आङ्ग्लभाषायां विस्मयावहमधिकारं धारयन्नपि राधाकृष्णनः स्नातकोत्तरकक्षायां द्वितीयक्षेण्यां स्थापितः। तस्य लघुशोधप्रबन्धस्य गुणवत्तां विदित्वा विज्ञानां विदुषां प्रयासेन तस्मिन्नेव कालेऽस्य प्रकाशनमजायत। प्रबन्धेऽस्मिन्ननेन ससाहसं क्रिस्तोरलौकिकता निराकृता, भारतीयानामुदात्तचिन्तनं च प्रतिष्ठापितम्। भारतीयानामधोगतेः कारणं न एतद्देशस्य चिन्तकानां विचारेषु न्यूनताऽपितु व्यवहारे तैः प्रतिपादितानामादर्शानां न प्रतिफलनमजायत इत्येव कारणम्।

१९०९तमे क्रैस्वाब्देऽनेन स्नातकोत्तरकक्षा समुत्तीर्णा। अस्य प्रज्ञां मेधां योग्यतां च वीक्ष्य अध्यापका एनं ऑक्सफोर्डविश्वविद्यालये शोधार्थं गमनाय प्रेरयामासुः। सत्यपि आङ्ग्लदेशे शोधवृत्तिलाभे, न परिवारस्य कृते वित्तसाहाय्यं कर्तुं शक्ष्यामि यदि गच्छामि विदेशमिति विजानन् राधाकृष्णनो गमनस्य वार्तां मनसो निस्सारयामास। अवदच्च तेभ्यः शुभचिन्तकेभ्यः -- "आक्सफोर्डादिषु अहं व्याख्यानदानाय एव गमिष्यामि, किं मे तत्र गत्वा अध्ययनेन यदि स्वदेशे स्थित्वैव सर्वं ज्ञानमवाप्तुं शक्यते?" अथायं प्रेसिडेंसीमहाविद्यायालये दर्शनाध्यापनाय नियुक्तः। षष्टिरूप्यकाणि प्रतिमासं वेतनमासीत्। परन्तु आगामिनि वर्षे एव अर्धं वेतनं विधाय स प्रशिक्षणार्थं शिक्षकप्रशिक्षणमहाविद्याये नियोजितः। एतावता वेतनेन कटुम्बपालनेऽक्षमोऽसौ विश्वविद्यालयात् प्राप्तानि पदकानि व्यक्रीणात्, ऋणं च बहु अग्रहणात्। ऋणनिर्यातनेऽसमर्थश्च न्यायालयेऽपि अवमाननां सेहे। अस्मिन्नेव काले दारिद्र्यव्यपोहनाय "मनोविज्ञानस्य मूल तत्त्वानि" इति पुस्तकमनेन प्रणीतम्, यच्च आक्सफोर्डयुनिवर्सिटीप्रेसेति प्रकाशनसंस्थानेन प्रकाशितम्। अर्थकार्श्यपीडितो राधाकृष्णनः अस्य पुस्तकस्य सर्वमधिकारजातं केवलं पञ्चशतैः रूप्यकैर्व्यक्रीणात्।

प्रशिक्षणं समाप्य १९११क्रै०वर्षात् पञ्चवर्षाणि असौ प्रेसिडेंसीमहाविद्यालयेऽध्यापनं चकार। मनोविज्ञान-पाश्चात्त्यदर्शनाद्य-ध्यापनेऽस्य वैचक्षण्यं वैलक्षण्यं तथा विश्रुतमभूद् यदितर-महाविद्यालयेभ्यश्छात्रा अहमहमिकया अस्य कक्षासूपस्थानार

प्रेसिडेंसिमहालिद्यालयमाजग्मुः। न केवलमेतदेव, क्रिश्चियनमहाविद्यालये अस्य गुरुः श्रीहॉगमहोदयः स्वयमेव छात्रान् प्रेरयामास राधाकृष्णनस्य व्याख्यानानां श्रवणाय गन्तुम्।

अहमहमिकयाऽऽजग्मुः पातुं वागममृतमस्य विशदं ते।
वत्सा यथा क्षुधार्ता गावं सत्त्वरमहो प्रयान्ति।।

दारिद्र्यकर्शितोऽप्यसौ नितरां सुरुचिपूर्णया वेषभूषया मण्डितस्तदानीं न केवलं वक्तृत्वकलया पाण्डित्यप्रकर्षेण प्रतिपादनशैल्या वा अपितु प्रभामण्डलोद्भासिवदनेन चित्ताकर्षिण्या चाकृत्या अपि समेषां चेतांसि जहार।

कान्तो युवा कलितचारुसुवेषरम्यः
दान्तो दयालुरपि दीनजनेषु नित्यम्।
शान्तो मुनिर्मृदुमनाः करुणावंसो
श्रान्तो कदापि न च कर्मभिरेष साधुः।।

अस्मिन्नेव प्रेसिडेंसिमहाविद्यालयस्य पञ्वर्षावधिसेवाकालेऽनेन संस्कृतभाषायाः पारम्परिकपण्डितेभ्योऽध्ययनं विधाय उपनिषदां श्रीमद्भगवद्गीतायाश्च साधु अभ्यासोऽपि विहितः। अनुशीलिताश्चैतेषां टीका अपि। अपरं च बौद्धजैनदर्शनग्रन्थानामपि अनुशीलनं सम्पादितम्। १९११तमे क्रैस्तवाब्दे "इण्टरनेशनल जर्नल ऑफ एथिक्स" इति शोधपत्रिकायामस्य "श्रीमद्भगवद्गीता काण्टस्य दर्शनं चे"ति निबन्धः प्रकाशमाययौ। अत्र काण्टस्य दर्शनापेक्षया कथं श्रीमद्भगवद्गीता व्यक्तेर्मुक्तिकामनायाः कृते समधिकतरं ददात्यवकाशमति तेन प्रत्यपादि।

भारतीयः स्वाधीनतासङ्ग्रामस्तस्य मनः आकर्षत्। लाला-लाजपतरायस्य बलिदानेनासावभिभूतः, तिलकस्य व्याख्यानानि भावयामास। १९०८तमे क्रैस्तवाब्दे मद्रासनगरे समायोजिते काङ्ग्रेसाधिवेशने उपस्थितः अशृणोत् तत्र मदनमोहनमालवीय-रासविहारिबोस-गोपालकृष्णगोखले-सुरेन्द्रनाथवन्द्योपाध्यायादीनां भाषणानि। परन्तु तदानीं मद्रासपुर्यां वसन्ती श्रीमती एनीबीसेण्टमहोदया भारतीयदर्शनस्य परम्पराणां च समाशंसया समधिकतरमरमयत्तदीयं मानसम्। अनया च महोदयया न केवलं तदानीं राधाकृष्णनस्य लेखाः पठिताः अपितु स्वेलखने तेषामुल्लेखोऽपि विहित इति एतस्या उदारतया सहृदयतया च स भृशमभिभूतः।

अस्मिन् काले प्रचण्डलेखनीदण्डचालितैः प्रखरकर्कशैः तर्ककशाघातैरयमताडयत् ब्रैटिशीयामहम्मन्यतां योरोपीयं सभ्यतावादं च। प्राशंसच्च महात्मनो गान्धिनो सत्याग्रहसंरम्भम्। महात्मना गान्धिनाऽपि मद्रासनगर एव एकदाऽस्य संवादोऽजायत। महात्मा नास्य तर्काणां समाधानं कर्तुं प्राभवत्, न चायं तस्य न गोदुग्धं पेयम्, न आधुनिकी चिकित्सा अपेक्ष्येत्याद्याभिः धारणाभिः प्रभावितः। परन्तु लोकमान्य-तिलकेनास्य पंत्राचारः फलीभूतः। तिलकस्तदानीं माण्डलेकारागारमध्यास्ते स्म। स राधाकृष्णनस्य गीतामधिकृत्य प्रकाशितं लेखमधीत्य प्राशंसत् तदीयं प्रतिपादनम्। तिलकस्तिलकीचकार तदुपज्ञं निबन्धं श्रीमद्-भगवद्गीतामधिकृत्य विरचिते स्वप्रबन्धे तदुल्लेखं विधाय। अभिभूतश्च राधाकृष्णनस्तस्यानुग्रहेण। १९१२तमे क्रैस्तवाब्दे राधाकृष्णनः कवीन्द्रस्य रवीन्द्रनाथस्य साहित्यमनुशीलयन् तत्र न क्रिस्तुधर्मस्यापितु वेदान्तस्य छाया लसतीति साधु प्रत्यपादयत्। अनन्तरं "क्वेष्ट"-पत्रिकायां १९१७तमे क्रैस्तवाब्दे प्रकाशितौ रवीन्द्रविषयकौ द्वावस्य लेखौ। तौ च स्वयं रवीन्द्रनाथोऽपि पपाठ, लिलेख च राधाकृष्णनाय पत्रम् अत्यन्त-मभिभूतोऽस्य प्रतिपादनेन समुचितया टीकया च।

अत्रान्तरे मासत्रयमान्ध्रप्रदेशस्थेऽनन्तपुरनगरे स्थानान्तरितः पुनरपि मद्रासनगर एव प्रेसिडेंसिमहाविद्यालयमानीतः राधाकृष्णनः १९१६तमं क्रैस्तवाब्दं यावत् तत्र सेवामकरोत्। १९१७तमे क्रैस्तवाब्दे-ऽयमाचार्यत्वेन पदोन्नतिं नीतः परन्तु आन्ध्रप्रदेशस्यैव राजामुन्द्रीनगरं स्थानान्तरितः। अनन्तरं मैसूरनगरे प्रतिष्ठां प्राप।

१९२०तमेऽब्देऽस्य "दि रीन आफ रिलीजन इन कंटेपरेरी फिलासफी" (समकालिके दर्शने धर्मस्य साम्राज्यम्) इत्याख्यः ग्रन्थः प्रकाशितः। अस्मिन् ग्रन्थे प्रायः समेषामपि प्रमुखानां समकालिकानां दार्शनिकसम्प्रदायानां तत्त्वालोचनं प्रस्तूय उपनिषदां तत्त्वचिन्तनेन न कोऽपि तुलामापोहतीति सप्रमाणं साधितवान् राधाकृष्णनः। ग्रन्थस्यास्य मुद्रिताः मातृका अनेन नैकेभ्यो बर्ट्रेण्डरसलप्रभृतिभ्यो दिग्गजेभ्यो दार्शनिकेभ्यो तेषामभिमतपरिज्ञानाय प्रेषिताः, सर्वैश्च तैर्मूर्धन्यैर्विचारकैः स्वस्वमतानि तस्मै प्रेषितानि। ग्रन्थोऽयं इङ्ग्लैण्डदेशे अमेरिकादेशे च नैकेषु विश्वविद्यावलयेषु दर्शनशास्त्रविषये पाठ्यत्वेन निर्धारितः। अस्मिन्नेव काले अनेन "दि क्राइम आफ लीला" (लीलाया अपराधः) इति नाम्ना

उपन्यास एको व्यरचि। अभवंश्चास्य तदानीं हिरियन्ना-के०टी०शाह-वाडिया-सदृशा विद्वांसः सखायः। तैः सार्धं क्वचिद् प्रातःभ्रमणार्थं याति, क्वचिच्च शास्त्रचर्चां कुरुते। अस्य प्रसन्नमधुरोदारया गिरा चित्ताकर्षिणी चाकृतिर्मनांसि जहार ललनानाम्। तास्वपि काभिश्चनाघटत अस्य सख्यम्। परन्तु ताः मेधया प्रज्ञया वा सर्वथा सामान्या एव आसन्, मनोविनोदमात्रं ताभिरस्य सम्पर्कः।

भ्रमरो भ्रामं भ्रामं कलिकां कलिकां स याति रमणाय।
भ्रमरं ताः भ्रमरहितं कलिकाः वृणते स किं कुरुताम्?।।

प्रखरा अस्य वाणी पाश्चात्त्यानां दम्भं प्राहरत्। तदानीमेव अमृतसरे सञ्जातो जलियावालोद्यानकाण्डः। मर्माहतो राधाकृष्णनः— अपि सेवां परित्यज्य स्वाधीनतासङ्ग्राममहार्णवं गाह इति विकल्पयायामास। परन्तु परिवारस्य दायित्वममुमरुणत्। इयमपि मे देशसेवैव यत् विचाराणां स्वातन्त्र्यं सञ्चारयामीति मत्वा मुहुरपि ज्ञानयज्ञे स आत्मानं जुहाव।

सर्वथा दर्शनस्य निस्सीमे खे राजहंसायमानस्यापि न नासीत् पार्थिवे जगति व्यवहारारेष्वस्य रुचिः। कुटुम्बभरणाय सदैवायं तत्परोऽभूत्। प्रकाशितानां प्रकाश्यामाणानां ग्रन्थानामायविषये प्रकाशकेभ्यो जिज्ञासते स्म सदा जागरूकः। अनुसन्धानपत्रिकासु स्वलेखानां प्रकाशनाय तत्परोऽभूत्। एतेन अहरहः प्रससार तदीया कीर्तिः शिक्षाक्षेत्रे। युक्तमेवायं १९२०तमवर्षस्य नवम्बरे मासि कलिकाताविश्वविद्यालये जॉर्जपञ्चमपीठे आचार्यत्वे नियुक्तिभाक् सञ्जातः। १९२१तमवर्षस्य फरवरीमासे चायं मैसूरनगरं परित्यज्य कालिकातां प्रति प्रस्थितः। प्रस्थानकाले यद्यपि मा भूत् मम सौप्रस्थानिकस्यकृते कोऽपि संरम्भ इति आग्रहशीलस्यापि अस्य सौप्रस्थानिके विश्वविद्यालयस्य शतशः प्राध्यापकाः सहस्रशश्च विद्यार्थिनोऽहमहमिकया सम्मिलिताः। महतः सम्मर्दादवस्थानकगामिनो मार्गा द्वित्रिहोरापर्यन्तं गमनागमनाय निरुद्धा इवाभूवन्। गृहात् अवस्थानकं यावत् सहस्रशश्छात्रा परिवार्य महतीं विदाययात्रां कलयामासुः, अस्य रथस्य अश्वांश्च दूरीकृत्य स्वयमेव ते अस्य गन्त्र्यां वाहा बभूवुः। अवस्थानकस्य कुट्टिमं पुष्पैरास्तृतम्। वाष्पगन्त्र्या यस्मिन् यानकक्षे अस्य आरक्षणं, तत् तु पाटलपुष्पैः पाटलितम्। विदायदायिनां महतः सम्मर्दात् अत्यन्तं विलम्बेन प्रस्थिता तद्दिने वाष्पगन्त्री।

जॉर्जपञ्चमपीठमधिष्ठितस्यास्य मासिकं वेतनं अस्य प्रतिष्ठेव द्विगुणितं सहस्ररूप्यात्मकं सञ्जातम्। तथापि अबङ्गीयानां कृते विश्वविद्यालयस्य पिच्छिला राजनीतिः कण्टकान् प्रसारयामास। कालिकाताविश्वविद्यालये केवलं सी०वी-रमणमहोदयेन मैत्रीसम्बन्धो घटितो राधाकृष्णनस्य। तस्य भ्रातरः भगिनी विधवा च माता कदाचित् कालिकातामागत्य न्यवसन्, अन्यथा स तेभ्यो वित्तराशिं प्रेषयामास। कालिकातामागत्यैव भारतीयदर्शनमधिकृत्य विरचितस्य बृहद्ग्रन्थस्य पूर्तिरनेन विहिता, यस्य प्रथमो भागः १९२३तमे क्रैस्तवाब्दे प्रकाशितः। अनिशमधीयानः विद्यामेव उपासमानः अनिद्रारोगेणायं ग्रसितः।

भारतीयं दर्शनं नाम राधाकृष्णनस्य अक्षयकीर्तेः स्तम्भः। एतं ग्रन्थं पठित्वा टी०एस०इलियड्महोदयोऽपि भारतीयमनीषिणां चिन्तनेन मेधया च चाभिभूतः पाश्चात्त्यान् तत्सम्मुखं बालानिव कलयामास। अस्मिन्नेव काले गान्धिनं रवीन्द्रनाथं चाधिकृत्यानेन छद्मनाम्ना निबन्धः कश्चन प्रकाशितः, यत्र गान्धी अध्यात्मदृशा विश्वस्मिन्नपि संसारे मूर्धन्यः प्रतिपादितः, सत्याग्रहान्दोलनस्य आध्यात्मिकी भूमिरपि अनेन सम्यगाविष्कृता। गान्धिनो विचारदर्शनं कर्म चाधिकृत्य तदानीं लिखिताः लेखा मद्रासनगरतः १९२२तम क्रैस्तवाब्दे "गान्धी एण्ड एङ्ग्लिकन बिशप्स" इति शीर्षकेण पुस्तकाकारं प्रकाशिताः। क्रिस्तुमतावलम्बिनामपि द्वैधग्रस्तं व्यवहारमसौ उद्घाटयन् भारतीयतया भावितं क्रिस्तुधर्मं प्रत्यपादयत्। अस्मिन्नेव काले अनेन अखिलभारतीया दर्शनपरिषत् स्थापिता, यस्या प्रथममधिवेशनं कालिकातायां स्वयमायोजितम्, रवीन्द्रनाथश्च तत्राध्यक्षत्वे मनोनीतः।

हिन्दूधर्मो न कश्चित् पूर्वनिश्चितो विचारो, न वा सम्प्रदायोऽपितु विकसनशीला जीवनपद्धतिरिति तदीयामतिरासीत्। ऑक्सफोर्ड-विश्वविद्यालये हिन्दूजीवनदृष्टिमधिकृत्य अनेन चत्वारि व्याख्यानानि प्रदत्तानि। हिन्दूजीवनदृष्टेरेतादृशीं व्याख्यां श्रावं श्रावं पाश्चात्त्याः श्रोतारोऽपि वयं हिन्दव इति आत्मानं कलयामासुः। एतानि व्याख्यानानि लण्डननगरतः १९२७तमे क्रैस्तवाब्दे पुस्तकाकारं प्रकाशितानि। पुस्तकमिदं जवाहरलालेन नेहरुणा कारागारे द्विः पठितम्। सोऽपि सङ्कीर्णाभ्यो रूढिभ्यः कर्मकाण्डेभ्यो विनिर्मुक्त एतादृशं व्यापकं स्वरूपं हिन्दूधर्मस्य पुस्तकादवगत्य नितरामावर्जितः, अन्येभ्यश्च मित्रेभ्यः पुस्तकामेदं संस्तौति स्म। ऑक्सफोर्डयात्रायां बहवः प्रथितास्तदानीन्तना दार्शनिका अस्य

परिचयं प्राप्य प्रमुदिताः। तत्रैव आशुतोषमुखोपाध्यायसुतः श्यामाप्रसादो वयसा कनीयानपि तत्र विधिमधीयानो राधाकृष्णनस्य स्नेहभाजनं बभूव।

१९२६तमक्रैस्तवाब्दस्य नवम्बरमासे राधाकृष्णनः आङ्ग्लदेशात् प्रत्यागतः। तस्मिन्नेव काले कालिकाताविश्वविद्यालये समजनि महत्परिवर्तनम्। आशुतोषमुखोपाध्यायस्य उत्ताराधिकारित्वेन बिहारप्रदेशात् प्रथितः इतिहासवित् श्रीयदुनाथसरकारः कुलपतित्वेन नियोजितः। बङ्गदेशीयेभ्यः प्राध्यापकेभ्यः नेयं नियुक्तिररोचत। राधाकृष्णनस्तु सर्वत्र प्राध्यापकेषु छात्रेषु च अत्यन्तं लोकप्रियः, समेषां समं प्रीतिपात्रम्। सरकारस्तु इमे आशुतोषमुखोपाध्यायपक्षीया मम शत्रव इति कलयन् तस्य कृते व्यर्थमेव द्विषा बाधितोऽभूत्।

ईश्वरः सर्वभूतेषु न केवलं तिष्ठति अपितु बोभूयत इति सुदृढा तदानीं तस्य मतिरभवत्। १९२८तमेऽब्दे कल्कीति शीर्षकेण तेन इदं दर्शनं पुस्तकाकारं तेने।

ईश्वरः सर्वभूतेषु न केवलं विराजते।
बोभूयते समुन्मीलन्नसौ तत्र सदा ध्रुवम्।।
अत एव समग्राया सृष्टेः केन्द्रत्वमागतः।
मनुष्यः कुरुते स्वस्य विकासमनिशं चितेः।।

वस्तुतो न केवलं राजनीतिक्षेत्रे, वैचारिकक्षेत्रेऽपि यन्महदान्दोलनं तदानीं भारतदेशे प्रवर्तितम्, तस्मिन् महती भूमिका आसीत् राधाकृष्णनस्य। एतादृशैस्तदीयैः ग्रन्थरत्नैरुद्भासितचित्तो जवाहरलाल-स्तदानीमेव काङ्ग्रेसाधिवेशन उपस्थानाय कालिकातां प्राप्तः तेन सङ्गत्य नितरां मुमोद। राधाकृष्णनोऽपि शासनाधिकारिणां विश्वविद्यालयाधिकारिणां कोपं तृणाय मन्यमानः नेहरुणा सह काङ्ग्रेसाधिवेशने उपस्थितः। नेहरुणाऽनुरुद्धोऽयं भारतस्यात्मेति (The Soul of India) शीर्षकेण ग्रन्थस्यैकस्य सम्पादनमूरीकृतवान्। अस्मिन्नेव वर्षे (१९२८तमे) ऑक्सफोर्ड-विश्वविद्यालयोऽस्मै पञ्चवर्षावधि अतिथ्याचार्यपदं प्रस्तावयति स्म। कालिकत्रयां तेषु तेषु कार्येषु व्यापृतोऽयं कथञ्चित् एकवर्षावधिकालाय तत्पदं स्वीचकार।

१९२९तमे वर्षे ऑक्सपोर्डमुपागयोऽयम्। मैनचेष्टरे च लण्डने च आङ्ग्लदेशीयानां मानसेषु अस्य व्याख्यानानां ऊर्मयः पूरोत्पीडं रचयाम्बभूवुः। "हिन्दू व्यू ऑफ लाइफ" इति शीर्षकमादाय धर्ममधिकृत्य स

इङ्गलैण्डदेशे व्याख्यानानि विहितवान्। तर्कस्तु न त्यक्तः, परन्तु स आस्थां पोपुषीति। ईश्वरस्योपस्थितिं स प्रत्यक्षामनुभवन्निव भाषते स्म। ऋषिरिव समववतीर्य धरां स्वानुभूतिं प्रकटयतीति तदानीं श्रोतारोऽनुभवन्ति स्म। एतानि व्याख्यानानि "एन आइडियलिष्ट व्यू ऑफ लाइफ" इति नाम्ना पुस्तकरूपेण प्रकाशितानि समधिकतरमान्दोलयामासुः पाश्चात्त्यानां चेतनाम्। सी०ई०एम० जोड महाशयः राधाकृष्णनस्य विचारदर्शनमाश्रित्य पुस्तकमेकं प्रकाशयामास तदानीम्।

इङ्गलैण्डप्रवासकाल एव बहूनां भारतीयानामपि सम्पर्केऽयं समागतः। तत्रैव भारतीयच्छात्राणां दलद्वयं तत्र च विजृम्भते स्म सङ्घर्षः। राधाकृष्णनस्य माध्यस्थ्येन स विनिवारितः, सौहार्द्रं च तत्र स्थापितम्। वी०के०कृष्णमेननस्तदानीं आङ्गलदेश एव प्रवसति स्म, सोऽपि एनेन सङ्गत्याप्रीणात्।

परन्तु केचन पण्डितम्मन्याः प्राध्यापकाः राधाकृष्णनस्य दिग्दिगन्तविश्रुतां कीर्तिं न सेहिरे। सुरेन्द्रनाथदासगुप्त एतेषां प्रतिद्वन्द्विनां नेतृत्वं कुर्वाणः राधाकृष्णनस्यैव शिष्यभूतं तत्प्रदत्तेभ्यो व्याख्यानेभ्यो वाक्यान्यादाय विहितस्वप्रबन्धपरिपूर्तिं जदुनाथसिन्हेति युवानं प्रैरयत्। राधाकृष्णनेन मम शोधप्रबन्धात् केचनांशाश्चोरिता भारतीयदर्शनविषयके स्वग्रन्थ इति साटोपमारोपमसौ "माडर्न रिव्यू" इति पत्रिकायां स्वलेखेऽभियुनक्ति स्म। लाञ्छनमिदं राधाकृष्णनः सप्रमाणं निराकरोत्। परन्तु खिलभूतेऽपि खलानां प्रयासे राधाकृष्णनस्य मूर्ध्नि कलङ्कः कथं तिष्ठेदिति धिया पुनरपि अन्यत्र ते कीरायितमिव तानेवारोपान् प्रकाशितवन्तः मद्रासनगरतः प्रकाश्यमाणे 'जस्टिस' इति पत्रे। एतेन विचलितो राधाकृष्णनः १९२९तमस्य क्रैस्तवाब्दस्य ग्रीष्मे कालिकातोच्चन्यायालये यदुनाथसरकारं रामानन्दचट्टोपाध्यायं चोद्दिश्य लक्षरूप्यकात्मक-मानहानेरभियोगं प्रस्तुतवान्। यदुनाथसिन्हापि प्रत्यभियोगं विंशसहस्रात्मकराशिमितं प्रस्तुतीकृत्य अग्नौ घृताहुतिमिव ददौ। चतुर्वर्षाणि अभियोगः प्रचचाल। बङ्गदेशस्य मूर्धन्या विधिवेत्तारः शुल्कमगृहीत्वा राधाकृष्णनस्य कृते वाक्कीलत्वं विदधिरे। महोमहोपाध्यायगङ्गानाथझाकुप्पूस्वामिशास्त्रिसदृशाः प्रथिताः पण्डिताः स्वयमेव समागत्य न्यायालये राधाकृष्णनस्य पक्षतः साक्ष्यं ददुः। स्वपराजयमभितः पश्यन् सिन्हामहोदयः न्यायालयात् बहिः राधाकृष्णनेन सन्धिं चकार। तदनुरोधात

राधाकृष्णनोऽपि स्वाभियोगं निवर्तयामास।

अथायमान्ध्रप्रदेशविश्वविद्यालयस्य कुलपतित्वेन निर्वाचितः। १९३१तमस्य क्रैस्तवाब्दस्य मईमासे तत्र कार्यभारं गृहीतवान्। पञ्चवर्षाणि तत्र निर्व्यूढवान् कुलपतिपदस्य गरिममयं दायित्वम् अनिशं विद्यामुपासमानः। विजयवाडातो वाल्टेयरं स्थानान्तरिते विश्वविद्यालये शून्यादिव समुत्थितः कश्चन सरस्वत्याः अपारः संसारः। अस्यच्छत्रच्छायायां विश्वविद्यालयस्य विविधाः सङ्कायाः कायामापेदिरे। स्थपतिरिव विश्वविद्यालयस्य विविधानि विद्याभवनान्यसौ निर्मापयामास। तेषु च भवनेषु सरस्वतीं प्रतिष्ठापयामास, आनयामास च तत्र हुमायुँकबीर-हिरेनमुकर्जि-वी०के०आर०वी०राव-सदृक्षांस्तेजस्विनो विद्यावदातान् प्राध्यापकान्। कुलपतित्वेन अयं कार्यकालस्तदीयजीवनस्य नितरां सुखमयः खण्डः। वाल्टेयरतः समीपमेव मद्रासनगरम्। तत्र निवसति स्म परिवारः। स बहुशो मद्रासनगरं प्राप्य तेषु रेमे, अरमयच्च तान्।

विद्यालयो विद्याजगति अनन्यसाधारणीमभिख्या प्राप। १९३४तम क्रैस्तवाब्दे राधाकृष्णनः पुनरपि पञ्चभ्यो वर्षेभ्यः सर्वसम्मत्या कुलपतित्वे निर्वाचितोऽपि न तत्र अवस्थानं वरं मेने। १९३६तमे क्रैस्तवाब्दे ऑक्सफोर्डविश्वविद्यालयेऽतिथिप्राध्यापकपदं स्वीकर्तुं भृशमनुरुद्धोऽयं वर्षत्रयावधिकालाय तत्रैव वासं समकल्पयत्। नैके मद्रासवासिनोऽप्यस्य सौप्रस्थानिकेऽहमहमिकया सम्मिलिताः। प्राचार्यः रिचर्डलिटिलहैल्स-महोदयस्तदानीमभिभूतो राधाकृष्णनस्य गरिम्णा प्राह - "अहं तु मन्ये एकदा स्वतन्त्रभारतस्य राष्ट्रपती राधाकृष्णनो भविता--।"

इङ्ग्लेण्डदेशे विश्वविश्वाससमुदाये (वर्ल्डकाङ्ग्रेस ऑफ फेथ इत्यस्मिन्) आयोज्यन्त बहूनि तस्य व्याख्यानानि। इङ्ग्लैण्डदेशे अस्मिन् काले प्रदत्तानानां तदीयव्याख्यानानां सङ्ग्रहः प्राच्यधर्मः पाश्चात्त्यचिन्तनं च (ईष्टर्न रिलीजन एण्ड वेष्टर्न थॉट) इति नाम्ना प्रकाशितमभूत्।

१९३१तमात् क्रैस्तवाब्दादयमसीत् बुद्धिजीविनां सहकारस्यान्ताराष्ट्रियसमितेः (इण्टरनेशनल कमेटी फॉर इण्टेलेक्चुअल कोआपरेशन इत्यस्याः) अयं सदस्योऽभूत्। तत्र सदस्यत्वेन आइंस्टीन-मैडमक्यूरी-सदृशा वैज्ञानिकाः, अन्ये च प्रथिता दार्शनिकाश्चिन्तकाश्चाभूवन्। राधाकृष्णनस्य प्रस्तावेन रूसदेशीयो मैक्सिमगोर्की अपि तत्र सदस्यत्वेन वृतः। महात्मनो गान्धिनो वरदहस्तस्तदीये मूर्ध्नि सदैव आस्त।

तस्याशिषा संवर्धितोऽयं तदीये सप्ततितम जन्मदिने तस्मै समर्पयितुं अभिनन्दनग्रन्थमेकं परिकल्पयामास सम्पादयामास च। तस्मिन् ग्रन्थे व्यलसन्त सी०एफ०एण्ड्र्यूज-आइंस्टीन-रोमनरोलैण्ड-एडवर्डथाम्प्सन-सदृशानां वैज्ञानिकानां दार्शनिकानां साहित्यकाराणां च विचाराः गान्धिनमधिकृत्य एतैः स्वयं लिखित्वा अर्पिताः।

भारतेऽप्यस्य व्याख्यानेषु राष्ट्रिया भावना पल्लविता। गान्धिन आन्दोलनस्य समर्थनं मुखरितम्। द्वितीयविश्वयुद्धकाले ब्रैटिशं शासनं काङ्ग्रेसाय सहयोगं दातुमनेन मुहुर्मुहुः प्रेरितम्। महामना मदनमोहनमालवीयः अस्य प्रखरया प्रतिभया राष्ट्रसेवाभावनया च प्रभावितः भृशमेनं अनुरुणद्धि स्म काशीहिन्दूविश्वविद्यालयस्य कुलपतित्वं स्वीकर्तुम्। राधाकृष्णनश्च नैच्छत् कालिकाताविश्वविद्यालयस्याचार्यपदं परित्यक्तुम्। तदाग्रहं रक्षन्नसौ मासे द्विस्त्रिर्वा कालिकाताया आगत्य वाराणसीं कुलपतिकार्यं निरवहत्। तथापि प्रवर्धमानं कार्यं वाराणस्या दृष्ट्वा १९४१तमात् क्रैस्तवाब्दात् स कालिकाताविश्वविद्यालयस्य सेवां परित्यज्य स्वीचकार वाराणसीवासम्। न पुनर्जग्राह कुलपतित्वेन किमपि वेतनम्, अपितु वटोदरशासनस्य दानेन स्थापिते भारतीयसंस्कृतिपीठे आचार्यतया कार्यं कुर्वाणः मानदं कुलपतिपदं च पालयन् लेभे कमपि सम्मानम्। हैदराबादं गत्वा निजामशासनात् प्राप्यानुदानमसौ काशीहिन्दूविश्वविद्यालये इस्लामधर्मानुशीलनपीठं स्थापयामास, धर्मसङ्काये च न नार्यो वेदाध्ययनमर्हन्तीति रूढिं निरस्य प्रवेशायानुमतिं ददौ कस्याश्चन कन्यायाः। १९४२तमस्य क्रैस्तवाब्दस्य जनवरीमासे विश्वविद्यालयस्य रजतजयन्त्युत्सवोद्घाटनाय ब्रिट्रिशशासनकोपं तृणाय मन्यमानोऽयं महात्मानं गान्धिनं न्यमन्त्रयत्। काङ्ग्रेसनेतॄणां दमनाय समुद्यतं वाइसरायं प्रतिचिकीर्षया परुषं पत्रं प्रेषययामास। वाइसरायोऽपि काशीहिन्दूविश्वविद्यालय एव स्वतन्त्रतारणव्रतानां सैनिकानां समरभूमिरित्याकलय्य कुलपतिं राधाकृष्णनमविज्ञाप्य सेनां प्रावेशयत् विश्वविद्यालयपरिसरे। विश्वविद्यालयस्य कुलसंसत् राधाकृष्णनस्याध्यक्ष्ये वाइसरायस्येतादृशं नैर्घृण्यं धिक्कृतवती। गोरण्डानां दमनस्य उद्योगो न साफल्यमवाप। काले काले प्रदत्तेषु व्याख्यानेषु प्रकाशितेषु लेखेषु वायं महात्मनो गान्धिन आध्यात्मिकं वैभवं आर्षदृष्टिं स समुद्घाटयामास।

अस्मिन्नेव काले यात्रायां रेलयाने कदाचिन्मिलित एनं जिन्नामहोदयः । स एनमगादीत् - राधाकृष्णन् भवान् मे शत्रुषु मूर्धन्यः... यतो हि भवता स्वव्याख्याभिः हिन्दूधर्मः सम्मानास्पदं विहितः।

राधाकृष्णनस्य व्याख्यानैर्विश्वधर्मस्य सम्भावनाः साकारतां याताः। श्रोतृषु क्रिस्तुमतावलम्बिनः अयमस्माकं धर्मस्यैव मूलं तत्त्वं विशदयतीति प्रतियन्ति स्म। श्रावं श्रावं च तदीयं विवेचनं हृदयङ्गमं विदधाना धर्मस्य रहस्यं हर्ड-हक्सले-इशरवुड-आइरिसमर्डोक-सदृशाः बहवस्तदानीन्तना दार्शनिका वयं कैस्तवा वेदान्तिनो वा, वयं क्रैस्तवा बौद्धा इति आत्मानं कलयामासुः।

१९४५क्रैस्तवाब्दात् १९५२तममब्दं यावदयं यूनेस्को इति संस्थायां भारतीयप्रतिनिधित्वेन अथ चाध्यक्षत्वेन च कार्यं निरवहत्। अत्रान्तरे भारतदेशः स्वातन्त्र्यमाप। राष्ट्रस्य धुरं वहति स्म प्रधानमन्त्रित्वेन नेहरुः। स राधाकृष्णनस्य विद्यावदातं चिन्तनमवदानं च बहु मन्यते। मास्कोनगरं गत्वा रूसदेशे भारतीयराजदूतपदं स्वीकर्तुं स एनमभ्यर्थयामास । राधाकृष्णनस्य मनस्तु ऑक्सफोर्ड एव रेमे, स विश्वविद्यालयायोगस्य प्रतिवेदनलेखने संलग्नः, तत्कार्यं समाप्य पुनरपि ऑक्सफोर्डमेव गन्तुं मनो व्यदधात्। तथापि पुनरपि सानुबन्धे नेहरौ मास्कोगमनाय सज्जोऽभूत्। भारतीयप्रज्ञाया प्रतीकभूतः प्रयाति रूसदेशं राधाकृष्णन इति १९४९तमेऽब्दे तदीयसौप्रस्थानिकभूमिकां रचयन्नाह नेहरुः। ऑक्सफोर्डविश्वविद्यालयगत-मवशिष्टम् अतिथिप्राध्यापककार्यकालमपरिजिहीर्षू राधाकृष्णनः अतिथि-प्राध्यापकत्वं राजदूतकार्यं च समं निरवहत्।

अस्मिन्नेव काले पेरिसनगरे यूनेस्कोमहासम्मेलने १९४९तमस्य क्रैस्तवाब्दस्य सितम्बरमासे विंशतितमे दिने दत्तं तदीयं भाषणं स्मरणार्हमद्यापि वरीवर्त्यते। विश्वस्य कल्याणाय ब्रैटिशानां विधिविधानेषु दृढीयसी निष्ठा, अमेरिकीयानां प्रेमा रूसीयानां च साम्यभावना समं सङ्गच्छेरन्नित्ययं तत्र आह्वानं व्यदधात्। स्तालिनो न केनापि राजदूतेन मिलति, केवलं राधाकृष्णनाय स ददाववकाशम्। राधाकृष्णनस्य मास्कोनगर आगमने प्रत्युद्गमनार्थं तस्य सौप्रस्थानिके च विदायार्थं स स्वयमेवोपस्थितः इत्यपि अभूतपूर्व एवासीत् सम्मानः। सोवियतसर्वकारस्य दमननीतिं निर्भीकं धिक्करोति स्म राधाकृष्णनः, तथापि स्तालिनस्तदीयां प्रतिभां प्रशशंस। तदीयां स्पष्टवादितामपि असकृदश्लाघत स्तालिनः। अयं

जनस्तु हृदयेन निगदतीति स आह। अयमभूद्राधाकृष्णनस्यैव प्रभावो यद् १९५२तमस्य क्रैस्तवाब्दस्य जनवरीमासे समायोजिते संयुक्तराष्ट्र-सङ्घाधिवेशने कश्मीरमधिकृत्य रूसः भारतीयं पक्षं सर्वथा समर्थयत्, निषेधाधिकारमपि स्वकीयं वीटो-संज्ञकं केवलं भारतस्य हिताय प्रयुयोज। - अयमेव स जनः केवलं यो मां मानवं मनुते न दानवमिति - राधाकृष्णनेन साक्षात्कारानन्तरं वदति स्म स्तालिनः।

अस्मिन्नेव वर्षे एप्रिलमासे तदीयं नाम उपराष्ट्रपतिपदाय पुरस्कृतम्। मास्कोनगरमुज्झितम्। राधाकृष्णनो न उपराष्ट्रपतिपदाय सोत्साहः। उपराष्ट्रपतेस्तु न काऽपि भूमिका राष्ट्रनिर्माणे, राज्यसभाया आध्यक्ष्यमेवं केवलं तेन करणीयम्, तदप्यौपचारिकतानिर्वाह एवेति तदीया मतिरभूत्। ऑक्सफोर्डविश्वविद्यालयस्य पीठस्तस्य कृते समधिकतरं गौरवांस्पदम्, आकर्षणस्थानं च। नेहरुरेवैनं पुनरपि अनुरुणद्धि स्म। ऑक्सफोर्डविश्वविद्यालयेन सौप्रस्थानिककाले अस्मै दुर्लभः सम्मानो विहितः - मानदं द्राक्तरोपाधिं वितीर्य। उपराष्ट्रपतिपदे कार्यरतोऽयं कालिकाता-ऑक्सफोर्ड-काशीहिन्दू-मास्को-विश्वविद्यालयानां मानदः आचार्य आसीदिति दुर्लभैवास्य उपलब्धिः। "लाइब्रेरी ऑफ लिविंग फिलासफर्स" इति ग्रन्थमालायां न्यूयार्कनगरात् विशालः ग्रन्थो राधाकृष्णनस्य विचारै-र्मालागुम्फितः एषमः प्रकाशितः।

उपराष्ट्रपतिपदं प्राप्य अनेन स्थापिताः नवीना मानदण्डा आचाराः परम्पराश्च। अयमेव तादृश उपराष्ट्रपतिरभवदस्य देशस्य यः प्रतिदिनं होरात्रयं सामान्यैर्जनैर्मिलत्। १९५५तमे क्रैस्तवाब्दे तदीयं "रिकवरी ऑफ फैथ" इति पुस्तकं प्रकाश्यतामागतम्।

१९५६तमस्य क्रैस्तवाब्दस्य अक्टोबरमासे जीवनसङ्गिनी शिवकामुर्दिवङ्गता। अस्मिन्नेव काले राजेन्द्रप्रसादस्य राष्ट्रपतित्वेन प्रथमोवधिः समाप्तिं गतः। नेहरूः राधाकृष्णनमेव राष्ट्रपतित्वेयेष। परन्तु दाक्षिणात्याः मुख्यमन्त्रिणः अयं ब्राह्मण इति, काङ्ग्रेसीयाश्च नानेन स्वातन्त्र्यान्दोलने बलिदानं विहितं, नानेन राजेन्द्रप्रसादेनेव खादीर्धृतेति राधाकृष्णनस्य निर्वाचनं व्यरुन्धन्। उपराष्ट्रपतित्वेन द्वितीयं कालावधिं सर्वथाऽनिच्छन्नपि राधाकृष्णनः नेहरोरनुरोधं मानयन् कथञ्चित् तत्पदं पुनः स्वीचकार, १९५७तमस्य क्रैस्तवाब्दस्य मईमासे च पुनरयमुपराष्ट्रपति-र्निर्वाचितः। नेहरूराजेन्द्रप्रसादयोर्मध्ये मतभेदानां पर्वता समुत्थिताः।

समाप्ते राष्ट्रपतित्वेन द्वितीये कार्यकाले तृतीयमपि कालावधिं काङ्क्षते स्म राजेन्द्रप्रसादः। परन्तु १९६२तमस्य क्रैस्तवाब्दस्य मईमासे राधाकृष्णनः परमं बहुमतमवाप्य राष्ट्रपतित्वेन वृतः। ब्रिटिशअकादेमी तं मानद-सदस्यत्वेन वरयाञ्चकार, राष्ट्रियशिक्षकसङ्घश्च तदीयं जन्मदिनं शिक्षकदिवस इति कृत्वा समग्रेऽपि देशे मानितं स्यादिति सङ्कल्पं स्वीकृत्य भारतशासनं तत्क्रियान्वयनायानुरुरोध।

राष्ट्राध्यक्षो जातो नान्यस्त्वेतादृशोऽन्यदेशे वा।
यो विद्यायाः काष्ठां रूढः काष्ठां पदस्य तथा।।

शिमलानगरे वाइसरायभवने अनन्तरं च राष्ट्रपतिनिवास इति कल्पिते उच्चतराध्ययनसंस्थानं प्रतिष्ठापयितुं स निरदिशत्। यथा उपराष्ट्रपतिः संस्तथैव राष्ट्रपतिः सन्नपि सामान्यजनतायाः कृते प्रतिसप्ताहं नियमितं समयं मिलनाय स निरधारयत्। चीनाक्रमणे भारतस्य दारुणे पराजये स एव नेहरुं कृष्णमेननस्य सर्वकारेऽवस्थानं नेदानीमुचितमिति समदिशत्, अनन्तरं च स्वीचकार कृष्णमेननस्य त्यागपत्रम्।

चीनाक्रमणे नेहरोः हृदयं विदीर्णमिवाभूत्। अनन्तरं स हृदयरुजाऽपि पीडितः। राधाकृष्णनस्यापि दक्षिणनयने शल्यचिकित्सा समजनि, इति सोऽपि न प्रायः दीर्घप्रवासमङ्गीकरोति। साकारे ईश्वरे अश्रद्दधानोऽपि धर्मबुद्धिरभून्नेहरुः। "नाहं धार्मिकः, परन्तु सर्वे धर्मा यत् सत्यं प्रतिपादयन्ति तस्मिन् वर्तते मदीया निष्ठे"ति स प्रत्येति। स इदानीं इमां स्वकीयां निष्ठां राधाकृष्णनस्य सान्निध्येनैव पुपोष। कामराजयोजनायां त्यागपत्रं दत्वा मन्त्रिपदान्मुक्तो लालबहादुरशास्त्री १९६४तमस्य क्रैस्तवाब्दस्य जनवरीमासे नेहरुणा पुनरपि सर्वकारे पदं प्रापितः।

अथ मईमासस्य सप्तविंशतितमे दिने नेहरुर्दिवं जगाम। गुलजारीलालो नन्दः कार्यवाहकः प्रधानमन्त्री स्यादनन्तरं च कथं देशस्य भवितव्यतां रक्षितुं लालबहादुरः शास्त्री च नायकायेत इति राधाकृष्णनस्यैव दूरदर्शिता सर्वं योजितवती।

रूसदेशे राजदूतत्वे या छविस्तदीया मान्यतां गता, सा राष्ट्रपतित्वेन रूसयात्रावसरे समधिकतरं प्रभामण्डलं व्यतनोत्। भूमिकायिता च सैव ताशकन्दसन्धियोजनायाः। संयुक्तराष्ट्रसङ्घे कश्मीर-मधिकृत्य भारतस्य स्थितिश्चिन्तनीयैवासीत्। रूसदेशीयो राजदूतः राष्ट्रपतिं राधाकृष्णनं समय समये सूचयति स्म, तदनुरोधात् राधाकृष्णनः

स्मारयति स्म भारतसर्वकारं करणीयम्।

ताशकन्दसन्धौ जातायां जनवरीमासस्य एकादशे दिने १९६६तमस्य क्रैस्तवाब्दे प्रातरेव दुस्संवादः प्राप्तः लालबहादुरः शास्त्री दिवङ्गत इति। काङ्ग्रेसीयाः बहवः गुलजारीलालनन्दं प्रधानमन्त्रिणं दृष्टुमैच्छन्। पृष्ठभूमौ भवन् राधाकृष्णनः इन्दिरादेव्याः प्रधानमन्त्रित्व-प्रतिष्ठायाः सुदृढां भूमिकामरचयत्।

"रिलीजन इन ए चैंजिंग वर्ल्ड" इति शीर्षकेण पुस्तकं पूरितम् १९६७तमे क्रैस्तवाब्दे लण्डनतः प्रकाशितमभूत्। राधाकृष्णनः द्वितीयाय वाराय निर्वाच्येत राष्ट्रपतिरिति राजगोपालाचार्य-हिरेनमुकर्जी-जयप्रकाश-नाराणसदृशा प्रौढा ज्येष्ठा राजनीतिविदः काङ्क्षन्ते स्म। राधाकृष्णनस्तु कालोऽयं वैखानसीं वृत्तिं श्रयितुमिति विचारयन् सेवानिवृत्तिमेव वरं मेने। अस्मिन्नेव वर्षे राधाकृष्णनेन गणतन्त्रदिवसपूर्वसन्ध्यायां राष्ट्रायोद्बोधने सर्वकारः शिक्षितः, राजस्थाने च विरोधिदलस्य सर्वकारसङ्घटनाय बहुमतं न वर्तते इति कृत्वा राज्यपालेन प्रतिषिद्धानां विरोधिदलजनानां पक्षः देहल्यां राष्ट्रपतित्वेन श्रुत इति इन्दिरा गान्धी मनसि असन्तुष्टा। सा जाकिरहुसेनं राष्ट्रपतित्वेन चकमे। मनस्यन्यद् वचस्यन्यत् कर्मण्यदिति राजनीतिचातुर्यं निर्वहन्ती इन्दिरा देवी ऋषिकल्पं स्वपितुः सखिभूतं राधाकृष्णनं न निवेदितवती स्वाभिप्रायं, क्वचित् प्रतिपक्षनेतॄन् क्वचिच्च जाकिरहुसेनादीन् छद्मना मन्त्रयाञ्चकार। अनभिज्ञस्तदीयानां मन्त्रणानां राधाकृष्णनः कामराजेन काममनुरुद्धः अन्यैश्च भवन्तं विहाय कोऽन्यः स्यात् राष्ट्रपतिपदमलङ्कर्तु- मिदानीमिति मुहुर्विश्वासं गमितः प्रथमं पदायास्मै स्वप्रत्याशितां दृढं प्रकटीचकार। परन्तु परस्तादवगतं तेनापि राजनीतेर्द्विजिह्वत्वम्। अतः सर्वसम्मत्यभावे नाहं पुनरपि राष्ट्रपति-निर्वाचनायोत्थातुकामोऽस्मीति निश्चिकाय राधाकृष्णनः, तथा च दृढं घोषयामास। १९६७तमस्य क्रैस्तवाब्दस्य अप्रैलमासस्य द्वादशतमे दिने तेन समग्राय भारतराष्ट्राय अन्तिमम् उद्बोधनमदायि। अनन्तरं स्वगृहे निवसन्नपि वानप्रस्थो मुनिरिव जीवनस्यावशिष्टं कालमयं निनाय। १९७५तमे क्रैस्तवाब्दे अप्रैलमासस्य सप्तदशदिवसे स नश्वरकायं तत्याज।

अद्वैतं परमं सत्यमेकं च प्रतिपादयन्।
तस्मिन्नेव लयं यातो राधाकृष्णन आर्षधीः।।

संक्षेपेण तदीयं दर्शनमित्थम्। सृष्टेः श्रेष्ठतमोंऽशो नरः। तस्मिन् ईश्वरस्य विभूतिर्जागर्ति, बोभूयते। अनया विभूत्या स समग्रायाः सृष्टेः रूपान्तरे निमित्ततां यातुं क्षमः। नरेण स्वयमेव स्वपापानि क्षालनीयानि, न ईश्वरकृता क्षमा तस्य मार्जनं विदधाति। (ए हिन्दू व्यू आफ लाइफ, पृ० ७४-७५)। अवतारवादस्यापि व्याख्या राधाकृष्णनेन अपूर्वा विहिता (भगवद्गीताव्याख्या,पृ० ३०-३६)। तद्यथा - अवतारेषु नेश्वरो मनुष्यदेहे अवतरति, यतो हि स तु मनुष्यचैतन्ये सदा वर्तमानः। मनुष्य एव तमाविष्करोति।

नरदेहं समाश्रित्य नेश्वर एति भूतलम्।
अवतारो द्विधा प्रोक्तः सावधिः शाश्वतस्तथा।
विलसति चेश्वरतत्त्वं निरवधि सर्वत्र शाश्वतं कालम्।
निरवधिरयमवतारः सततं विकसति नरस्य चितौ।।
तस्योत्कृष्टा व्यक्तिर्भवति कदाचिच्च रामकृष्णसमा।
मानवदेहे चित्ते दिव्यं तत्त्वं दधाति च या।।

स्वचित्तस्योदात्तीकरणमेव तपः, शरीराय कष्टं दायं दायं यत् तपः क्रियते तत् तु निरर्थकम्। पाषण्डाः एतादृशैस्तपो- ऽनुष्ठानैर्जनितान् मानसिकभ्रमान् दिव्या अनुभूतीर्मत्वा मोदन्ते, वञ्चयन्ति आत्मानमन्यांश्च। (भगवद्गीताव्याख्या, पृ० ३४४)

विवाहविच्छेदो नाम पराजयस्वीकारः। दाम्पत्ये सुमानुषं रचनीयं भवति। सम्बन्धे पूर्णता रचनीया भवति, न पूर्वतः प्राप्या। (ए हिन्दू व्यू आफ लाइफ, पृ० ८७)। वर्णाश्रमव्यवस्था यावत् समाजं साधु नियमति तावत् काम्या। वर्णो न जन्मतः अपितु कर्मतो ग्राह्यः। वर्णाश्रमव्यवस्थायां जन्मना जातिरिति प्रथया महती क्षतिः समाजस्य जाता। एतादृशीं व्यवस्थां निराकुर्वन्नतिवर्णाश्रमी आदरार्हः।

वर्णाश्रमव्यवस्था सा काम्या सौकर्यसिद्धये।
अतिवर्णाश्रमः साधुः क्राम्यन् तां तु महीयते।।
(ईष्टर्न रिसीजन्स एण्ड वेष्टर्न थाट, पृ३८३)

धर्मः शाश्वत एको यो धारयति च समस्तमपि विश्वम्।।
परिवर्तन्ते ते ते नियमाः विधयस्तु धर्मगताः।।
यद्यपि तर्कातीतः परमात्मा चाव्ययो विभुर्नियतम्।।
तर्कसङ्गतः सर्वस्तस्य विधानं तथा च जगत्।

क्रममुक्तिस्तथा मुक्तिर्वैदेहिकी ततः परम्।
जीवन्मुक्तिः सर्वमुक्तिरितिमुक्तिचतुष्टम्।।

क्रममुक्तौ जीवस्य आत्माविष्कारप्रक्रिया प्रारभ्यते, परन्तु न सर्वथा मुक्तोऽसौ जायते। पतिते देहे या मुक्तिः सा विदेहमुक्तिः। जीवत एव नरस्य मुक्तिर्जीवन्मुक्तिः।

जीवन्मुक्तो मुनिवद् श्रीराधाकृष्णनः स सञ्जातः।
चरितं शुभं तदीयं राधावल्लभ इहाततान।।

****

पुस्तकसमीक्षा

व्युत्पत्तिवादे अभेदान्वयबोधप्रकरणम् कृष्णंभट्टी-आदर्शाख्यटीकाद्वयोपेतम्, सं. अच्युतानन्ददाशः, प्रकाशकः - प्रतिभाप्रकाशनम्, नवदेहली, २००३.

श्रीमद्गदाधरभट्टचार्यविरचितो व्युत्पत्तिवादो विदुषां वृन्देषु महनीयां कीर्त्तिं दधातीति नाविदितं न्यायशास्त्रपरिचितानां जनानाम्। अयं ग्रन्थो विदुषां वैदुष्य-परीक्षणाय निकषायितो राजते। संस्कृतेऽस्य ग्रन्थस्य प्रायशः सप्तटीकाः राजन्ते, आंग्लभाषायामपि वी.पी. भट्टमहोदयानां, हिन्दीभाषायां मया विरचिता सुनन्दा नाम्नी व्याख्या, वैद्यनाथाझा महोदयानां इन्दुकला नाम्नी व्याख्या राजन्ते। कैश्चनान्यैरपि विरचिताः व्याख्याः भवितुमर्हन्ति। एतासु सर्वास्वपि व्याख्यासु प्राचीनतमा व्याख्या भवति कृष्णम्भट्टमहोदयैर्विरचिता **कृष्णम्भट्टी**नाम्नी व्याख्या। इयमेव च व्याख्या सर्वप्रथमं प्रकाशिता इभूव। किन्तु व्याख्येयमासीत् प्रकाशिता शिलाक्षरैः हस्तलिपिसदृशी। बहुकालात् प्रोगेवेयं विलुप्ता बभूव। सुदर्शनाचार्यैः विरचिता **आदर्श**नाम्नी व्याख्याऽपि दीर्घकालात् प्रागेव प्रकाशमागता सम्प्रति कष्टेनोपलभ्या। एताभ्यां द्वाभ्यां टीकाभ्यां सह व्युत्पत्तिवादस्य प्रकाशनं विदुषां मोदावहं भवितेति मदीयः विश्वासः। यद्यप्यत्र केवलमभेदान्वयबोधप्रकरणं यावदेवांशः प्रकाशमानीतः, किन्त्वनेनापि विदुषामध्येतॄणाञ्च भविष्यत्येवोपकारः। व्युत्पत्तिवादस्याभेदान्वयबोध-प्रकरणं गभीरविवेचनसम्पन्नं विद्यते। कृष्णम्भट्टीटीका आदर्शटीका च उभेऽपि सरलया पद्धत्या न्यायशास्त्रेऽप्रविष्टानां जिज्ञासूनां समुपकाराय प्रवर्तेते। यद्यप्यादर्शविषये विद्यतेऽनेकेषां विदुषामेषा धारणा यदियं टीकाऽनेकत्र मूलार्थं सम्यगनालोच्यैव प्रवृत्ता भवति, किन्तु न विद्यते कस्यापि संशीतिलेशोऽपि यत् मूलार्थावगमाय समुपलब्धासु संस्कृतभाषामयीषु टीकासु टीकेयमुपकुरुतेतमाम्। अतोऽस्य ग्रन्थस्य सम्पादकाः श्रीमन्तोऽच्युतान्ददाशमहोदयाः धन्यवादार्हाः।

अस्मिन् ग्रन्थे सम्पादकेन प्रायशः शतपृष्ठात्मिका आङ्ग्लभाषोपनिबद्धा भूमिकाऽपि संयोजिता। भूमिकेयं निश्चयेनाङ्ग्लभाषामाध्यमेन न्यायशास्त्रीय-शाब्दबोधप्रक्रियाजिज्ञासूनां कृते उपकारिणी भविष्यतीति मे विश्वासः। यद्यपि केषुचन स्थलेषु भूमिकालेखकेन प्रमोदोः जात इति मां प्रतिभाति। तथापि प्रतीकात्मकतर्कशास्त्रीयपद्धत्या विविधानां विषयाणां समुपस्थापनाय लेखकेन यः प्रयासो विहितः, सः स्वागतार्हः।

भूमिकायां सम्पादको खण्डचतुष्टयं विदधाति। प्रथमे खण्डे ज्ञानप्रक्रिया-विषयको विचारः द्वितीये ज्ञानसामग्रीणां प्राथमिकता विचारः, तृतीये शाब्दबोधे

प्रकारतावाद–संसर्गतावादयोश्चर्चा, चतुर्थे तु तादत्म्यस्य दर्शनान्तरेषु कीदृशं तार्किकं भाषिकं वा स्वरूपं भवतीति विचारयति।

सम्पादकः प्रथमतः प्रत्यक्षप्रक्रियामनन्तरं शाब्दबोधप्रक्रियामनुमितिप्रक्रियां च प्रतिपादयति। एतासु प्रक्रियासु को भेदः? क्रमशस्त्रिभिः समुत्पन्ने ज्ञाने कश्चन भेदो भवति न वेति लेखकः सुनिपुणं विभावयति। ज्ञानेषु सम्बन्धानां मानं को नियमयति ? इत्यादिकं विवेचितं विद्यते। अस्मिन् प्रथमे खण्डे किमपि परम्परा–विरुद्धमिव प्रतिपादितं प्रतिभाति। 'पर्वते बह्निः' इत्यत्र प्रत्यक्षे वह्निनपर्वतयोः सम्बन्धः संयोगसम्बन्धावच्छिन्नाधेयतालक्षणः ज्ञानलक्षणप्रत्यासत्त्या भासते, इति लेखकस्याशयो भवति। (पृ. १८–१६) न्यायसम्प्रदायेऽस्मिन् विषये बहुधा विचारो नैव कृतः लेखकस्यैतत् कथनं विचाराह्वानं करोति कया रीत्या संयोगसम्बन्धा–वच्छिन्नाधेयत्वस्य प्रत्यक्षे भानं स्यात्। नैव कश्चनः लौकिकः संसर्गस्तत्र सम्भवति संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायादिरूपः सः। विशेष्यविशेषणभावसन्निकर्षेण तु समवायाभावयोरेव प्रत्यक्षं शास्त्रानुसारि भवति। अतः सिद्धान्तविरुद्धमेतत् भवति न वेति सुनिपुणं विभावनीयं न्यायविद्या–विचारचतुरैः। अस्मिन्नेव प्रसङ्गे लेखकेन कर्तृत्व–कर्मत्व–करणत्वादीनामपि ज्ञानं ज्ञानलक्षणसन्निकर्षेण भवतीति प्रतिपादितम्। वस्तुतस्तु क्रियाजन्यसंयोगाश्रयत्वादि रूपं कर्मत्वादिकं खलु इन्द्रियसन्निकर्षेणैव ज्ञातुं शक्यमिति लेखकस्य वचनं परम्पराविरुद्धं प्रतीयते। एवमेव शाब्दबोधसामग्रीविवेचनावसरे (पृ.२४–२५) लेखकः सामग्र्यां दशानां तत्त्वानामन्तर्भावं करोति, परम्परया तु सप्तानामेव पदज्ञान–शक्तिज्ञान–पदार्थोपस्थिति–आकाङ्क्षाज्ञान–योग्यताज्ञान–तात्पर्यज्ञान–सन्निधीनाम् एव शाब्दबोधसामग्रीत्वं स्वीकृतं विद्यते। एतान् तु लेखकोऽप्यन्तर्भावयति किन्तु पदानां श्रोत्रजप्रत्यक्षं, वक्तारं, श्रोतुः योग्यताञ्च लेखकः किमर्थं शाब्दबोधसामग्र्या–मन्तर्भावयतीति रहस्यात्मकमेव प्रतीयते। मौनिश्लोकादिना लिप्यादिना च जायमानं बोधं नैयायिकाः शाब्दबोधकोटावेवान्तर्भावयन्ति, वक्त्रादीनां शाब्दबोधसामग्र्या–मन्तर्भावे विहिते मौनिश्लोकादिना जायमानो बोधोऽशाब्दः प्रसक्तो भवेत्।

ज्ञानसामग्र्योः समवधानदशायां ज्ञानस्य प्राथमिकताविचारावसरे द्वितीये ऽध्याये कुत्र कस्याः सामग्र्याः प्रतिबन्धकत्वमिति निर्धारयन् लेखकेन निपुणं प्रतिपाद्यते। किन्तु तत्र किञ्चिदपरमपि स्पष्टीकरणमपेक्षणीयमासीत्। समान–विषयकानुमितिं प्रति शाब्दबोधसामग्र्याः प्रतिबन्धकत्वमिति जगदीशमतं भवति इति लेखकास्याशयः। वस्तुतस्त्विदमेव गदाधरमतमपि भवति। इदमेव तथ्यं धर्मदत्तझा–महाशयाः व्युत्पत्तिवादगूढार्थतत्त्वालोके (पृ.८३) प्रतिपादिवन्तः। प्रत्यक्षानुमित्योः भिन्नविषयकज्ञानजननसामग्रीसमवधाने कया सामग्र्या कस्याः प्रतिबन्धो भविष्यतीति प्रसङ्गस्तत्र नैवागतः। अत्र प्रसङ्गे वेणीमाधवशास्त्रिमहोदयानां विनिगमनाविरह–प्रतिपादनमसङ्गतमेव विद्यते।

शाब्दबोधे प्रकारतावादिसंसर्गतावादिनोः बहुषु स्थलेषु मतभेदः प्रचलति। अत्र प्रसङ्गे सरलया गिरा लेखकः इमं जटिलं प्रसङ्गं प्रतिपादयति। 'नीलो घटः' इत्यत्र अभेदः संसर्गतया भासत इति संसर्गतावादिनः, प्रकारतया भासत इति प्रकारतावादिनः। 'राज्ञः पुरुष' इत्यत्र राजपुरुषयोः मध्ये स्वत्वसम्बन्धः संसर्गतया भासते इति संसर्गतावादिनः, प्रकारतावादिनस्तु प्रकारतया भासत इति। जगदीशः संसर्गतावादी गदाधरः प्रकारतावादी इति बहवः। द्वयोरत्र मतभेदः इति अनेके विद्वांसः, लेखकोऽपि एतदेव प्रतिपादयति। अहन्त्वस्मिन् प्रसङ्गे द्वयोरपि 'नीलो घटः' इति वाक्यप्रसङ्गे संसर्गतावादित्वम्, 'राज्ञः पुरुषः' इति वाक्यप्रसङ्गे तु प्रकारतावादित्वमस्तीति निश्चिनोमि। प्रतिपादितञ्चैतन्मया सुनन्दानन्दितस्य व्युत्पत्तिवादस्य भूमिकायां विस्तरेण। शाब्दबोधं प्रतीकैः बोधयितुमभिनवं प्रयासं लेखकेनाचरितम्, किन्तु नकारात्मकानां वाक्यानां शाब्दबोधानां प्रतीकैरवबोधने लेखकेन प्रमादो जातः (७०–७३)। तत्र हि लेखकेन प्रतियोग्यभावान्वयौ तुल्यप्रयोगक्षेमाविति नियमस्य योजनं ग्रन्थकारीयरीति–विरुद्धरीत्या कृतम्। तथाहि तत्र स्वत्वस्य विभक्त्यर्थत्वानङ्गीकारे संसर्गतया भाने स्वीकृते 'राज्ञः पुरुषः' इति वाक्यजन्यस्य राजप्रकारक–स्वत्वसंसर्गक–पुरुषविशेष्यको बोधः P_r S_{s1} V_p इति प्रतीकेन बोधितः। अत्र हि P इत्यस्य प्रकार इत्याशयः S इत्यस्य संसर्गः V इत्यस्य विशेष्य इति। लघ्वक्षरैः विलिखितस्य r इत्यस्य राजा इति, S_1 इत्यस्य स्वत्वमर्थो भवति। तथैव च P इत्यस्य पुरुष इत्यर्थः। तत्रैव हि 'पुरूषो न राज्ञः' इत्यस्य नकारात्मकस्य वाक्यस्य राजस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रकारक –पुरुषविशेष्यकशाब्दबोधस्य प्रतीकालम्बनं P_r S_{-s1} Vp इति विहितम्। अनेन प्रतीकालम्बनेन राजाभावस्य प्रकारत्वं नैव स्फुटीभवति। अत्रहि यदि $(P_r S_{s1+} PV_a)$-$S_a Vp$ एवं प्रतीकालम्बनं स्यात् तर्हीदं सम्यक् स्यात्। अत्र हि लघ्वक्षरैः लिखितानां प्रतीकानामेवं स्फुटीकरणं सम्भवति – r = राजा, S1+ = स्वत्वसम्बन्धावच्छिन्न–प्रतियोगिताकत्वम्, a = अभावः, पुनः a = आश्रयत्वम् P = पुरुषः। अभावो हि राजा–पेक्षया विशेष्यीभूय पुरुषापेक्षया च प्रकारीभूय भासते। अतएव तदर्थं PV इति प्रतीकालम्बनं विहितम्। किन्तु नव्यन्यायाभिमतस्य शाब्दबोधस्य प्रतीकमाध्यमेन नवीनया पद्धत्या समुपस्थापनाय प्रयासं विहितवान् लेखक इति धन्यवादभाजन इति मे मतिः। अनया रीत्या समेषां ज्ञानानां प्रतीकेन व्यक्तीकरणं शक्यम्।

विजातीयानामनुभवानां कारणसामग्रीणां समवधाने सति का सामग्री फलवती भवष्यिति का च न भविष्यतीति बोधनाय एका कथा लेखकेन विरचिता (पृ. ६६–६७)। एषा प्रक्रिया सफलीभवितुमर्हति मनोरञ्जिका च भवति। किन्तु तत्र किमपि सिद्धान्तविरुद्धं प्रतिपादितम्। 'राजस्वत्वाभाववान् पुरूषः सुन्दरः' इति ज्ञानमंशे प्रत्यक्षमंशे च शाब्दबोधात्मकं भूमिकाकारः प्रतिपादयति – Now, this is an instance of perceptual-cum-sentential cognition (पृ. ६७) न्यायसम्प्रदायानुसार–मेतज्ज्ञानं प्रात्यक्षिकं वा भवेत् शाब्दं वा भवेदुभयात्मकं तु न भवितुमर्हति। अन्यथा

प्रत्यक्षत्वशाब्दत्वयोः साङ्कर्यं प्रसक्तं भवेत्। तत्रैव लेखको ज्ञानमिदं समूहा-लम्बनात्मकं प्रतिपादयति। एतदपि न सिद्धान्तसम्मतं भवति। इदं हि ज्ञानं विशिष्टवैशिष्ट्यावगाहि भवति। राजस्वत्वाभावविशिष्टे पुरुषे सौन्दर्यज्ञानमिद विशिष्टवैशिष्ट्यात्मकमेव भवितुमर्हति न तु समूहालम्बनात्मकम्।

तादात्म्यस्वरूपपर्यालोचनात्मके चतुर्थे खण्डे कश्चन नवीनः प्रश्नः समुप-स्थापितः लेखकेन। अद्वैतवेदान्तानुसारि-तादात्म्यस्वरूपनिरूपणप्रस्तावे लेखकेन 'तत्त्वमसि' इत्यादि महावाक्यजन्यस्य 'सोऽयं देवदत्तः' इत्यादिवाक्यजन्यस्य च बोधस्य वेदान्तिनः प्रत्यक्षात्मकत्वं स्वीकुर्वन्ति। किमेतत् नैयायिकैरपि स्वीक्रियते? यदि नैयायिका एतेषु स्थलेषु प्रत्यक्षात्मकं ज्ञानं स्वीकुर्वन्ति तर्हि निश्चयेन शाब्दबोधसामग्रीतः प्रत्यक्षात्मकं ज्ञानं भवतीति स्वीकृतं भवति। नैयायिकास्तत्र प्रत्यभिज्ञात्मकं प्रत्यक्षमेव भविष्यतीति प्रत्यक्षसामग्र्या शाब्दबोधस्य प्रतिबन्ध एव भविष्यतीति वक्तुं प्रभवन्ति। किन्त्वस्मिन् प्रसङ्गेऽधिकं विवेचनीयमवशिष्यते। विवेचनीयं चैतत् न्यायशास्त्ररसिकैरित्यनुरोधो लेखकस्य। अनया रीत्या भूमिकायां लेखकः विविधान् नवीनानपि प्रश्नान् समुपस्थापयति। कतिचन स्थलेषु विहितान् प्रमादान् स्वल्पाः त्रुटीश्च यदि वयं त्यजामश्चेत् ग्रन्थोऽयं सङ्ग्रहणीयः व्युत्पत्तिवादे प्रवेशकरश्च।

कृष्णम्भट्टी व्याख्या व्युत्पत्तिवादस्य प्राचीनतमा व्याख्या सती बहुषु स्थलेषु नवीनां परिष्काररीतिमाविष्करोति। ग्रन्थस्य सम्पादनन्तु सम्पादकेन साधु कृतम्। मूले व्याख्ययोश्च पदानां विच्छेदो विहितः, येनाध्येतॄणां सौकर्यं भवेत्। मूलस्य व्याख्ययोश्च विषयाणां परिशीलितानां वर्गीकरणाय सङ्ख्यात्रयस्य समुपयोगो विहितः। अनेन च प्रस्तुतानां तर्काणां सम्यग् व्यवस्थापनं सम्पन्नम्। अन्ते च परिशिष्टरूपेण पं.श्रीरामप्रसादत्रिपाठिमहोदयानाम् एकं व्याख्यानमपि प्रदत्तमस्ति, यच्च 'शब्दबोधे चैकपदार्थे ... भासते' इति व्युत्पत्तिवादस्य प्रथमां पङ्क्तिं व्याख्याति। अग्रे च समानवचनकत्वं विशेष्यविशेषणवाचकपदयोः कुत्र भवति इति सुस्पष्टं प्रतिपाद्यते। अनेन परिशिष्टेनाध्येतॄणां लाभो भवितेति निश्चितम्। अतः कृष्णम्भट्टी-आदर्शाख्यटीकाभ्यां सम्वलितस्य व्युत्पत्तिवादस्य साधु सम्पादनं विहितवद्भ्योऽच्युतानन्ददाशमहोदयेभ्यः सादरं धन्यवादाः विज्ञापनीयाः।

सच्चिदानन्दमिश्रः

निम्नपृथिवी **- कथासङ्ग्रहः। केशवचन्द्रदाशः। लोकभाषाप्रचार-समितिः, भद्रकम्। प्र०सं०२००१।**

सङ्ग्रहेऽस्मिन् कथाकारस्य दाशस्य सप्तत्रिंशत्कथाः सङ्कलिताः। एताः कथाः पूर्वं सुधर्म-दिव्यज्योतिः-भारतमुद्रा-संवित्सु १९८०-८२- क्रैस्तवाब्दयोः प्रकाशिताः। ऊर्मिचूडेति कथासङ्ग्रहो दाशस्य पूर्वं १९९५तमे क्रैस्तबाब्दे प्रकाशितः। तत्र प्रौढस्य कथाकारस्य अनुत्तमं रूपं परिलक्ष्यते। कथा अपि दीर्घकलेवराः। अस्य सङ्ग्रहस्य कथाः आकारेण न तथा विपुलाः। भाषा अपि सरलतरा। परन्तु केशवचन्द्रीयस्य कथासंसारस्य वैशिष्ट्यमेतासु कथास्वपि तथैव परिलक्ष्यते। अवचेतनमनसः चिन्ताधारां नितरामनुभुतिप्रवणतया विशदयति केशवचन्द्रः। सङ्क्षिप्तास्वपि एतासु सर्वासु कथासु मानवमनसस्ते ते द्वन्द्वाः संशयाः शङ्कात्राससम्भ्रमाः अस्तित्वगतः सङ्कटः युगसंशयैः सह इह मूर्ताः प्रतिभान्ति। कथाकर्तृत्वेन केशवचन्द्रस्य विकासं परिज्ञातुं सङ्ग्रहस्यास्य अनुशीलनं नान्तरीयकम्।

सर्वाः कथाः प्रायः एकस्मिन् पृष्ठे, पृष्ठद्वये, अधिकाधिकं पृष्ठत्रये वा पर्यवस्यन्ति, केवलं पाषाण इति कथा षट्पृष्ठात्मिका। तिर्यक् दिगन्तः, शब्दः, नीलचन्दनः इति कथासु औपन्यासिकः महागाथायाः विस्तारः पृष्ठद्वये क्रोडीकृत्य समुपस्थापितः। सर्वासु कथासु अनुभूतिसान्द्राः क्षणा बिम्बायन्ते। आधुनिकजीवने मानवसम्बन्धानां च्युतिः, संस्खलनम्, परम्पराया हानिर्मनसो ग्लानिश्चात्र विषयं प्राप्ताः। केशवचन्द्रस्य कथासु सर्वत्र लयात्मकं चूर्णं गद्यम्, प्रायः प्रसन्नमधुरा क्वचिच्च शिलिष्टा नृत्यत्प्राया पदावली च विलसति। सङ्केतात्मकतया प्रतीकमयपदावल्या व्यञ्जनाभिश्च सम्पृक्ता तदीया शैली क्वचिद् दुरूहापि प्रतीयते। बिम्बा अर्थगर्भनिर्भराः सन्ति। तथाहि- "अद्य बहुदिनान्तरमपि सैव उन्मादिनी रूपलोभिभ्रष्टसमाजस्य प्राचीरपत्रं सङ्केतफलकं च" (पृ०१) , "नग्नसूर्यः सान्ध्यस्नानं विदधाति समुद्रस्य अपरपुलिने" (पृ०२) "एकस्मात् वृक्षादपि लक्षाधिकाः छायाः जायन्ते। पादोऽपि मार्गस्थधूलीष्टकाभिः सह कदा कदा कलहायते। मार्गोऽपि सन्तप्तधूलिपटलस्य स्वप्नं पश्यति। अयमेव तस्य शुष्यन्मुहूर्तस्य इतिहासः (पृ०११)

कासुचित् कथासु आधुनिकभारतीयभाषाणां शब्दाः स्वैरं प्रयुक्ताः। यथा- मालिक् (पृ०९) रिक्सा (पृ०३४) जीवनी (जीवनवृत्तार्थे, पृ०१४)। केचन प्रयोगाः व्याकरणदृशा चिन्त्याः, यथा - लिखनी (लेखनीत्यर्थे, पृ०१६) निरुष्मा (पृ०१८)

राधावल्लभः

तिलोत्तमा - उपन्यासः, प्रणेता स एव। प्र०- श्रीमती सुभद्रा दाश, पुरी। प्र० सं० २००२

अयमपि उपन्यासः केशवचन्द्रस्य प्रारम्भिकी कृतिः। अस्य धारावाहिकतया प्रकाशनं १९८०-८२ क्रैस्तवाब्दयोः सुधर्मेति दैनिके पूर्वं सञ्जातम्।

मनःस्थितीनां भावधारायाश्च चित्रणं प्रामुख्यमावहति उपन्यासेऽस्मिन्। कथाया नायकः पुष्पवल्लभः, तिलोत्तमा नायिका। उभौ सहपाठिनौ। परस्पंर प्ररूढं उभयोश्छात्रजीवने प्रेम। परन्तु तिलोत्तमायाया सहपाठिनी नीलिमा एतत् प्रेम न सहते। सा तिलोत्तमाया विवाहः पुष्पवल्लभेन यथा न भवेत् तथा तिलोत्तमाया पितरौ बोधयति। पुष्पवल्लभोऽपि पित्रोराग्रहेण मधुच्छन्दां परिणयति। तिलोत्तमा धनिकेन भाग्यदत्तेन विवाहिता। परन्तु विवाहस्य सौभाग्यरात्रावेव तिलोत्तमायै प्रेषितं पुष्पवल्लभस्य पत्रं तयोरेकं युगलचित्रं च दृष्ट्वा भाग्यदत्तस्तां तृष्णया भुक्त्वापि परित्यजति; गृहं त्यक्त्वा नीलिमया सह चान्यत्र याति। तिलोत्तमा तु संन्यासिनी भूत्वा धवलगिरौ आश्रमे वसति। आश्रमेऽपि युवा मुनिः पद्मकाञ्चनस्तां कामयते तिलोत्तमया बोधितोऽसौ भगिनीभावेन भजति ताम्। इतस्तु मधुच्छन्दा चिकित्सालये समुचितोपचारव्यवस्थाया अभावे म्रियते, पुष्पवल्लभस्तु सर्वथा निर्विण्णस्तिष्ठति। तस्य पूर्वसहाध्यायिनौ वद्रिकेशाशुतोषौ तिलोत्तमामाश्रमे दृष्ट्वा प्रत्यभिज्ञाय पुष्पवल्लभं तां परिणेतुं प्रेरयतः। परन्तु यावत् पुष्पवल्लभः समीरितसमीहः तस्याः कृते आश्रमं प्राप्नोति, तावत् कठोरव्रतं कुर्वाणा तिलोत्तमा स्वजीवनलीलां समाप्नोति। अपरत्र नीलिमाभाग्यदत्तयो-रवैधदाम्पत्यमपि न सुखमयम्, भाग्यदत्तो नीलिमायाः उद्वेजितः तां परिजिहीर्षति इति विषादगर्भा शोकपर्यवसायिनी कथा अस्योपन्यासस्य।

प्रतिपद्, निकषा, ऋतम् मधुयानम् इत्यादिपरवर्त्युपन्यासेषु केशवचन्द्रेण यत् जीवनदर्शनं प्रकटीकृतं तस्य बीजानि उपन्यासेऽस्मिन् विकीर्णानि सन्ति। तथापि किशोरभावानामुच्छ्वास एव उपन्यासेऽस्मिन् समधिकतरं दृश्यते, न तथा परिपक्वता। भाषाऽपि मुहुः स्खलति। शिहरणम् इति शब्दः (पृ० ५) तथैव शिहरितवान (पृ० ४६) इति प्रयोगो वा सिहरना इति हिन्द्यादिभाषाप्रयोगादानीतः प्रतिभाति, शाब्दिमा (पृ०८) इति शब्दोऽपि नान्यत्रदृष्टः। आङ्ग्लभाषाया मोटरशब्दस्य ध्वनिसाम्यात् तदर्थं मृत्तर इति शब्द इह बहुधा प्रयुक्तः। उपहारशब्दस्य च भोजनार्थे प्रयोगः कृतः (पृ० ३०) एवमेव अदिनजलदः, अदिनमेघः (पृ० २६) पागलप्रतिकृतिः (पृ० ९५) इत्यादयः शब्दा अपि

उपन्यासकारेण स्वनिर्मिता प्रतीयन्ते।

केशवचन्द्रस्य गद्ये अपूर्व एव लयः, अदृष्टपूर्वाश्च बिम्बाः। गद्यस्य कश्चन चमत्कार इहापि अनुभूयते एव। तथाहि-

"सन्ध्या आयाति तत्र गोचरणरजसि।
प्रातः आगच्छति कुक्कुटवत्सतराणां स्वानेषु
पितकपोतादिपक्षिणां काकलिषु च। दिवसः
चलति कृषीवलानां छन्दोगीतिषु। रात्रिः च
पुष्यते गोशालादीपालिषु। (पृ० ५)

"प्रफुल्लतायाः प्रवाहे नृत्यरता
आसीत् तारुण्यस्य तरङ्गमाला। पृ० ७)

"पल्लीदरिद्रपरिवेश स आसीत्
मानसिकधनी।" (पृ०६)

"परिच्छदे आत्मघातं करोति
बहुदिनस्य मलिनता।" (पृ० ९)

क्वचित् प्रयोगेषु कामं नूतनता वर्तते, परन्तु असंस्कारोऽपटुता वाऽपि अनुभूयते तथा हि- वेला विलग्ना (समयः सञ्जात इत्यर्थे - पृ० २२), "चालकस्य शुष्काधरद्वयं बिडिपुच्छं धारयितुमपि इष्टवान्" (पृ० १६) "उल्लग्नपर्वते कति वृक्षाः" (पृ० २१)। "चर्मलयौनक्षुधातले मनसि भासते अप्रत्याशितदृष्टिविनिमयस्य मृतदिवसः"-(पृ० २८) "मनसि उदभवति वर्तुलविलग्नता" (पृ० २९) इत्यादयो वाक्यांशा अवधेयाः।

पारम्परिकं ग्रामजीवनम्, नव्यनागरिकसभ्यातायाश्च वैषम्यमिह परामृष्टम्। केशवचन्द्रो निर्लिप्ततया साक्षिभावेन वा संसारगतां लीलां पश्यति। उपन्यासेषु तस्यायं साक्षीभावः विशदयति विस्तारयति कथाफलकम्।

राधावल्लभः

आधुनिकसंस्कृत में अर्थपूर्ण अभिव्यक्ति की कविता

सम्पादिका - श्रुतिः हर्षदेव, प्र० श्रीवाणी अकादेमी, चान्दखेड़ा।

हर्षदेवमाधवस्य अर्धशतीपूर्त्यवसरे प्रकाशितमिदं पुस्तकम्। अत्र हर्षदेवस्य काव्यसंसारमधिकृत्य सन्ति त्रयोदश लेखाः हिन्द्याङ्ग्लीगुर्जरभाषासु रचिताः तेषां तेषां समीक्षकानाम्। येषां च विदुषां समालोचकानामत्र सङ्कलिता लेखास्ते सर्वे आधुनिकसंस्कृतसाहित्यस्य तत्रापि हर्षदेवविरचितकाव्यस्य परिशीलने चिरं रतास्तदर्थं च सन्ति सुविश्रुताः। अत एव सङ्कलितेषु तदुपज्ञेषु

त्रयोदशसु लेखेषु समकालिकसंस्कृतसाहित्यस्य विशेषतो हर्षदेवस्य कवितायाः विशेषाः विशदं उन्मीलन्ति।

राधावल्लभः

***ऋषेः क्षुब्धे चेतसि* - हर्षदेवो माधवः, सम्पादक-- प्रीतेशशुक्लः। प्रा० श्रीवाणी अकादेमा, चान्दखेड़ा। २००४**

अस्मिन् सङ्ग्रहे चतुर्षु स्तबकेषु हर्षदेवमाधवस्य पूर्वसङ्ग्रहेषु प्रकाशितानि कानिचित् हाइकू-सिजो-ताङ्काकाव्यानि सङ्कलितानि। प्रत्येकं स्तबके सङ्कलितानां काव्यानां रचनाकालावधिः तत्तन्मुखपृष्ठे सूचितः, येन कवेर्माधवस्य अप्रचलितासु विधासु रचनादक्षतायास्तदीयकवित्वविकासस्य च ज्ञानं भवति। एताभिस्तिसृभिर्विधाभिर्हर्षदेवेन समकालकसंस्कृतसाहित्ये रचनाया नवीना आयामा उद्घाटिताः। तस्य हायकूकाव्यानि संख्यया प्रायः त्रिसहस्रं सन्ति। एतेषु स्वल्पान्यत्र सङ्कलितानि।

अन्ततश्च जशवन्तीदवे-रश्मिकान्तध्रुव-इलाघोषानां चत्वारो लेखा एता विधास्तासां हर्षदेवकाव्ये विशेषांश्चाधिकृत्य सान्ति।

राधावल्लभः

***मनसो नैमिषारण्यम्* प्रणेता स एव। सम्पादकः- नारायणदाशः. प्र०- श्रीमती सवितादाशः, गञ्जामम्,। प्र०सं० २००३**

हर्षदेवमाधवस्य षोडशोऽयं काव्यसङ्ग्रहः। अस्मिन् सङ्ग्रह सम्पादकस्य काऽपि भूमिका नास्ति। सङ्कलितासु अष्टाविंशतिकवितासु कियत्यः पूर्वं प्रकाशिताः कियत्यः अप्रकाशिता इत्यपि न सूचितम्। प्रायः हर्षदेवस्य पूर्वं प्रकाशितेषु पञ्चदशकाव्यसङ्ग्रहेषु अत्र सङ्कलिताः कविता न दृश्यन्त इति सर्वा नवीना एता इति अनुमानं भवति। क्वचित् क्वचित् हर्षदेवस्य नवीनकाव्येषु तस्य पूर्वविरचितकाव्यानां भावा पुनरावर्तन्ते। यथा कदाचित् इति शीर्षकेण द्वितीयकवितायाम्-

पिहितद्वारस्य समीपे स्थितोऽस्मि
कदाचित्
भवेत् तत्र मे नष्टस्नेहम्।
बद्धौष्ठद्वयं प्रति स्थितोऽस्मि

तत्र निगूढः स्यात्
प्रणयशब्दः मम कृते। (पृ०६)

एतादृशाः भावा अलकनन्देति शीर्षकेण पूर्वं प्रकाशितासु रचनास्वपि कविना प्रकटिताः। प्रेमानुभूतेः प्रत्यग्रता हर्षदेवस्य काव्ये सर्वत्रानुभूयते। प्रेम्णोऽनुभूतिस्तदीये काव्ये वैश्विकतां धत्ते। प्रेयस्या प्रणये स पाञ्चभौतिक-विश्वस्य विविधवर्णविच्छित्तीः जीवनरागं मृत्युबोधं च मिश्रयति-

मह्यं रोचते श्यामवर्णश्च
तत्रास्ति
मृत्योर्निस्तब्धता
आकाशस्य निरवधित्वम्
तव नेत्रयोर्मौनपरिभाषा च। (पृ०५)

नवीनाः अस्पृष्टाः बिम्बा अद्यापि नवीनरचनासु तत्काव्यविश्वे पूर्ववत् परापतन्ति। पर्वतारोहमसमय इति काव्ये

पर्वतः कण्डूयते ग्रामम्
किञ्चित् क्षेत्रम्
थुवरस्मृतिः कण्डूयते
गगनं कण्डूयते मां स्वद्युतिशृङ्गेण।। (पृ० १४)

प्रायः सर्वासु कवितासु महानगरे निवसन् तत्रत्यं त्रासं सभ्यतागतं विनाशं च साक्षात्कुर्वन्नपि कविः रचनायाः अवकाशं निर्माति

अणुबोम्बभयान्विते जगति
सिनेमागृहं गत्वा विस्मरामि सर्वमपि
भूकम्पग्रस्तनगरस्य चतुष्के
पश्याम्यहं
जीवनस्य स्वप्नम्
सूर्यस्य ज्वालासु
रचयिष्यामि नीडमेकम्
स्वलीलया। (पृ०१०)

आरग्वधस्य कृते अमोलताशः (पृ०२३), प्रत्येको वृक्षः, प्रत्येका शाखा (पृ०२९) प्रत्येका कथा, प्रत्येका आख्यायिका (पृ०३६) इत्यादयः प्रयोगाश्चिन्त्याः।

यथा अलकनन्दाया प्रतीकं निर्मितं कविना पूर्वकाव्येषु तथा मनसो नैमिषारण्यस्य राक्षसहृतायाः किंवदन्तीनां राजदारिकायाः प्रतीकद्वयं इह तेन तेने।

राधावल्लभः

---ooo---

अस्मिन्नङ्के प्रणेतारः

१.	आचार्य जगन्नाथपाठकः	३/११, एम्.आई.जी. आवास विकास कॉलोनी, योजना ३, झुन्सी, इलाहाबाद, २११ ०१६
२.	डॉ. अच्युतानन्ददाशः	बी. ११, विश्वविद्यालय परिसर, सागर विश्वविद्यालय, सागर ४७०००३
३.	प्रो. अभिराजराजेन्द्रमिश्रः	कुलपति, संपूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी
४.	प्रो. वे. कुटुम्बशास्त्री	कुलपति, राष्ट्रिय संस्कृत संस्थानम् मानीत विश्वविद्यालय ५६–५७ इन्स्टीट्युशनल एरिया जनकपुरी, नई दिल्ली
५.	प्रो. देवर्षि कलानाथ शास्त्री	सी. २८, पृथ्वीराज रोड, जयपुर – ३०२००१
६.	प्रो. इच्छारामद्विवेदी	पुराणेतिहास विभाग लालबाहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ, मानीत विश्वविद्यालय कटवारिया सराई, नई दिल्ली
७.	प्रो. पुष्पा दीक्षित	तेली पारा, विलासपुर, छ.ग.
८.	डॉ. रमाकान्तपाण्डेयः	१२२, भागीरथी नगर, गोपालपुरा बाईपास जयपुर – ३०२०१३
९.	डॉ. प्रेमनारायणो द्विवेदी	पुर्व्याउ टोरी (जनतास्कुल के पास) सागर
१०.	डॉ. पी. वरप्रसादमूर्तिः	बिभागाध्यक्ष, संस्कृत–तेलुगु नागार्जुन विश्वविद्यालय नागार्जुन नगर – ५२२५१० (आ.प्र.)
११.	प्रो. गङ्गाधरपण्डा	आचार्य, पुराणेतिहास विभाग, संपूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी
१२.	प्रो. एन्.पी. उन्नी	भूतपूर्व कुलपति, श्रीशंकराचार्य विश्वविद्यालय, कालटी श्रीलास्यम्, ऋषिमंगलम्, तिरुवनन्तपुरम्, केरल

१३.	डॉ. धर्मेन्द्रकुमारसिंहदेवः	राष्ट्रिय संस्कृत संस्थानम् मानीत विश्वविद्यालय ५६–५७ इन्स्टीट्युशनल एरिया जनकपुरी, नई दिल्ली
१४.	डॉ. भागीरथिनन्दः	साहित्य विभाग लालबाहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ, मानीत विश्वविद्यालय कटवारिया सराई, नई दिल्ली
१५.	डॉ. नारायणदाशः	चढिया पाली, पुरुषोत्तमपुर, गंजाम, उत्कल – ७६१ ०१८
१६.	प्रो. कुसुम भूरिया	विभागाध्यक्ष, संस्कृतविभाग, सागर विश्वविद्यालय, सागर
१७.	डॉ. आशा सर्वटे	प्रवाचक, संस्कृतविभाग, सागर विश्वविद्यालय, सागर
१८.	डॉ. पूर्णचन्द्र उपाध्यायः	वरिष्ठ प्राध्यापक, संस्कृत विभाग विडला शासकीय महाविद्यालय, भवानीमण्डी, राजस्थान
१६.	डॉ. आचार्यः सत्यनारायणः	राष्ट्रियसंस्कृतसंस्थानम् मानीत विश्वविद्यालय श्रीसदाशिव–परिसर, पुरी
२०.	प्रो. राधावल्लभत्रिपाठी	आचार्य, संस्कृतविभाग, सागर विश्वविद्यालय, सागर
२१.	डॉ. बनमाली बिश्वालः	राष्ट्रियसंस्कृतसंस्थानम् मानीत विश्वविद्यालय गंगानाथझा–परिसर, आजाद पार्क, इलाहावाद.
२२.	श्री उमेशदत्त भट्टः	६७/३एफ./१/ शिवकुटी तेलियारगंज, इलाहावाद २२१००४.
२३.	सुश्री अर्चना तिवारी	राष्ट्रियसंस्कृतसंस्थानम् मानीत विश्वविद्यालय गंगानाथझा–परिसर, आजाद पार्क, इलाहावाद.

==========

सागरिका समिति पंजी. क्र. 876
NEWS PAPER'S REG. NO. 13073/67

सागरिका

सप्तत्रिंशद्वर्षभ्यो निरन्तरं
प्रकाश्यमाना अन्ताराष्ट्रियख्यातिं गता
संस्कृतशोधपत्रिका

पूर्वं प्रकाशितायाः सागरिकाया विशेषाङ्काः

१.	भारतीयसंस्कृतिविशेषाङ्कः	नवमवर्षे
२.	विश्वसंस्कृतसम्मेलनविशेषाङ्कः	दशमवर्षे
३.	कालिदासविशेषाङ्कः	द्वादश—त्रयोदशवर्षयोः
४.	ज्योतिषविशेषाङ्कः	षोडशवर्षे
५.	नाट्यवेदविशेषाङ्कः	सप्तदशवर्षे
६.	मध्ययुगीनसंस्कृतनाटकविशेषाङ्कः	अष्टादशवर्षे
७.	भट्टतौत—विशेषाङ्कः	द्वाविंशवर्षे
८.	रजतजयन्तीविशेषाङ्कः	पंचविंशवर्षे
९.	प्राचीनभारतीयसमाजदर्शनविशेषाङ्कः	ऊनत्रिंशवर्षे
१०.	मनुस्मृतिविशेषाङ्कः	त्रयस्त्रिंशवर्षे
११.	आधुनिकसंकृतसाहित्यविशेषाङ्कः	पंचत्रिंशवर्षे
१२.	संस्कृतगौरविशेषाङ्कः	षट्त्रिंशवर्षे
१३.	संस्कृतव्याकरणविशेषाङ्क	षट्त्रिंशवर्षे
१४.	आधुनिकसंस्कृतगद्यकाव्ये स्वर्णकालविशेषांङ्कः	सप्तत्रिंशवर्षे